University of Madras.

# B. A. Degree Examination 1912.

ANCIENT CLASSICS FOR SANSKRIT READERS.

No. IV.

# SRI BHISHMA VIJAYA

WITH COMMENTARY.

BY

SRI LAKSHMANA SURI

AND WITH NOTES

BY

S. VEDANTA IYENGAR, B.A., L.T.,

*Teacher, Pachayappa's High School, Madras,*

...ND TRANSLATION

BY



...PPA IYER, B.A., L.T.,

*...ya's High School, Ettayapuram.*

Madras.

PRINTED BY S. MURTHY & CO.,

... 305, Thambu Chetty Street.

Price Rs. 3] 1909 [Postage Extra.

Copyright Registered.

University of Madras.

# B. A. Degree Examination 1912.

ANCIENT CLASSICS FOR SANSKRIT READERS.

No. IV.

# SRI BHISHMA VIJAYA

WITH COMMENTARY.

BY

SRI LAKSHMANA SURI

AND WITH NOTES

BY

S. VEDANTA IYENGAR, B.A., L.T.,
*Teacher, Pachayappa's High School, Madras.*

AND TRANSLATION

BY

T. S. NELLIAPPA IYER, B.A., L.T.,
*Head Master, Raja's High School, Ettayapuram.*

Madras.

PRINTED BY S. MURTHY & CO.,
*305, Thambu Chetty Street.*

Price Rs. 3·] 1909 [Postage Extra.

MADRAS:
Printers, S. Murthy & Co., The "Kapalee" Press,
305, THUMBU CHETTY STREET.

To

THE HONOURABLE, JUSTICE,

**Mr. V. KRISHNASWAMI IYER,**

*High Court, Madras.*

**THIS WORK**

IS RESPECTFULLY DEDICATED

BY

THE AUTHER.

# CONTENTS.

# ERRATA.

| Page. | Line. | For. | Read. |
|---|---|---|---|
| 1 | 10 | त्वत्वा | नत्वा |
| 2 | 19 | ममेम | ममेद |
| 3 | 10 | ग्रण | प्रण |
| 7 | 2 | पुराति | पुरास्ति |
| 8 | 6 | ग्रमत | प्रसत |
| 11 | 13 | पूर्वें | पूर्वं |
| 12 | 6 | माणात्वा | माणत्वा |
| 14 | 12 | लेहन | हेलन |
| 16 | 10 | भ्रातुच्छ | भ्रातुरछ |
| 18 | 11 | ज्ञार्न | ज्ञार्न |
| 19 | 8 | प्रवर्त | प्रवर्त |
| 24 | 12 | श्रोयस्का | श्रेयस्का |
| 26 | 6 | करोति | कुर्वति |
| 28 | 1 | कुसु | सकु |
| ... | 12 | गहा | महा |
| 29 | 12 | दीयत | दीयता |
| 30 | 2 | वोद्ध | वोद्ध |
| 32 | 15 | वैम | वैम |
| 37 | 3 | सुश्चित | सुस्थित |
| 40 | 14 | निर्णि | निर्णी |
| 43 | 4 | ईदशो | ईदशे |
| 44 | 6 | धता | घत्ता |
| 48 | 8 | बाधो | बाधे |
| 50 | 11 | न्या | न्यो |
| 53 | 9 | युद्धि | युद्धी |

| Page. | Line. | For. | Read. |
|---|---|---|---|
| 54 | 14 | मान्क्रत्व | मान्क्रान्वा |
| 58 | 5 | द्वारमामा | द्वारमामा |
| 65 | 10 | क्रमि | क्रिमि |
| 69 | 8 | ममाने | ममाजे |
| 72 | 10 | कर्णान | कर्णाश्रीन |
| 74 | 18 | विवृत्म | विवृन्म |
| 75 | 2 | यक्तिं | यन्कि |
| 95 | 2 | चतुर्थो | चतुर्थो |
| 97 | 7 | मान्त | मन्द |
| 105 | 1 | पुण्प | पुण्प |
| 107 | 6 | प्रामाद् | प्रमाद् |
| 112 | 12 | न तेवि | न तेर्वि |
| 117 | 20 | प्वप्स:सु | प्वप्सर:सु |
| 118 | 14 | दम्भिसौ | दम्भितसौ |

The unnecessary insertion of ⁻ as in विह for विह page 2, line 15, and the omission or the want of impression of ⁻ as in सभा for सभा page 9—9, occur in some places. Please correct and read accordingly.

श्रीः

# ॥ श्रीभीष्मविजयम् ॥

येन कामश्च कालश्च निगृहीतौ सुदुर्ग्रहौ ।
स ईष्टे सर्वलोकानां नौमि तं राजशेखरम् ॥

आसीदशेषभुवनमाननीये सोमान्ववाये सोम इव सुधासागरे सुधासारनिष्यन्दिगुणमयूखालंकृतः प्रतीपस्य तनुजः **शंतनु**र्नाम राजा । सकृदेव यस्य करस्पर्शमात्रेण शमितविस्रसाकृतवैकृतजातमभिजातनववयोऽभिरामं च तन्वते वस्तुजातम् । अत एव यं शंतनुरित्यन्वर्थनामानं समामनन्ति । अचिन्त्यो हि मणिमन्त्रौषधीनामिव भगवतः परमेष्ठिनः कटाक्षलहरीलवसमुक्षितानां भावानामनुभावविशेषः । यस्य च सौभाग्यगुणलोलुभा खल्वात्मनः समुपलम्भनाय कृतावसरमग्रजत्वेन संनिहिततरं देवापिमपहाय अवरजत्वेन व्यवहिते स्वयमुदासीने यस्मिन् कुमारे कौमारविहारकुतूहलिनीव प्रजानुरागोपवाहिता साभ्यर्थनमवततार राजलक्ष्मीः । गुणगृह्या हि विदूरस्थमपि गुणसमृद्धं वस्तु तद्गुणगौरवेण हस्तावचेयमिव विभावयन्तः कथमपि समुपादित्सन्ते मुक्तारत्नमिव रत्नाकरात् । तद्विपरीते पुनः पुरोवर्तिन्यपि लोलुपा-

षाणवदपदार्थभावनया चक्षुर्मात्रमपि नार्पयन्ति । अतो न्याय्य एव त्वद्दोषिणि व्यायस्यपरागः कमनीयतमे कनीयस्यनुरागश्च श्रियः । सोऽपि विनैवात्मनः प्रयत्नेन स्वयमुपनतां तां देवीमखण्डितोपभोगप्रदानेनोपलालयितुं कृतादर इव स्वयमकृतदार एव कंचित्कालं पृथिवीं शशास ।

अथ कदाचिन्मृगयाप्रसङ्गेन भागीरथ्यास्तटाटवीष्वेकेन रथेन संचरमाणः स मानवेन्द्रो नातिदूरे विहरन्तीं सर्वतः प्रसरन्त्या शरीरकान्त्या स्नातोत्थितामिव लावण्यमये सरसि अञ्जतीमिवामृताञ्जनेन चक्षुषी, संचारिणीं विजयवैजयन्तीमिव त्रिभुवनविजयिनो मकरकेतोः, अतिशयितरूपसंपन्नां कामपि युवतिमद्राक्षीत् । अप्राक्षीच्च चिरेण लब्धान्तरेण पञ्चशरेण च्छिद्रितान्तरस्तत्सविधमुपधाव्य–अयि भद्रे, का त्वम् । किमर्थं श्वापदैकशरण्येऽस्मिन्नरण्ये स्वयमेकाकिनी पर्यटसि । न च ते सहचरमनुचरं वा कमपि पश्यामि, येन तवैवमकातर्येण संचारः स्यात् । नापि साध्वसगन्धमपि त्वय्युपलक्षये । सम्यग्गुप्तिमति प्रमदवने सह सखीभिर्विहरन्त्याः प्रमदाया इव हि ते मानसमपेतातङ्कमतीव निर्वृतं च प्रतिभाति । एकान्तभीरवो हि प्रायेण नार्यः । अतो भवितव्यं भवत्या हैमवतीप्रतिपत्त्या विहर्तुमुपागतया कयापि नाकलोकवनितया । दृढयति च ममेममनुमानं मानवलोके सुदुर्लभा तवेयमाकृतिः ।

तद्विशेषं व्यपदेष्टुमर्हसि । न हि सामान्यज्ञानेन जिज्ञास्यस्य जिज्ञासा विनिवर्तते । अस्ति च मे विवक्षान्तरम् । तत्र च सदुत्तरदानेन मां मानयतु भवती । एतावताप्यनेहसा मय्यनीश्वरः कुसुमशरस्त्वदवष्टम्भेन विष्टम्भयति ममावष्टम्भम् । अपथेष्वकृतपदा हि भारतव्यपदेशिनः । जानीहि मां शंतनुं नाम नेतारमस्य कृत्स्नस्य विषयस्य, प्रणप्तारं तत्रभवतश्चक्रवर्तिरेखासु प्रथमरेखावर्तिनः शाकुन्तलेयस्य भरतस्य। न हि कुलीनस्य चक्षुस्तमसीव परकलत्रे कथमपि परापतति । अतो मन्ये काम्यप्सरस्स्वन्यतमां युवतिं भवतीम् । उपोद्बलयति खल्वेतमर्थमद्भुतमस्मत्पूर्वपुरुषस्य पुरूरवसः प्रणयिन्या उर्वश्या ऐतिह्यम् । तस्माद्भद्रे, यदि प्रसन्नो ममायं तर्कः, यदि च प्रसन्नतरोऽस्मासु भवत्या भावः, तदानुगृह्यतामोंकारेण वाक्प्रपञ्च इवायं जनः । क्रियतामस्माकमेकातपत्रच्छायायां विश्रान्तिरविश्रान्तम् । अलंक्रियतामयं रथो मम मनोरथसर्वसंपत्त्या भवत्या ।

एवमुपमन्त्रयमाणे महीन्द्रे, सखेलगतिविलासा सा विलासिनी ललितवल्गितेन विलोचनाञ्चलेन इन्दुसुन्दरेण मन्दहासेन सरसमधुरेण चाटुसंजल्पितेन च कन्दलयन्ती तस्य मनसि मनसिजाङ्कुरमिदमुदाजहार—'भो राजन्यशिखामणे, जानामि भवतो गुणविशेषानशेषतः। का नाम विवस्वन्तमिव विभान्तं भवन्तं न

जानात्यस्मिन् जगतीमण्डले । जानीहि मां भवन्तमिव प्रख्यात-कुलव्यपदेशभाजो महीभृतः संतानम् । अतः परतरं मे चरितं ज्ञास्यस्येव समयेन । तदलमधुना तत्राग्रहेण । अन्यादृशीभिस्तव गुणपरंपराभिरनुरञ्जितामुपभोगप्रवणां च मामवगन्तुमर्हसि । उच्चैःपदप्रणयिन्यो हि विदग्धाः कामिन्यो न तु सलिलवेण्य इव नीचैःपदाभिलाषिण्यः । मास्तु च ते मयि परपरिग्रहशङ्कोपग्रहः । तस्मात्काममभिनन्दनीयो हि मयि ते प्रेमानुबन्धः । कथं नु भवादृशामार्यशीलानां मनस्यनार्यः संकल्पः समुत्पद्यतामङ्गारार्चिष्षीव शूककीटः । न खलु संकल्पयोनिरपि कल्पनानर्हेषु कर्मसु प्रस्खलन् मोघसंकल्पो विरमति । अतः सर्वमनवद्यम् । किंतु । अस्ति मे किमपि विवक्षितम् । यदि तदनाक्षेपेणाभ्युपगच्छसि, तदा आवयोर्मनसि समुदितोऽनुराग-पादपो नूनमनुक्षणमेव फलिष्यति । कामश्चावन्ध्यप्रयत्नो भविता । इति । काममभिधीयताम् । समर्थयामः कथमपीति सोत्साहं प्रत्युत्तरयति तस्मिन् नरपतौ, सा पुनरुवाच—राजन्, कृच्छ्रोप-पादनीयं न मे किमपि काङ्क्षितम्, येन तव तत्समर्थनायासो भवेत् । किं त्वकृच्छ्रसाध्यमेव मया भवतोऽभ्यर्थ्यते । तदनाकुलं शृणोतु भवान् । यत्किल समानेऽपि चेतनत्वे वाक्पाण्या-दिकरणवत्त्वे च स्त्रीपुंसयोः, गृह्यकान् पशूनिवास्वातन्त्र्यकरणेन विमानयन्त्यबलाजनान् पुमांसो न मे तदभिमतम् । माननीया हि

सर्वावस्थासु स्वातन्त्र्यकरणेन गृहिण्यः। नास्त्येव ताभिर्विना गृहिणां त्रिवर्गव्यवहारः। तदुत्पश्यतु भवान्। कतमं वा यज्ञदानादिषु सहधर्मिणीं वर्जयित्वा स्वयं संचिनोतु धर्मं सुधार्मिकोऽपि पुरुषः। जायाधिरोहण्यां पदमकृत्वा केन वोपायान्तरेण पुन्नाम्नो नरकान्निःश्रेयसप्रासादमधिरोहतु जड्वालतमोऽपि। तिष्ठतु तावदियमप्रत्यक्षफलप्ररोचना। विमृश्यतां वीतमानमपरोक्षतोऽपि। कान्ताहृदावगाहनादृते किमस्ति कामातपसंतप्तगात्रस्य शान्त्यन्तरम्। न हि तं प्रपश्यामि क्षणमात्रमपि न मे मनः स्त्रीषु संलग्नमिति धैर्येण यः प्रतिब्रूयात्। कुटिम्बिन्यामवरोप्य खलु दुर्भरं स्वं कुटुम्बभरं वीतचिन्ताज्वराः स्वैरं विहरन्ति कुटुम्बिनः। एवमादिभिर्गुणगणैः संगुणितं पुनरात्मजरूपेणात्मनो जनिस्थानं को नु नाम कलत्रमवज्ञातुमीहेत कृतज्ञः। तस्मात्स्त्रियः स्वाच्छन्द्यभञ्जनेन नावमन्तुमर्हा इति ममायमभिसंधिः। तव निवेशने निवसन्त्या मम स्वातन्त्र्यवरं देहि। एषास्मि सज्जा सर्वात्मना भवन्तमुपस्थातुम्। अथ कदाचिद्विस्मृत्य स्वं नियमं नियमयसि मां मदीयचेष्टितेषु, कथमिदं, किमर्थमिदं, इदं मास्त्विति; विद्धि तमेवावसरं ममापसर्तुम्। इति। अङ्गीकारवचनश्रवणेनैव कृतार्थमानी स कामी 'सुन्दरि, विनाप्येतेन वरेण सुलभ एवायमर्थः। को नु नाम रसस्रोतस्विनीं रमणीमुत्साहभञ्जनाय धृष्णोति रसिको जनः। अतः स्वच्छन्दचेष्टा भव। यादृशी ते मनसो रुचि-

स्तदनुरूपमनुतिष्ठ चेष्टितानि । न तत्र पर्यनुयोक्तास्महे । स्मरशरार्दितस्य मे विशल्यकरणी भव । तावन्मात्रेण कृतार्थो भवेयम्' इति पुनरुपत्रपमानो लब्धस्वाच्छन्द्यवरया तया वराङ्गनया सह रममाणो महान्तं कालं कालयामास।

अथ यथाकालं गर्भं दधाना सा देवी क्रमेण प्रादुर्भूतेषु तेषु तेषु दोहदचिह्नेषु कुसुमिता कनकलतिकेव पुनरुक्तशोभाविशेषा कैवल्यभूमिरिव चाक्षुषानन्दस्य, उपर्युपरि दृश्यवस्तुनि भासमाना समलक्ष्यत। क्ष्मापतिस्तु तथाविधां तां गृहलक्ष्मीमालक्ष्य हर्षमाणः प्रत्यासन्नेन पुत्रलाभेन पर्युत्सुकः प्रतिक्षणमभिलषितसंपादनसंप्रीणनसंलालनादिभिर्दयितामाराधयन् प्रसूतिसमयं प्रतीक्ष्यावतस्थे।

अथ यथोदयमुदयभाजं विभ्राजमानवपुषमात्मजमवलोक्य सागर इव पर्वणि निःसीमसंमदपूरः स पौरवेन्द्रोऽवमोचितऋणबन्धं पितॄणां, अवरोपितभरणभरं च प्रजानामात्मानं मन्वानः अश्रमेण स्वरसवाहितया च तपःसिद्धिसाधनं द्वितीयमाश्रमं बहुमेने। तावदेव सर्वतः प्रहतेषु मङ्गलवादित्रेषु प्रनृत्तेषु नर्तकेषु प्रवृत्तेषु हर्षप्रदानेषु प्रवर्तयत्सु तत्र तत्र महोत्सवममात्यवर्गेषु, ततस्ततः समापतत्सु सोपायनेषु पुरजनेषु, समवयत्सु स्वस्ति-

वाचनिकेषु ब्रह्मवादिषु, स्नातानुलिप्ते कुमारस्य जातकर्मणे पुरोधसं पुरोधाय पुरः तिष्ठति पितरि, सा प्रसूः स्वं शिशुमादाय स्वयमुपलालयन्ती पश्यत एव भर्तुः, जात, अस्तु तेऽपवर्गः, इत्याशासाना वेपमानतनुतरतनूकं रोरुद्यमानं तमर्भकं घातकीव स्रोतसि प्रास्यति स्म। सपदि आः किमिदमित्युद्भटाटोपेषु अनाकूतज्ञतया शासितुर्भ्रुकुटीप्रेक्षेषु लालाटिकेषु, भयेन निर्वचनेकृत्य वदनगर्भगर्भितहाहारवेष्ववरोधपरिजनेषु, इतिकर्तव्यतामूढेषु जडीभूतेष्वत्रापोढकृत्येष्वमात्येषु, स्तम्भितसंभारेषु सभारम्भेषु, काकुरवमुखरेषु नागरेषु, स नरपतिरव्यूढः स्वसमक्षमनुष्ठितमतिनिष्ठुरमत्यन्तमनिष्टं च तद्दयिताचेष्टितं दृष्ट्वा संरुष्टोऽपि सपदि स्मृतिपथमारूढायां तत्संविदि तदीयरतिविलासलालसाक्षिप्तचित्ततया तद्वाङ्गभङ्गभयेन सावहित्थमन्तर्नियमितविक्रियः संयमीव तितिक्षासारो वाचंयम इव तूष्णीकश्च सन् स्वयमुपेक्षामास। तावदेव निर्वर्तितस्वव्यापारा सा पार्थिवप्रणयिनी पुनरपि प्रणयपिशुनैरसमशरविहारप्रणयिभिश्चाटुकारैरुदकासारैर्वर्द्धितं विलुप्तं वनमिव कादम्बिनी पुलनाशसेतसे तत्कमितुर्मानसमपेतक्लेशोपतापमतितरां घनरसानुविद्धं च वितन्वती, अयि कान्त, एषास्मि तवैकान्तबन्धुरिति संजल्पन्ती सचमत्कारं तं करे जग्राह। क्षणेन पुनर्नवीकृतोऽसाववनीपतिरनवमरसैरभिनवैरुपभोगैरनवरतमुपलालयन्त्या रतिपण्डितया तया वनितया संवनितात्मा न सस्मार स्वात्मनोऽपि किं पुनरनात्मभूतस्यात्म-

जादेः । जनास्तु वितर्तीभवति तदुदन्ते स्वयमदान्तस्वान्ता अपि तां नियन्तुः क्षान्तिमुपलभ्य ‘केनाप्यान्तरेण बलीयसा कारणेन भवितव्यं, अन्यथा कथमुपेक्षेत शिशुमारणक्रौर्यमसावुग्रशासनः’। इति तद्गुणप्रतीत्या स्वयमनेडमूका इव तत्कथाया व्यरमन्। अथ पुनरप्यन्तर्वत्न्यां स्वपत्न्यां, स्वयमन्तराहितात्याहितगर्भः स प्रजेश्वरः काले प्रसूतं स्वं प्रसवं प्रहतपूर्वया पद्धत्यैव निर्धां गमयन्त्यां जनयित्र्यां, निभृतचिन्तापरो बभूव——नूनमियं कापि दिव्याङ्गना केनापि कारणेन मामुपास्ते । अनल्पेन च तेन भवितव्यम्। अन्यथा कथमेवमतिक्रौर्यम् । दृश्यते हि नृशंसस्वभावानामपि स्वेषु तोकेष्वस्तोकं वात्सल्यम्। न चास्यामिदमेकमकार्यं वर्जयित्वा निपुणं निरूपयन्नपि सुसूक्ष्ममप्यवद्यमुत्पश्यामि किञ्चित्। अहो अन्यादृशमानृशंस्यं सर्वत्र, अतीव नृशंसता च स्वगर्भ इति च विषममिदम्। मन्ये सर्वमेतच्छुभोदर्कमेव विपरिणंस्यते। तदिदानीं मास्तु तच्चेष्टापर्यनुयोगेन रसभङ्गः। अपत्यं प्रति यथा तथा वा भवतु । न खलु भाविने श्रेयसे हस्तगतमर्थमुज्झितुं सांप्रतम्’ इति निश्चित्य माध्यस्थ्यमकुरुत।

एवं विशसितेषु सप्तसु गर्भेषु, गर्भगते वर्धिष्णौ चाष्टमे गर्भे तया वरवर्णिन्या पूर्वतोऽप्यधिकतरमाराध्यमानोऽपि स मेदिनीपतिरभङ्गुरेऽपि प्रणये, अस्खलितेऽपि विनये, अपरिहीणे

ऽप्युपचारविधौ, अत्रुटितेऽपि चाटुकारे, अयातयामेऽपि रसास्वादे, अक्षीणबाणेऽपि पञ्चबाणे, सज्जमानेऽपि विविधे भाग्यवर्गे, सृज्यमानेऽपि नवनवे भोगसर्गे, यौवनमध्यस्थोऽपि, रसिकतमोऽपि, विनापि कस्यापि केनाप्युपदेशेन संभाषणेन सहवासेन समागमेन संनिधानेन वा स्वयमुद्वेजित इव माधुर्यातिरेकेण शनैः शनैः कामिनीकथास्वपि वैरस्यमापद्यत। अथ प्राप्तवैजनना सा जनेश्वरमहिषी समन्ततः प्रसृमरेण शरीरस्य तेजसा बालविभावसुमिव बिभासमानमतिगभीराकारमासेचनकाङ्गप्रत्यङ्गसौष्ठवमुत्तुङ्गभुजाशिखरं विशालवक्षसमनूनराजलक्षणमाकृत्यैव संभावनीयमहिमानमात्मजं जनयामास।

जातमात्रे तस्मिन् कुमारे सनातनो धर्मपादपः पुनरपि प्रवालव्याजेन पादप इव तत्र तत्राङ्कुरितो भूत्वा विशेषां शोभां पुपोष। मायानृतशीलानां दाम्भिकानां चोरकर्मणि प्रवृत्तानामिव विनैव कारणेन पदे पदे महान्मनसि संत्रासः समजायत। साम्प्रतीनानां हृदये चिरेण घनीभूतो बलावलेपक्नोऽस्य भुजोष्मणा विलापित इव सहसा विलीयते स्म। प्रायेण ग्राम्यसुखासक्ततया लोकस्य, नात्यन्तमादृतः केवलमाश्रमान्तरं प्रविविक्षतामुपकुर्वकाणा चैत्यवृक्ष इव मार्गगतानां क्षणविश्रान्त्युपकारकतामात्रेण कृतार्थीकृतोऽयं चातुराश्रम्ये प्रथमो ब्रह्मचर्याश्रमस्तमिमं कुमारमुपलभ्य, साधुरिव

सुराजनि राष्ट्रे प्रथमपूजाभाजनं बभूव । यश्चासौ गृहसारान् पाटच्चर इव पुण्यसारान् ज्ञानवैराग्यादीनपहरन् दुरमात्य इव कदर्ये वर्त्मनि प्रवर्तयन्, स्वयमवस्तुभूतोऽपि स्वप्नव्याघ्र इव बहनर्थकारी भूतावेश इव बहु व्याकुलयन्मनसिजामयः सोऽयमामय इव महाभिषजा भिषज्यमानोऽस्य संदर्शनेन दिवाकरकरदर्शी दिवान्ध इव सहसा न्यलीयत ।

तदनु द्वितीयं पावकमिव भ्राजमानमात्मजमवलोकयन् स शंतनुः सुकविवाचेवौजःप्रसादशालिन्या तस्य मुखश्रिया प्रसितो मनस्येवमकरोत्—अहो अस्य तेजः । अहो अस्य गाम्भीर्यम् । नूनमयं तरुणो भवन् भविष्यति जगत्यां तरुणारुण इव परायणं तेजस्वितायाः । अस्य खलु लाभाय मन्ये संतानसर्वकषायामस्यामस्य जनन्यां प्रतिप्रसवं प्रतिप्रसवक्रूरया समिध्यमानो मे क्रोधानलो निरिन्धनोऽनल इव स्वयमेव शाम्यति स्म । अतिदाक्षिण्येन स्वार्थक्षयोपेक्षणमपि क्वचिन्महते क्षेमाय कल्पते, येन ममायं पुत्रलाभः । इतः परमतो विरतिरेव न्याय्या । अपक्रान्तो हि सर्वोऽप्युद्यमो धान्यान्त इव कर्षणव्यापारः । यावदर्थमर्थेषु व्यवहरन् यथावसरं पदार्थानां गुरुलाघवानुगुण्येन हानोपादानविचक्षणो हि विचक्षणो नाम । तदलमियता कुलप्रतिपन्थिन्यामस्यां स्नेहानुबन्धेन । अवश्यं रक्षणीयोऽयं वंशाङ्कुरः । को वा विवेकी नवतृणलोभेनान्धकूपे पतन्

पशुरिवाल्पीयसे सुखाय दुःखसागरे निमज्जेत् । अनर्थाय ह्यतिप्रसङ्गो विषयेषु । तदियं मे पुत्रघातिनी काम गच्छतु तिष्ठतु वा । को नु नाम क्षमेत कुण्डोध्नीमपि फलच्छिदं धेनुम् । इति दृढं कृताध्यवसायः स्वजायामिदमवादीत्—अयि कान्ते, काममाराधितोऽस्मि भवत्या । नूनमतिप्रौढाऽसि कामतन्त्रे, चतुराऽसि वरिवस्यासु, अनलसाऽसि विलासेषु, अभिज्ञाऽसि भावज्ञानेषु, अप्रतिकूलास्यनुकूलयितव्येषु । किंच । सर्वाङ्गीणेन सौन्दर्येण सर्वकर्मीणेन कौशल्येन सर्वपथीनेन मतिनैपुण्येन च प्रशंसनीयाऽसि । सर्वमेवेदमभिनन्द्यम् । तथापि किमिदं ते लोकविद्विष्टं शिशुमारणक्रौर्यम् । किमाविष्टासि केनापि बालग्रहेण । अन्यथा जनन्येव पावकवर्चसः स्वात्मजानेवं क्रियासमभिहारेण निबर्हयतीति नतरां संभावनीयमेतत् । न खल्वीदृशाय पाप्मने दत्तवराऽसि । स्त्रीणां स्वातन्त्र्यकरणे बहून्दोषानुत्पश्यद्भिः खलु पूर्वैरभियुक्तैः 'न स्त्री स्वातन्त्र्यमर्हति' इति ताः सर्वात्मना पारतन्त्र्येण नियन्त्रिताः । मा मोच्छिदश्चरम मम वंशाङ्कुरम् । अवसितस्ते स्वाच्छन्द्यवरोऽसि ।

सा तु सोत्प्रासमिदमुदाजहार—ननु भोः, अवसितस्तर्ह्यावयोः संबन्धश्च । एषा साधयामि । प्राप्तावसरं मे स्वरूपनिवेदनम् । अतः श्रूयताम् । अहं शैलराजस्य कन्या **गङ्गा**स्मि । त्वं च पुराजन्मनि **महाभिषो** नामैक्ष्वाको राजर्षिरासीः । स त्वमश्वमेधराज-

सूर्यादिभिर्बहुभिः सुकृतसंचयैर्दिवमारूढो यदृच्छया कस्मिंश्चिदवसरे ब्रह्मणः सभामभ्यागतोऽभूः। तत्र तदानीं जातरूपमयैः शतपत्रपत्रैः परिष्कृतं रत्नसानुशिखरमिव भ्राजमानमोंकारमयमासनमध्यासीनम्, उपास्यमानया मैत्रीकरुणादिभिः अन्वास्यमानया सावित्र्यादिभिः आवर्जयन्त्या सर्वेषां स्वान्तं वीणावादनवैशारद्येन देव्या शारदया समलंक्रियमाणवामभागम्, आराध्यमानमखिललोकनायकैः, आद्रियमाणमणिमादिविभूतिभिः, आरक्ष्यमाणमष्टासु काष्ठास्वष्टाभिर्यमनियमादियोगपुरुषैः, आसेव्यमानमनिमेषवृत्तिना निमेषादिसंवत्सरान्तबहुपरिवारपरिवृतेन कालेन, अवतिष्ठमानमप्यधि निगमशिरांसि, लीलयैव वाङ्मनसागोचरबहुविचित्ररचनाचातुरीचित्रीयमाणजगच्चित्रचित्रणचतुरमपि स्वयमकृतस्य यदूषणगन्धम्, अन्तःस्थमपि सर्वविक्रियाणां स्वयं विक्रियाविवर्जितम्, सर्वज्ञं, सर्वशक्तिसंपन्नं, सर्वकारणकारणं, परात्परतरं पारे तमसः प्रकाशमानं पितामहं मरीचिप्रभृतयः प्रजापतयः सनकादयो योगीश्वराः नारदादयो देवर्षिगणाः अन्ये च ब्राह्मलौकिका नित्यसूरयो यथाप्रधानं यथाधिकारं यथावसरं च समुपासांचक्रिरे।

परमेष्ठ्यपि तथोपतिष्ठमानेषु समभिनन्दयन् ब्रह्मानुभवकन्दलितानन्दतुन्दिलानसकृच्छिरःकम्पेन, प्रोत्साहयन्योगचर्यानिर्यापितक्लेशपञ्चकान्मन्दहासेन, समुल्लासयन्क्रियाब्रह्मसक्तिप्रवाहनदीष्णा-

तान्मुहुर्मुहुरपाङ्गताङ्गेण, समाप्याययन् ब्रह्मचर्यादितीव्रतपोऽनलनिष्टप्तगात्रयष्टीन्नेत्रनिःसृतेन हर्षाश्रुपृषतेन, संपूजयन् यजनाध्ययनदानधर्मसत्यादिनिहितमतीर्नाङ्गतप्रदानेन, सकलमेव सभाजनमेवं सभाजयन्, कमलवनमिव कमलिनीवल्लभो युगपदेव समाजमनुजग्राह।

तादृशे तत्र सदसि सखीसहस्रेण सह स्वयं स्वयंभुवमुपतस्थुषी साहं नित्यमप्रमत्तस्वभावापि भाविनोऽर्थस्य बलेन कलितावधानभङ्गा किंचित्समीरसमीरणमपदिश्य विस्रंसमानं नीवीबन्धं नाज्ञासिषम्। अहो दैवस्य दुरतिक्रमणीयता, येनासंभावनीयोऽर्थः संभावित इव सहसाभिपत्य, तदनुगुणे व्यापारे बलान्नियोजयति। तत्क्षणमवाग्दृष्टिषु कार्त्स्न्येन सदस्येषु, एकं तव चक्षुः केवलं ममोत्सङ्गदेशे गाढमवगाढं बभूव। तेन विभोर्मुखे किंचिदिव क्रोधलिङ्गमुपलक्ष्य विह्वलेषु तन्मुखाभिमुखं प्रस्तारिततारकेषु सभास्तारेषु, महता घण्टारवेणेव सुगभीरेण कण्ठारवेण सर्वां सभां संस्तम्भयंस्त्वामिदं शशास कमलासनः—अयि महाभिष, किमिदं ते क्षुद्रचेष्टितम्। अपदं खल्विदं पदमीदृशानां कृपणाशयानाम्। ये किल ऋतुगामिनः स्वधर्मनिरता गृहमेधिनः तैरपि दुरारोहमिदं स्थानमारुह्य प्रभ्रष्टोऽसि जघन्यया वृत्त्येति शोचनीयस्ते मोघोदयः प्रयासः। अथ वा तीव्रेण तपसा निःशेषमनिर्दग्धदुर्वासनाबीजानां वैराग्याभासलेशेन कृतार्थमानिना क्रियसान्निध्ये सत्येवमेव

समुद्बुध्यते लालसः सुप्तोत्थितानामिव पुनर्वृत्त्युदयः । अतः प्रयाहि मनुष्यलोकम् । तत्र यथारुचि भोगान् भुक्त्वा कालेन प्रक्षीणकषायः प्रसन्नकरणग्रामः पुनरेष्यसि ममेदं स्थानम् । विशिष्यते च भोगमात्रैकभूमेस्त्रिदिवात्, निर्वाणैकपदादस्मात्स्थानाच्च तदुभयसाधारणः स लोकः । न हि मुक्तिपरेण भुक्तिपरेण वा सर्वेण लोकेन भाव्यं लोके । मन्दमध्यमादिभेदेन बहुविधाः खल्वधिकारिणः । अत एव गृहाश्रम इव सर्वोपकारीति सर्वैरभिकाम्यते स लोकः । तत्र च भरतकुले शंतनुनाम्ना जनिष्यसे । एषा हैमवती तत्र त्वाममानुषैर्भोगैरनुरञ्जयिष्यति । गम्यतामनुत्तरम् ।' इति त्वामुक्त्वा मां च शास्ति स्म स देवः—'अयि जाह्नवि, बाल्यस्मयेन विस्मृतात्मसमुदाचारा त्वमस्मानेवमवज्ञातवती । अस्ति किं समक्ष जुगुप्स्यकर्माचरणादभ्यधिकतरमवलेहनं प्रतीक्ष्याणाम् । तदिममेव मनुष्यलोके कलत्रवृत्त्या भजस्व कंचित्कालम्' इति । अयमावयोः समागमागमः । श्रूयतां च समयपूर्वकं त्वदुपस्थानस्य प्रजामारणस्य च कारणम् ॥

श्रूयन्ते हि सर्वेषु हव्यकव्यव्यवहारेषु प्रथममुपस्थानीया वसवो नामाष्टौ देवताविशेषाः । ते कदाचित्सुमेरुकटककान्तारेषु कान्तासखाश्चरन्तस्तत्र तृणानि चरन्तीं नन्दिनीं नाम कामधेनोर्नन्दिनीं निशाम्य तद्गुणान्मिथः प्रशशंसुः । तेषु द्यौर्नाम वसुः

स्वदयितामामन्त्र्य शशंस- 'प्रिये पश्य पश्येमां वसिष्ठस्य होमधे-नुम् । अवेह्यमृतादनूनमाहात्म्यमस्याः स्तन्यामृतम् । यत्खलु तेन साध्यम्, तदजरत्वममरत्वं चानेन साध्यतेतराम् । एतत्कृत-मेवास्य मुनेरन्यादृशं महत्त्वम् । इति । तन्निशम्य सा सस्पृहमिद-मर्थयामास—नाथ, अनेन तवोपन्यासेन स्मृतिमुपगता महीवलय-ललामभूता मे प्रियवयस्या **जितवती** नाम महीपते**रुशी-नरस्य** दुहिता । सा हि प्राणेभ्योऽपि प्रियतरा मे । अनन्यसामा-न्यमस्या रूपसौभाग्यं निध्याय, निध्याय च क्षणविनश्वरतां नर-जातेर्यौवनस्य नित्यमुद्विजामि । आत्मन इव सुहृज्जनस्यापि श्रेयश्चिन्तने हि सौहार्दमर्थवद्भवति । तद्यदि मयि प्रीयसे, तदेषा गौर्नीयतां जितवत्या निवेशनम् । अनुभवतु सा तपस्विनी मर्त्य-लोकेऽप्यमर्त्यगुणमजरामरत्वम् । अस्तु चाजर्यमावयोः संगतम् । प्रथमां ममेमामर्थनां कदर्थयितुं नार्हसि' इति । तदनर्थरूपं प्रियायाः संजल्पितमाकर्ण्याम्नायार्थमिवावश्यकत्वेन समर्थयमानेन दयिते, किमिदमसाध्यम् । एष प्रपूरयामि ते मनोरथमित्यभिधाय तद्ग्रहणायोत्थितेन तेन दिवा चोदितास्तद्भ्रातरो वात्यया समुन्मू-लितमूलबन्धेन स्वयं निपतता पादपेन निपात्यमानाः पर्यन्तपाद-पा इव तन्मतमनुरुध्यमानास्तां नन्दिनीं हठादपजह्रुः । वसिष्ठस्तु तदे-षां चेष्टितं समाधिमयेन चक्षुषा समीक्ष्य कुपितस्तान् शशाप—अये वसवः, कथं वराका इव लुण्टाककर्मणि यूयं प्रवृत्ताः स्थ ।

अस्ति वा परस्वहरणात्परतरं पातकं किमपि । उच्चैः खलु गतिमभिलषति सर्वो लोकः । यूयं पुनर्नीचैर्गतिकामा इत्यहो वैषम्यम् । असांप्रतं खल्वेवमसंप्रतिपन्नेन पथा प्रस्थितानां युष्माकं लोकोत्तरे पदेऽवस्थातुम् । अतो जायेध्वं मानुषयोनौ । इति । दुराधर्षायाः तस्या गवि मोघोद्यमतया निर्विद्यमानास्ते तदन्तरे समापतिताममोघपातामिमां तस्य गां निशम्य भृशं विषण्णाः, मुक्त्वा तां सौरभेयीं, तं मुनिमासाद्य प्रसादयामासुः । कारणकोपः स क्षमी क्षणेन शाम्यंस्तानिदमूचे—ननु भोः, न मे वचनमन्यथा भविष्यति । अतो भविष्यत्येव युष्माकं मानुषयोनिप्रवेशः । सप्तापि यूयं भ्रातृच्छन्देन खल्विह प्रवृत्ता न तु स्वच्छन्देन । अतस्तज्जन्मग्रहणमात्रेण कृतनिष्कृतयः सन्तो यूयं यथापुरं स्वं स्वं पदं प्रपद्यध्वम् । एवं किलाकार्यकारिणोऽनुह्यमाणाः स्वयमनर्थव्रातैरभिभूयन्ते । मदीयक्रोधास्त्रस्य परमलक्ष्यमेष द्यौर्मानुषे लोके पुरुषायुषजीवी वर्तताम् । तत्र धर्मादिष्वप्रतिद्वंद्वः स्वयमखण्डितेन चारित्रेण मण्डितश्च सन् जगतः प्रमाणं भविष्यति' इत्यनुगृह्य तान् विससर्ज । अथ साक्षान्मानुषीष्वात्मनो जनिमनर्हां मन्यमानैस्तैर्वसुभिर्जननीभावायाभ्यर्थिताहं तेषु कृपया त्वां पोतं कृत्वा सप्त च तान् पोतान्दुर्जातवारिधेरुदधार्षम् । तदलनुक्रोशवशंवदायां मय्युपक्रोशेन । निर्वक्ष्यति यत्तैः सप्तभिरात्मजैस्तव प्रियं साध्यं, तदशेषमेष सर्वधुरीणोऽष्टमस्तनूजः । अनुमोदिष्यसे-

तरामसाधारण्या त्वमेवास्य भक्त्या । तत्कृतमनुशोचनेन । यौव-नेन सह संभावयिष्यत्येष भवन्तम् । तावन्मयि न्यासस्तिष्ठतु । जननीकार्यं खलु शिशोः पोषणादिकम् । अयमावयोः संबन्धशेषः । एषा भवन्तमापृच्छे । इति ब्रुवाणैव सा देवी सुतमादाय सहसा दिवमुत्पपात ।

इति श्रीभीष्मविजये भीष्मप्रादुर्भावो नाम
प्रथम उच्छ्वासः

---

तथोत्पतितायास्तस्याः संभावनार्थमिव विलीय चिरेण पुनः प्रत्यागतायां चेतनायां स राजा स्वभवनमेव न केवलं सकलं भुव-नमपि शून्यममन्यत । अभिध्यायंस्तानि तानि तस्याश्चेष्टितानि निरूपयंस्तानि तानि भोगस्थानानि, विभावयंश्च नवनवानि तदी-यरतिरहस्यानि पर्याकुलमतिर्हाहेति विचुक्रोश, मुक्तकण्ठं विललाप, मुहुर्निशश्वास, विलुलोठ च भुवि निपत्य भृशमार्तरूपः । आतुर इव दोदूयमानो नष्टद्रविण इव जोघूर्ण्यमानो वह्निपरीत इव तात-प्यमानो मृत्युपरिगृहीत इव मोमुह्यमानोऽसकृद्विपरिवर्तमानाभ्यां दिवानिशाभ्यामिव संज्ञामूर्छाभ्यां समुह्यमानो महान्तं कालमतिवा-हयामास । अथ शनैः शनैस्तमसा विमुच्यमानस्य सर्वत्र संजात-निर्वेदस्य तस्य मनसि निदाघातपात्सुवृष्टिसंपात इव विमर्शपूर्व-

को विवेकः समजायत । ‘अहो किमेवमतिजघन्येन दैन्येन लघु-तां गमितो ममायमात्मा। न खलु परमाणुपरिमाणमपि कार्पण्यकारणमुत्पश्यामि । धिग्धिक् । वृथा वञ्चितोऽस्मि स्त्रीमय्या मायया। यया ममैवमुच्चैःपदात्प्रभ्रंशो भृशमनीशताक्लेशश्च । को नु नाम विवेकी मांसशोणितादिमयं पूतिगन्धि भौतिकं मलभाण्डं स्वादुकारं भुञ्जीत । भुञ्जानोऽपि कथं नु नाम पुनः पुनरपि चर्वितचर्वणान्न विरज्येत । एव खलु मायाविभवो यदशुचितममतिबीभत्समनाद्येयमरोचकं च स्त्रीपिण्डं विजानतोऽपि पदे पदे हृणीयमानस्यापि सति सांनिध्ये चात्मवकल्पनपूर्वकं सहसा तत्र प्रवृत्तिर्निम्नप्रदेशं प्रतीव विभिन्नसेतोः सलिलाशयस्य । एतन्निग्रहान्तो हि सर्वस्य शास्त्रकदम्बस्य तपसः समाधेर्ज्ञानस्य वा परः संपिण्डितो विषयः । सर्वेऽपि शास्त्रेषु वदन्ते विवदन्ते निगमान्तेषु वितपन्ते तीव्रया तपस्यया विजयन्ते च विविधान्यासनानि । न कोऽपि विनयते कामम् । न खलु स्त्रियं विजितवतो निर्वृत्तपाकस्य काष्ठादिभिरिव विद्यते शास्त्रादिभिः कार्यम् । अजितवतश्च पक्तुमक्षमस्येव वृथा भारभूतैस्तैर्नतरामस्ति प्रयोजनम् । अहो विधातुरपि स्वार्थैकपरत्वम् । यदयं निरवद्यान्निवृत्तिधर्मान्निर्मलानि ब्रह्मचर्यादीनि तपांसि च निःश्रेयससाधनतया प्रथमं प्रदर्श्य, पश्चात्स्वसर्गलोपमाशङ्कमानः कामिनीमयेनावरणेन सकलं भुवनतलमन्धयामास । न खलु द्वित्रानपि तथाविधान्विभावयामि पुरुष-

धौरेयान् कृत्स्नेऽपि महीमण्डले, ये योषाश्चागुरां शतधा विनिर्भिद्य विशृङ्खलगतयो गताः । मन्ये मृगेक्षणामय्यो मृगतृष्णायां बम्भ्रम्यमाणस्य मृगधर्मणो मम श्रेयसे सहसा तिरोभावयामास तां प्रतीतिं कृपणशरण्यो हिरण्यगर्भः । अतः प्रयत्नविच्छेद्यस्य प्रतिबन्धस्य दैवयोगेन स्वयं विच्छेदे सत्यपि किमर्थं तदनुबन्धिना पुनः पुनरनुसंधानेन परिविलश्यामहे । कीदृशमात्मनाशमुद्दिश्य परिदेवयामहे' । इति प्रबोधेन दूरमपाकृतकामसंकल्पः प्रजाकार्येषु मनः प्रवर्तयामास ।

ततश्च परिग्रहान्तरविमुख एव प्रजाः पालयन् स भूपालो व्यतीतेषु बहुषु हायनेषु जातुचिदवसरे पुनरप्यनुगङ्गातटमाखेटाय पर्यटन्, तदोवमकस्माद्विक्षुभ्यमाणमिव विष्टभ्यमानमिव पेपीय्यमानमिव केनाप्यादृश्येन भूतेन विलोक्य विस्मयेन तस्य तत्त्वमन्वेषकः किंचिदिवोपासर्पत् । उपसर्पंश्च स सर्वतो व्यापारितदृष्टिः क्वचिदवष्टभ्य कार्मुकयष्टिं मध्येसलिलमवनितल इव सलीलमवस्थाय परितः शरनिकरान्विकीर्य विहरन्तं, हरन्तमात्मनो मनो विनोदेन, स्फुरन्तमोजसा स्वयमेकाकिनमपि बहुपरिवारपरिवृतमिव, गभीरमधुराकारमुदात्तदर्शनमभिनवयौवनलक्ष्मीसमाश्लिष्टवपुषं कमपि कुमारमद्राक्षीत् । तावत्स धन्वी दिव्यमस्त्रं प्रयुञ्जानस्तेन धन्वानमिव तं प्रवाहं प्रदर्शयन् तथा दिवमारोहन्तमिव

महीमण्डलं भुवमवतरन्तमिव विहायसं, परिभ्रमदिव दिक्चक्रवालं, अकस्मादस्तमितमिव विवस्वन्तं स्तम्भितमिव नभस्वन्तं, सर्वतः कुसुमितमिवान्तरिक्षमैन्द्रजालिक इव लीलयैव व्यत्ययेन बहु प्रदर्श्य व्यामोहयन् स्वयं दृश्यरूपोऽपि क्षणाददृश्यतां जगाम। अन्तर्हिते तस्मिन् कवचहरे कुमारे चिन्त्यमाणः स धरित्रीजानिरनेकोल्लेखैर्बहुलैरालिखितान्तरः सन्नन्ते मनस्येवमकरोत्—'किंस्विदस्मिन्नज्ञातकुलशीले कुमारे चिरपरिचिते प्रोष्यागते स्वजन इव सोत्कण्ठं परिद्रवति ममायमात्मा। न खलु स्वतोकमेकं वर्जयित्वा क्वचिदन्यत्राप्येवमव्याजस्नेहानुबन्धः संभवति। या खलु प्रीतिरात्मजन्मनि न सान्यत्र क्वापि संभाव्यते। तन्नूनमेष गाङ्गेयस्तन्मातरि न्यासीकृतो मम चरमस्तनूजः। स इदानीं प्राप्तयौवनो मामुपस्थातुमाशंसते। सञ्जातप्रज्ञानां हि किशोराणां यथा पितृकुले स्वत्वाभिमानेन मनः सजति, न तथा बहूपचारेऽपि मातृवर्गे। सन्ति चैतदनुकूलानि लिङ्गान्यत्र। अस्य वयः किल मदात्मजस्य जननकालेन संवदतेतराम्। न व्यभिचरति च किंचिदप्यस्मद्वर्चसो बिम्बप्रतिबिम्बभावमनन्यसुलभमस्य राजवर्चसम्। इदं स्थानं चानादेयेनानादेयमेव। बाणकार्मुकादि च मृगयाप्रकरणानुकरणेनास्मत्तर्कानुकूलतरं सदस्मान् स्मारयति। अतश्चिरकाङ्क्षितेनाप्यन्तरायोपहतेन सुताश्लेषसुखेन सुखाकरोम्यात्मानं' इति पर्यवसितात्मा 'जाये जाह्नवि, देहि मे सूनुं' इति तामापगामर्थयामास।

अथ व्यतीतेषु पञ्चषेषु निमिषेषु, निदाघकरतप्तस्य जगतस्तापोपशमनाय कृतविग्रहां कौमुदीमिव विराजमानां, सप्रमाणकलेवरं किरीटकटकादिभिर्बाणतूणीरादिभिः पिप्पलदण्डादिभिश्च व्याख्यायमानराजन्यब्रह्मचारिभावं सब्रह्मचारिणमिव विक्रान्तगतौ हर्यक्षशावकस्य सयूथ्यमिव सुधीरविप्रेक्षिते महोक्षस्य सगोत्रमिव स्थिरप्रकृतितायां गोत्राधिपस्य सगर्भ्यमिव गभीरतायामकूपारस्य आजानुलम्बपीवरभुजायुगलं प्रभिद्यमानकरटस्थलीकं करिकलभमिव विंशतिवर्षदेशीयं कमपि कुमारं दक्षिणेन करेण गृहीत्वा स्यन्दनमभिस्यन्दमानां कामपि कामिनीमवेक्ष्य स क्षोणीपतिः परिचितचरीमप्यप्रतिपद्यमानः प्रस्तुतानुगुण्येनाप्यस्फुरितचर्चस्तद्रूपादिना प्रधर्षितात्मा सवितर्कं निध्यायन्नास्त।

अथ नेदीयस्या तया देव्या जात, वन्दस्व गुरुमित्युक्तः स युवा 'तात, अभिवादये भवन्तं वैयाघ्रपद्यो देवव्रतशर्माहं' इति दक्षिणेन पाणिना दक्षिणं पादं सव्येन सव्यं च गृह्णन्नष्टभिरङ्गैर्भुवं स्पृशन्दण्डवन्नीचैः प्रणनाम। तावदवगतार्थे 'एह्येहि वत्स, दिष्ट्या समाप्यायिते मे श्रवसी सुदुर्लभश्रवणेन तातशब्देन। दिष्ट्या पुनः प्रतिष्ठापितोऽस्मि त्वयास्मिन् जीवलोके बहुपात्पादप इवावरोहवृक्षकेण। दिष्ट्या हस्तावलम्बदानेनानुकम्पिताः पतनभयाकम्पिताः पितरः' इत्यादि प्रेमानुरूपमालप्य दोर्भ्यां दृढ

परिष्वज्य चिराय मुताश्लेषरसज्ञे राज्ञि, सा देवी तमाभाष्यात्रभाषे 'राजन् भरतकुलोत्तंस, अपि स्मरसि समयेन संगताया मे, मयि न्यासीकृतस्यास्य तवात्मजस्य वा। अयं तव सूनुरधीती सर्वेषु शास्त्रेषु शस्त्रेषु च। भगवन्तौ वसिष्ठजामदग्न्यावस्य तत्र विनेतारावभूताम्। यच्च यावच्च वा पुरुषेण वेदितुं शक्यमस्मिन् लोके वेत्त्येव तदशेषमेषः। न चास्य ज्ञानं संशयविपर्यासादिदोषेणेषदपि दूषितम्। परिनिष्ठितबुद्धिर्हि सर्वत्र। पावकिः शान्तनवश्चेति द्वावपि गाङ्गेयौ वीरपरिगणनायामेकरेखाधिरोहिणाविति मे मतम्। प्रथमश्च गुरुभक्तिमताम्। खलु वा बहुकथा। ज्ञास्यसि त्वमेव समयेन। तदङ्गीक्रियतां भवदुपस्थाने पर्युत्सुकोऽयं वत्सः' इति तद्गुणकीर्तनपूर्वकं तमौरसं वसुः करेऽर्पयित्वा 'जात देवव्रत, एष कुरुवीरस्ते पिता राजा शंतनुः। भजस्वैनम्। न खलु कृतबुद्धीनां समुपासितवृद्धानां श्रद्धावतां च प्रथमस्य तवास्त्युपदेष्टव्यम्। तथाप्यवश्य गुरुभिरनुशासनीयो बालक इति कृत्वानुशिष्यसे। साधारणमेव देहसंयोगवियोगादि सुखदुःखादि च मानुषाणां पशुपक्षिकीटसरीसृपादीनां च। न तत्राणुमात्रोऽपि विद्यते तरतमभावः। येन खलु देहेन देही देहवान् भवति तमेव निकृष्टतममपि बहुमन्यते देहं, न तूत्कृष्टतममप्यन्यदीयम्। यथैवाहारनिद्रादि कामादि च मनुष्याणां तथैव पश्वादीनां च। अतस्तन्मन्दयति किल भोगातिरेको द्विपदामिति संजल्पितम्। अतिरिच्यते तु

धर्मेण मानुषी जातिस्तिर्यग्भ्य इव देवेभ्यश्च। न च सुलभमीदृशं जन्म। दैवयोगेन कदाचिदेव लभ्यते। अतीव कृच्छ्रोपनतेन जलबुद्बुदवत्क्षणविनश्वरेणापि सर्वार्थदोहिना तेन देहेन स्वार्थभूतं धर्मदोहं दोग्धुमकृतत्वरस्य केवलं विषयविक्षेपविक्षिप्यमाणायुषः पुरुषपशोः किमस्ति ततः परतरं दुष्कृतम्। अस्ति वा तस्य श्रेयःसिद्धिं प्रति पुनः प्रतीक्षणद्वारम्। तद्वत्स, सुदुर्लभां मानुषीं तनुमुपगतवता पुंसा सर्वदा सर्वथा च धर्माचरणैकतानेन वर्तितव्यम्। किं बहुना। धर्मसारो हि पुरुषः। स च धर्मः सत्य एव सुप्रतिष्ठितो भवति। सत्यं च धर्म एव सुप्रतिष्ठितम्। सत्यधर्मौ हि परस्परमाश्रयाश्रयिभावेन धर्मधर्मिभावेन च सुसंश्लिष्टौ सन्तौ पुरुषं परात्परं पदं नयतः। अतस्तौ मा हासीः। न त्वां श्रेयो हास्यति' इति पुत्राय मतिमुदीर्य पश्यतोरेव तयोः पितापुत्रयोः सहसान्तर्धिमगात्। नष्टद्रव्यलाभेनेव तेन पुत्रलाभेनामन्दानन्दभरितो नरपतिस्तेन सह स्वपुरं हस्तिनामासाद्य तत्र तं यौवराज्येऽभ्यषिञ्चत्। अभिषिक्तस्य तस्यास्खलितेन गतेन धर्मवर्त्मनि, अकुण्ठितेन पाण्डित्येन दण्डनीतौ, निराबाधेन बोधेन द्वैधेषु, निरङ्कुशप्रसरेण पुरुषकारेण संगरेषु, प्रत्ययितः स प्रजेश्वरः क्रमेण तमात्मजं कार्त्स्न्येन प्रजाकार्येषु प्रतिभुवं विधाय स्वयं गृहाश्रम एव विशश्राम।

तथाधिकृतः स कुरुकुमारः प्रथमं सर्वाः प्रकृतीर्मेलयित्वा ता इदमुवाच—भो लोकाः, सर्वेऽपि यूयं सुमेधसः सुशीलाश्चेति निर्विशयमेतत्। तथापि धर्मोऽयमधिकृतानां यत्स्वमताविष्करणपूर्वकं धर्मे व्यवस्थापनम्। अतः श्रूयताम्। पुरा किल प्रजासर्गोद्यतः प्रजापतिः प्रथमं देवतावर्गं सृजन्नाश्रवेणोत्कटकामेन च तेन सर्गेणापरितुष्यन्, द्वितीयं तिर्यक्स्रोतोवर्गमसृजत्। विकलकरणेन करुणार्पणार्हेण तेन वर्गेण लज्जित इव स्वात्मनि पुनः समाधिमास्थाय तार्तीयीकं मानुषवर्गमस्राक्षीत्। सुकल्पेनाधिकृतेन च भोगापवर्गयोस्तेन सर्गेणात्मनः सर्गमवन्ध्यपरिश्रमं सुप्रतिष्ठितं च समर्थयमानस्तत्र वात्सल्येन प्रसितमतिरनायासेन सिद्धिसाधनं धर्मं विनिर्माय मानुषैकस्वभूतं चक्रे। महान्तममुमुपकारमविस्मृत्यापरस्परात्तमाराधयन्ति श्रेयस्कामाः सुकृतिनः कृतिनः नास्ति च स्वधर्माचरणादृते पृथग्भूतं किमपि तदाराधनम्। एवं सुलभेऽपि विभोः प्रीणने, स्ववशगेऽपि सुदुर्लभे मानुषभावे, न जानीमहे किमर्थमनर्थावहेन विनिपातपथेन प्रधावन्ति चेतनावन्तोऽपि जन्तवः। भो भो विषयवासिनः, मा भूद्भवतां कदापि कथमपि सदाचारपद्धतेः प्रच्युतिः। मा च प्रसाङ्क्षीदधर्मे परधर्मे वा मनागपि मनो भवताम्। यथैवंवृत्तिः परोक्षनियामकस्येश्वरस्य प्रीतये भवति, तथैव प्रत्यक्षशासितुर्महीपालस्यापि। स्वार्थहानिकरमपि कर्म दण्डयितुरनुरोधायानुविधेयं भवति। किं पुनः स्वार्थैकान्त-

फलकं, विशेषतश्चोभयेश्वरप्रसादसाधनम्।' इति ताननुशशास। शशास च यथान्यायम्। अथ सर्वात्मना जनेभ्यो हितमन्विच्छति, हितं च धर्मेणोपपादयति, धर्मं च सत्येन योजयति, व्यसनानुपहतचेतसि, वायाविव सततप्रवृत्ते सर्वान्तरदर्शिनि च, वासव इव कामवर्षिणि दुराधर्षे च, वैवस्वत इव समवर्तिनि दण्डोद्यतकरे च तस्मिन् कुमारे युवराजधुरां दधाने, तीक्ष्णसृणिपाणिना सादिना नुद्यमानो मतङ्गज इव सरणिं नातिचक्राम स्वयमपकृष्टोऽपि।

एवमधर्मकथायाः सर्वतो व्यावर्तितेषु धर्माविरुद्धाभ्यामर्थकामाभ्यामनवरतमुपलाल्यमानतया स्वयमक्लेशेनैव धर्मैकप्रवणेषु जनेषु, तिग्मतेजसि तस्मिन्ननवकाशतया भेददण्डयोः, सामदानाभ्यामुपतस्थिवद्भिः सामन्तमहीपतिभिरुपह्रियमाणेन विविधेन धनराशिना धनदागारस्पर्धिषु कोशागारेषु, सर्वतः प्रशान्तसंप्रहारव्याहारेषु राष्ट्रेषु, उपर्युपरि लोकोपकारचिन्तानुविद्धस्वान्तेनात्मजेनापादितस्वास्थ्यः स पार्थिवः शंतनुर्जातुचिदवसरे जह्नुकन्यामिव कलिन्दकन्यामपि जायार्थं वरीतुकाम इव मृगयार्थी यमुनावनमगाहत। तत्र कुतश्चिदापतितमनाघ्रातपूर्वं घ्राणतर्पणं गन्धमाघ्राय हर्षितो रोमसु, विस्मयेन तृषित इव तन्मूलवस्तुनो रसपिपासया पर्युत्सुकोऽसौ द्वितीयेन परीवाहेणेव प्रवहता तद्गन्धग्रहेण कृतसाचिव्यस्तद्बोधोऽनुरोधेन विवक्षितं स्थलमभिपेदे। तत्र च कूलो-

पकण्ठे तरिमवष्टभ्य क्षेपणीप्रक्षेपणकृतक्षणां विनाप्याहार्यशोभया साधारणैराकल्पैरपि विशेषतः शोभमानां गाढमाश्लिष्टामपि यौवनेनानाविष्टाङ्गीमनङ्गचेष्टाविक्रियाभिः, पाथसस्तितीर्षया समापतद्भिः पान्थैः सममातरव्यवहारव्यग्रां धीवरजातीयां तदामोदप्रभवभुवमष्टादशवर्षदेशीयां कामपि तरुणीमवलोकयामास । तत्क्षणं पुनः शरं संधाय शरव्यं करोति चिरप्रसुप्ते कुसुमशरे, स नरपतिस्तत्परिसरमभिसरन्नेवमचिन्तयत्—किमियं दाशकन्यकास्य निर्हारिणो गन्धस्य योनिः । अन्यदेव मया चिन्तितं, अन्यदेवेद वर्तते । क्व कल्पपादपैरपि सुदुरापोऽयं गन्धः, क्व च पुनरियं मत्स्यघातिनो दुहिता । एवं विषमघटनेन वाच्यतामनुभवति विधाता । अथवा नैतदेवम् । अनर्हेभ्यः पदार्थेभ्यो महार्घाणि द्रव्याणि समुत्पादयन्नात्मनोऽचिन्त्यशक्तित्वं प्रथयति स प्रभुः सर्गकर्ता । अपोह्यते च प्रकृतेरपकर्षदोषो महितेन जनिकर्त्रा । तदलं रत्नदीपवदम्लानच्छाये चन्द्रशालासु सांप्रयोगिके चास्मिन् कन्यारत्ने योनिनिकर्षाशङ्कया । स्मरन्ति च स्त्रीरत्नस्य दुष्कुलादप्युपादेयताम् । अकिंचित्करा हि जातिः । वयं च रत्नहारिणः । तदधुनैव साधयामि साधीयसीं सिद्धिं' इति । तस्यां तु तं नदीतितीर्षया समापतन्तं पान्थं मत्वा 'आर्य, शीघ्रायस्व । पुरा निम्लोचति भगवानहर्पतिः । तावदेव त्वां तारयामि' इत्याह्वयन्त्याम्, स्वाशयानुकूलेन ध्वनिना कुतूहलितः स निमित्तज्ञः तारय तारयेति तद्वचनमनु-

वदन् समीपमुपगम्य तस्या नामादिकमपृच्छत् । तत्प्रश्नभङ्ग्यैव किंचिदुल्लिखिताकूता सा पोतवहदुहिता समुन्मिषितेनानिमिषकेतनेन निकेतनीकृतस्वान्ता मन्दाक्षमन्दाक्षरमधोमुखी व्याचचक्षे—आर्य, **सत्यवती**ति पितृकृतेन नाम्ना मामाह्वयन्ति । पूर्वं किल मत्स्यवदस्य शरीरस्य गन्धो बभूव । ततो मां **मत्स्यगन्धे**ति संजजल्पुः । अथ स्वकुलधर्मेऽत्र पोतकर्मणि पित्रा नियुक्ता साहं जातु ममेमां तरिमारूढस्य भगवतः पराशरमुनेरनुग्रहेण तस्य गन्धस्य स्थाने आदिष्टेदंगन्धास्मि । ततो मां **गन्धवती**ति **योजनगन्धे**ति च व्याहरन्ति । विपरिणमते ह्यवस्थाविपरिणामेन रूपधेयमिव नामधेयमपि । मम पितासौ दाशराजो नातिदवीयस्यस्मिन् पक्कणावसथे निवसति । एतावान्मे वृत्तान्तः । एवं विस्रम्भालापजनितं कुतूहलं शालीनतामवस्रंसयद्बलाच्चोदयतीमं जनं गभीराकारस्यापि सौलभ्यगुणशोभिनोऽत्रभवत उदन्तविज्ञानाय । यद्यनवज्ञेयप्रणयमिमं जनं मन्यते मिश्रो यदि च बहुमन्यते साप्तपदीनं सख्यमित्येतत्, तदा व्यपोहयतु ममेमामुत्कण्ठाम् । स च तां प्रत्यूचे 'अयि योजनगन्धे, कथमवज्ञेयो भवत्याः प्रणयः । अतः शृणु योऽहं यच्च मे वृत्तमिति । अपि शृणोषि निखिलस्यास्य जनपदस्य नियन्तारं शंतनुं नाम कौरवेन्द्रम् । विदांकुरु तमेवास्मान् । ते वयमधुना तव शरीरजं गन्धमनुस्थितेन शरीरजेन गन्धिताः स्मः । दर्पयति च तं कंदर्पं परैरनाघ्रातता

प्रसादेन योजनगन्धा सुजाता। तस्मात्कुलशीलसंपन्नामेनां भवानेव वोढुमर्हः । गुणवते वराय कन्या प्रतिपादनीयेति सर्वलोकसाधारणोऽयं व्यवहारः । लोकोत्तरगुणे महाराजे वरत्वेनोपगते, कथं ततः परमपि परामर्शः । किं तु । समयेन कन्यां भवते वितरीतुमाशंसे । यदि तमभ्युपैति देवः, तर्हीदानीमेव प्रवर्ततां पाणिग्रहः । 'कथ्यतां ते समयः। तमवकर्ण्य यथार्हं निर्णेतास्महे' इत्युत्तरयति राजनि. स पुनर्विज्ञापयामास—' देव, किमन्यत् । भवतः परं भवता सत्यवत्यामुत्पाद्यमानस्तनूजो भवतो राज्येऽभिषेक्तव्यः। एष मे भवता प्रतिपादनीयो वरः' इति । दुष्करमिदमित्युत्तिष्ठति क्षितिपतौ, यथा रोचते महाराजायेत्यनूत्थितः स दाशः 'मर्षयतु महाराजो ममेममपत्यस्नेहकृतं दुर्ग्रहं' इति शुष्केणानुनयवादेन तं प्रस्थापयामास ।

ततः प्रतिनिवृत्तः स महीपतिः 'कथं प्रत्याख्यातोऽस्मि दाशेन । अहो अस्य स्वार्थैकपरत्वम् । अथवा प्रायेण लोकः स्वार्थपर एव । ततः किमस्यैकस्योपालम्भेन । सर्वत्र लाघवास्पदं खल्वर्थिता नाम । ये खलु स्वयं निष्किंचना अपि देहिपदं न प्रयुञ्जते, त एव देहिपदप्रयोगार्हाः । सिद्धार्थोऽपि ह्यर्थी सिद्धार्थ एव । अतो हि याचितं मृतजीवनमजगर्हन्नर्हत्तमाः । अहो योजनगन्धाया गन्धः । दृष्टा हि बह्व्यो रूपवत्यो युवतयः । न त्वेकाप्येवं

गन्धवंती । कथं ललनासर्गललामभूतामेतां योषितं विना मम क्षणदाः क्षणदा भविष्यन्ति । कथं च वा गुणोत्तुङ्गं गाङ्गेयं ज्येष्ठं युवराजपदभाजमात्मजं पुनः कान्ताकृतेऽभागिनमराजानं च कुर्याम् । अद्यापि न निवर्तते सत्यवत्याः सकाशान्मे मानसम् । न च प्रवर्तते कैवर्तसमयगर्ते निपतितुम् । महात्मा खल्वयं देवव्रतः । यदि कदाचिदस्य कर्णपथमवतरेदयमुदन्तः, तदास्मद्गौरवेण स्वयमेव राज्यसुखविमुखः संपद्येत । अन्याय्यं कौलीनकरं च तत् । तन्मनोमय एव क्षीयतां ममायं मनसिजामयः ।' इति विचिन्तयन् स्वं पुरमियाय । तत्र बलवदन्तः समिद्धेन कुकूलाग्निनेव कामाग्निना दन्दह्यमानमानसः सततप्रजागरतया क्षणमप्यलब्धसंवेशसुखः सर्वत्र स्वयमरतिपरिगृहीततया स्नानभोजनादिष्वपि मन्दादरश्चिन्तासंदानितस्वान्ततया गोत्रादिष्वपि पदे पदे प्रस्खलन्, निरुत्साहतया आवश्यकेषु राष्ट्रकार्येष्वपि नातिप्रीतिमान् निदाघपल्वलेनेव क्रमेण कृशिमानमुपगच्छता हैमनकमलाकरेणेव शोच्यदर्शनेन च गात्रेण लक्षितः स क्ष्मापतिर्नातिचिरेण कालेनान्यादृश इव समदृश्यत ।

अथ तदवस्थं तं पितरं विलोक्य शङ्कितो गाङ्गेयो व्यचिन्तयत्—कथं महाराजो बलवदस्वस्थ इव लक्ष्यते । प्रणतसामन्तचक्रस्य नित्यमुपचीयमानकोशसंचयस्य वशंवदप्रकृतेर्निरीते-

कसकलराष्ट्रस्य वृत्तवतो वृत्तेन विनयेन च संपन्ने मयि कृतस्नेहस्य चास्य नास्त्येव चिन्ताहेतुः । येनैव शोच्यावस्थता स्यात् । अस्ति च बलवदस्य मनसि किमपि दुःखनिदानम् । तत्कुतो वा न मयि निवेदयति मे गुरुः । हा तात, कथं द्वितीयहृदये मयि स्वाशयमाविष्कर्तुमाशङ्किष्ठाः । यदि पितापुत्रयोरेव मिथो विस्रम्भभङ्गो भवेत्, तदा नास्त्येव विश्वासपदस्याश्वासपदम् । हा किं करोमि । त्वदर्थमेव ममेदं जीवितम् । तादृशे मय्यकथनीयमिति ममैव दौर्भाग्यमेतत् । अथ वा नैतदेवम् । मयि वात्सल्येन हि स्वाशयं न व्यावृणोन्मे गुरुः । स्वयमेव गुरोर्भावमुन्नीय प्रियमाचरन् हि सूनुरुत्तमो भवति। तन्नियोगेनाचरंस्तु मध्यम एव । इतरे तूच्चारप्रायाः । सुपुत्रपरिगणनासु प्रथमगणनार्हं मां चिकीर्षति मे तातः । अहो मय्यस्य गौरवम् । कथं तत्परिपालयामि । कथमत्र व्याप्रियतां मे प्रज्ञोन्मेषः । अथ वा । एष पृच्छामि तातस्य प्रियतरं वृद्धामात्यम । अस्मिन् ह्यादर्श इव सर्वात्मना प्रतिफलति मे विभोर्हृदयम् ।' इति निश्चित्य 'अपि जानीषे राज्ञो वैमनस्यनिमित्तम्' इति तमन्वयुङ्क्त । निर्ज्ञातनिमित्तोऽपि स भूपतेर्मतमनुसरन्नवादीत् 'केतकीगन्धेन प्रसितस्त्वा कण्टकाक्रान्तेति विमुञ्चन्नपि न विरमतीत्यश्रौषम् । नान्यदहं जाने ' इति । तदाकर्ण्य सः 'किमिदं वार्धकानुगुणमसंबद्धप्रलपितम्' इति तदुत्तरं तिरस्कुर्वन्, क्षणेन स्फुरितार्थो व्यचिन्तयत् 'स्पष्टमिदानीं सप्रतिव-

न्धे कस्मिन्नपि भोग्यवस्तुनि सस्पृहो महाराज इति। अथ मत्तो गोप्तव्यताया न निमित्तमुत्पश्यामि। अत एवायमेवं प्रहेलिकया प्रत्युत्तरयामास। तिष्ठत्वेष तपस्वी। अन्तर्वेशिको मे चक्षुर्भविष्यति। न वयं तातस्य रहस्योद्घाटनाय प्रवृत्ताः, येनाधर्म्यता स्यात्, हृदयाच्छल्योद्धरणाय खलूद्यताः स्मः। आवश्यकेऽत्र किमन्याय्यम्' इति राज्ञः शरीरपरिचारकमाहूय पप्रच्छ 'अयि भद्र, अप्यस्त्याह्निकादिषु विशेषो महाराजस्य' इति। तस्मिंस्तु 'कुमार, प्रत्यक्षीकृते हि गन्धवद्द्रव्ये सपद्येवोन्मनायते देवः। विमनायते च पदे पदे सत्यपदेन गोत्रेषु स्खलन्। अयमेवात्र विशेषः।' इति निवेदयति, स मनीषी गन्धवत्सत्यपदोपक्रमकं किमपि तातस्य प्रेष्ठम्। तच्च केनापि प्रतिबन्धेन दुरापं भवतीत्येतावदवगतम्। अपर्याप्तं खल्वेतावन्मात्रविज्ञानमर्थोपादानाय। अतः पितरमेव पृच्छामि। अयमेव साधीयानुपायः। इति निश्चयं कृत्वा राजानं प्रणम्य विज्ञापयामास।

तात, मुखवैवर्ण्यादिना भवन्तमन्तर्गतशोकशङ्कुमिव लक्षयामि। संपूर्णमानुषानन्दस्य भवतो न खलु निभालयामि सुसूक्ष्ममपि चिन्तानिमित्तम्। अथास्ति किमपि, तदावेदयितुमर्हसि। पर्याप्तोऽस्मि तव प्रियमाहर्तुम्। न हि धनुर्धरस्य मम पुरः पुरंदरोऽपि प्रत्यवस्थानेनावस्थातुमीष्टे। विध्यतितरां मे मर्माणि

तवैवं दशा। अतः प्रसत्तुमर्हसि' इति। राजा त्वन्तश्चिन्तापरो बभू-व। धिग्धिक्कंदर्पहतकम्। धूर्तेन येन वयं धूर्ताः भवन्तः, एवमुन्नतमतेरात्मजादप्यात्मानं गोपायितुं प्रयतामहे। आवितार्थोऽयं महात्मा दाशकन्योपानयनाय स्वसुखविमुखः संपद्येत। अनिवेदनमन्यथानिवेदनं चास्य मनसि समुद्दीपयेदेव शोकवह्निम्। अतः किं करोमि। अथ वा इत्थमालपामि। यदि तमालापं प्लवं कृत्वा बुद्धिनैपुणेन मन्मनोरथपारमनुप्लवते। कामं प्लवताम्। अन्यथा विरमतु' इति मनसिकृत्य पुत्रमूचे—'वत्स, स्वपुत्रान्व्यापादयन्त्यास्तत्र मातुर्हैमवत्याः कथमपि त्वमेको रक्षितोऽसि। एकपुत्रं चापुत्रमित्येव व्यपदिशन्ति। त्वं च वीरगोष्ठीषु प्रष्ठोऽसि। क्षिपसि चान्यान्वीरानजाविकयोगक्षेमेण। कामं विशुद्धस्वभावेनापि याचि परुषेण पुरुषेण वैरायन्ते सर्वे लोकाः। विद्धि नियन्तव्येषु प्रथमं वागिन्द्रियम्। तत्त्वयि नास्त्येव। प्रायेण त्वादृशां वीरमानिनां वीरशय्याशयनमन्ततः समापतति। यदि कदाचिद्दुर्विधेन विधिना तव किमप्यभद्रमापतेत्, ततः का गतिरस्मत्कुलस्येति व्याकुलोऽस्मि। न च त्वदुपरोधेन पुनर्दारसंग्रहायाग्रहो मे मनसः। एव मे शोकहेतुः 'इति।

श्रुत्वा तद्राज्ञो वचनं बहिर्निर्गतो गालोडयमानः स कुशाग्रीयमतिः पुनरचिन्तयत्-किमनेन वाक्यसमुदायेनावगतोऽर्थः। येन

तदनुगुणं साधनमुपादाय साध्याय प्रवर्तेमहि । अथ वा व्यज्यते हि पुनर्दारप्रसङ्गमुत्पाद्य पर्युदासेन, स्त्रीनिमित्तोऽस्यानुताप इति । एषा खल्वग्राम्यवचनालापभङ्गिर्विदग्धालापकुशलानाम् । कथमुपरितनमन्वेषणं भवतु । एष तातस्य संवेशनिवेशनेऽधिकृतमुपशायाध्यक्षं प्रक्ष्यामि । स हि स्वैरालापज्ञो ज्ञास्यति' इति तमामन्त्र्य पप्रच्छ- 'अपि सुखायते क्षपासु क्षमापतिः, उत कृच्छ्रायते किंचित्' इति । तथा पृष्टः स यामिकः प्राञ्जलिर्निवेदयामास युवराज, ये खलु कामयमानानामवस्थाविशेषाः प्रजागरादयः, ते प्रायेण महाराजमुपतापयन्ति । न जाने तत्कुतस्त्यमिति । आश्चर्यमिव स्वपन्देवः 'प्रिये सत्यवति, इत्युत्स्वप्नायमानः प्रबुध्यते । शेषे कुमारः प्रमाणम्' इति ।

सत्यवतीति कापि कामिनी महाराजस्य मानसमध्यास्ते । तां स मत्तो गोप्यां मन्यते । अस्ति च तदुपादाने कोऽप्यन्तरायः । इत्येतदधिगतम् । एष तां कथमप्युपहरामि मे गुरवे । ननु श्रूयते ह्यस्मत्पूर्वपुरुषस्य पुरोरद्भुतं चरितम् । यः स्वयं युवतमोऽपि पुनर्भोगतृष्णामवगत्य स्वपितुर्ययातेः, तद्वार्धकविनिमयेन स्वं यौवनं तस्मै वितितार । कथमस्याः सत्यवत्या अभिजनादिकमवगच्छेयम् । अथ वा नैतद् दुरवगमम् । भविष्यत्येतत्समस्याकविरस्य सारथिः' इति तमाकार्य, भद्र, ब्रूहि तत्त्वतः सत्यवतीवृत्तमिति पृच्छति स्म ।

सोऽपि व्यजिज्ञपत्—'आयुष्मन् अस्त्युपयमुनातटं पक्कणावासः। तत्र सत्यवती नाम कापि दाशकन्या वर्तते। तस्याः शरीरसौगन्ध्यमायोजनमावाति। तस्यामासक्तचित्तो देवस्तत्पितुः शुल्कं दुष्करं मत्वा प्रतिनिवृत्तः' इति।

तदाकर्ण्य कृतोत्साहः स शान्तनवो बहुभिः क्षत्रियैः सह सहसा तद्दाशनिवेशनं प्रविवेश। स तु लोकपालमण्डलोपमं तं मण्डलेश्वरमण्डलमवलोक्य कृतसंभ्रमस्तानासनादिभिर्यथार्हमर्हयन्, निश्चिततदभ्यागमार्थो हर्षशोकभयविस्मयैः किलिकिञ्चितात्मा तं राजपुत्रमुवाच—अपि स्वागतं सपरिवारस्य युवराजस्य। ये खलु वाग्गुम्भा गुणभूषणानां भूषायन्ते, तैरेवाभूष्यमपि जनं बुभूषयिषन्ति कवयः। अतः खलु स्तुतिवादं नाद्रियन्ते विशेषज्ञाः। अनभिज्ञाश्च वयं श्रवणमात्रसुभगानामतिशयोक्तीनाम्। अतो भूतार्थवादपराणां केषांचिदेषां मम वचसामवसरं दातुमभ्यर्थये। यदर्थं प्रजाः पूर्वमात्मनः कमपि नेतारमचकमन्त, अचकलन्त स्वलाभेषु षष्ठांशभागिनं, अजगणन्त च विधिनियोगमिवानतिलङ्घनीयं तस्य शासनम्, तदिदानीमेव निरपादि। प्रतिपूरुषं मतिभेदेन बहूनामैकमत्यासंभवात् वैमत्येनानर्थो मा भूदिति खलु तदैकमत्यसंपिपादयिषया, अवतितारयिषया च सन्मार्गे, राजाधिक्रियते क्रियते च स्वप्रयत्नार्जितेऽपि भागी। स

विस्मृत्य स्वाधिकारकारणम्, केवलमुत्तमर्ण इवाधमर्णं भृशमुपरुध्य बलिं भुञ्जानः, प्रजा न भुनक्ति यदि, किं ब्रूमस्तद्विषयवासिनां दौर्भाग्यविलसितम्। सौराज्यसुखितानामस्माकं तु नास्ति तादृशः कोऽप्युपसर्गः। विशेषतस्त्वयि युवराजधुरामधिरूढे। धर्मपरोऽसि, सत्यसंधोऽसि, प्रजावत्सलोऽसि, कृपणशरण्योऽसि, महावीरोऽसीत्यादि बहु वर्णयितुं न मे वागुन्मेषः। असांप्रतं च बह्वालापो महत्समाजे। तदिदं संगृह्यते। कामं न्यायवृत्ता एव भवतः पूर्वे राजानः। तेषु गुरुतरं गौरवं दधानेन तदध्वानमनुसरतापि भवता ते लाघवं गमिता इति महदिदमद्भुतम्। तैः खलु प्रयत्नेनाशिष्टाः शिष्टाः कृताः। त्वया तु शिष्टा एव शिष्टाः कृताः। तैर्हि नित्यमीप्सितप्रदानेनार्थिनां दौर्गत्यदुःखं दूरीकृतम्। राष्ट्रे सर्वसमृद्धिं संपादयता भवता त्वर्थयितुरभावेनार्थित्वमेवापाकृतम्। ईदृशस्य भवतः समागमलाभेन वयं धन्या इति त्वत्यल्पमिदं वचनम्। सरलस्वभावा यूयमिति लघूकरणम्। सुजनपक्षपातिन इत्यात्मप्रशंसा। कार्येण प्रस्थिता इति स्वार्थपरत्वपिशुनम्। औदासीन्यं चोद्धृत्य प्रकाशकम्। तथा नियुज्यतामेव इति संदेशवचनम्। को भवतोऽभिलाष इत्यधिकारधोरणी। कर्मकरस्तवाहमिति ग्राम्योक्तिः। कामं क्रियतामीप्सितमिति प्रभुशक्तिदर्शनम्। वयं च नातिकोविदा नागरव्याहारेषु। यदत्र कर्तव्यं, तत्र युवराजः प्रमाणमित्युक्त्वोपरराम।

देवव्रतस्तु तद्वचनमभिनन्दन् पप्रच्छ 'भो दाशपते, न जानीमो नागरिकाणामितोऽप्यधिकां वाचोयुक्तिम्। अतस्तिष्ठतु। प्रागपि धन्य एव भवान्, यस्य तव गृहे लक्ष्मीपतिभिः स्पृहणीयलक्ष्मीका लक्ष्मीः कन्यारूपेण खेलति। वयं हि तां तव कन्यां योजनगन्धामस्मत्पितुर्महाराजस्य कृते वरितुमागताः। तथा स्प्रष्टुमर्हसि' इति। भोः कुमार, तत्रभवता महाराजेनैवोपक्षिप्तमिदं वीजं केनापि प्रतिबन्धेन न प्रोहतीति प्रत्युत्तरयति तस्मिन्, स पुनरुवाच—ननु भोः, कथ्यतां प्रथमम्, अपि वरोऽभिमतो न वा सानुबन्धस्य भवतस्तव कन्यायाश्चेति।

तदाकर्ण्य सोपसान्त्वनं स प्रोवाच 'भो युवराज, किमेवमुच्यते। यस्य कुलस्य प्रशंसायां कूटस्थपदेन व्याहरणीयो राजा सुधादीधितिः। रूपस्य तु साक्षित्वेनोदाहरणीया स्वयमुपतस्थुषी भवजननी देवी दिव्यधुनी। गुणस्य तु पितरीव कृतप्रत्ययाः प्रकृतयः प्रवचनीयाः। वीर्यस्य तु वन्दिपदावलम्बिनः सामन्तमहीपतयः स्थेयाः। भाग्यस्य तु नित्यमेकपत्नीव्रतधरा सागरमेखला गेया। तादृशे जगतीपतौ वरत्वेन स्वयमुपस्थिते यस्य मनो न प्रीयते, किमस्य मृत्पिण्डसपिण्डस्य व्यवहारेण। तं प्रदातृत्वेन प्रतिपालयन्ती कन्यकापि कदर्यशरण्या श्रीरिव शोचनीयैव। मा मां तथाविधेषु परिगणयितुमर्हति कुमारः। सुदुश्चरेण तपसा

विना सुदुर्लभो ह्येतादृशो वरः । अतो नास्ति तादृशाशङ्कागन्धोऽप्यस्माकम्' इति । एवं सावशेषवचने विरमति तस्मिन्, प्राह कुमारः 'तर्हि कीदृशी तथाशङ्का । निःशङ्कमभिधीयताम् । सज्जा एव वयं तत्रेप्सितेन शुल्केन कन्यां ग्रहीतुम्' इति तमुपच्छन्दयन्, कथं त्वय्येव निवेद्यताम् । तत्प्रसीदतु कुमारः । कृतमुपरोधेनेति सवेपथु नाथमानं तमाश्वासयन्नूचे-भोः कैवर्तपते, किमेवमाकुलीभवसि । ननु भवता सह संबन्धकाङ्क्षिणो वयम् । मिथो विस्रम्भालापकुतूहलिनो हि संबन्धिनः । तन्मास्तु प्रहर्षसमये विषादः । न खलु भवतो मनःपीडया कन्यां हर्तुमुद्यताः, येन तवैवमुद्वेगः स्यात् । अपि तु तव प्रियमुपहृत्यैव प्रार्थितं साधयिष्यामः । अतो निर्भयमभिधीयताम् । स्वतन्त्रा ह्यप्रदानं कन्यां प्रति पितरः । कस्तान्नियन्तुमीष्टे । अवश्यं च तदीप्सितेन शुल्केन प्रीणनीया हि कन्याभिलाषिभिस्तद्बन्धवः । अतः किमत्रान्याय्यं नाम । ब्रूहि केन वा पूर्णपात्रेण तव पूर्णता भवति' ।

एवं प्रत्ययितः स दाशः प्राञ्जलिर्निवेदयामास–'युवराज, स्वार्थपरता ह्येवमपराध्यति, नायं जनः । अतो न क्रोद्धुमर्हसि । भवतः पितुरनन्तरं तद्राज्यं तव वैमात्रेयो भ्राता सात्यवतेयो लभताम् । अयमेव मे दुहितुः शुल्कः । अशक्यप्रदानोऽयं वर इति खलु पूर्वं तत्रभवांस्तव पिता प्रत्युदीर्य, अलब्धमनोरथो

रथं निवर्तयामास ' इति । एवं श्राविते तदभीष्टे, हृष्टो देवव्रतः प्रतिशुश्राव—भो दाशपते, मम पितुरनन्तरं सत्यवतीसूनुः पित्र्यं राज्यं लभताम् । मास्तु मे तत्र संबन्धः । एतेन शुल्केन देहि कन्याम् ' इति । तया तस्य प्रतिज्ञया विस्मिताः सदस्याः ' भो भोः, किं विमृशसि । दीयतां राज्ञे सत्यवती' इति त्वरयामासुः । तथापि स्वयमत्वरमाणोऽसौ कन्यापिता पुनरुवाच-महात्मन्, सांप्रतमेवेदं वचनं पुरुवंशावतंसस्य भवतः । न खलु जातुचिदपि रोहणगिरेः काचमणिः समुत्पद्यते । न च सत्यवचसामग्रतःसरस्य भवतो वचसि मनागप्यन्यथाग्रहः । अतो निवृत्ता मम दौहित्रस्य राज्यलाभं प्रति त्वन्निमित्ताशङ्का । तथापि तरलीभवति मे मतिः । तस्माद्विमुच्यतामयं निर्बन्धः । इत्युक्त्वा विरराम ।

ननु भोः, कोऽत्र निर्बन्धः, कश्च वा तरलताहेतुः । अनाकुलमुच्यतां शेषमपि भवतो मतम् । राज्यं भवद्दौहित्रस्यैव न ममेति निर्णितम् । किमपरं शुल्कमपेक्षसे, तदपि प्रदातुं सज्जा एव वयम् । निर्भयमुदीरय' इति सोपलालनं पृच्छति कुमारे, स धीवरः प्राञ्जलिरवादीत् 'राजपुत्र, पुनः पुनर्निर्बध्नासीति कृत्वेदमावेद्यते । अतो मास्तु मयि क्रोधदृष्टिः । प्रतिज्ञातं भवता सत्यवतीपुत्रस्यैव राज्यं न ममेति, तत्तथैव । न तत्र मनागपि विपर्यासः स्यात् । किं त्वेषा प्रतिज्ञा त्वामेवोपरुणद्धि, न तु त्वदात्म-

जानापि। अधिकतरं भेतव्यमेतेभ्यः । यदेते कुमारा मनोजवसाः सन्तो भवानिव वीरगणनासु प्रथमे भवेयुः । न खलु नखरायुधाच्छशकः समुत्पद्यते । राज्यलोभेनोत्थितैस्तैरुपरुद्धस्तपोवनसेवनादृते किं कुर्वीत स तपस्वी मम दौहित्रः । वरं चारुह्यपतनादध एव स्थातुम । मा च वोचथा अहमिव मत्पुत्रा अपि पितृभक्ताः स्युरिति । न कोऽपि लोके गाङ्गेयो देवव्रतो भवितुमर्हति, यः स्वार्थहानेनैवं पितरं पिप्रीणयिषेत् । कथं नु स्वयमुपनतामुपभोगक्षमामक्षतां स्त्रियमिव श्रियं युवतमोऽपि भवानिव प्रत्याचक्षीत । अन्यदेव जगत्, अन्यदेव भवतः शीलम् । पुरः प्रसरन्त्या तयार्थतृष्णया समुह्यमानानेतांस्तव कुमारान् किमियं निरोत्स्यते जरत्तृणोपमा केवलमतिह्यभूता तव प्रतिज्ञा । अतः प्रसीदतु युवराजः ।

शांतनवस्तु तस्याशयं पितुः क्लेशं चावधार्य, अन्यथा कार्यमघटमानं मन्वान इमां गिरं संगिरते स्म–'भो धीवरेश्वर, स्थाने तवेयमाशङ्का । अतः श्रूयतां ममायं संश्रवः सर्वैः सभ्यैर्वृत्तसाक्षिभिर्देवैश्च । अहं हि मम पितुः सत्यवतीपरिणयनकृते यावज्जीवं ब्रह्मचारी भवितुं धृतव्रतोऽस्मि । त्रिः शपामि सत्येन । न मे वचनमन्यथा । नाहं दारसंग्रहं प्रजोत्पादनं वा करिष्यामि, येन मत्पुत्रेभ्यो भयमुत्प्रेक्ष्येत । अतो वीतशङ्कं मम पित्रे स्वां

कन्यां प्रयच्छतु दाशराजः । गे खलु नैष्ठिकानां लोकांस्तपसा जयेयम् । अत्र सर्वेऽपि यूयं साक्षिणः ' इति । एवमाश्रुतव्रतस्तस्य देवव्रतस्य महता कण्ठरवेण मुखरितेषु तद्द्रढीकरणायेव तमनुवदत्सु दिशामुखेषु, विस्मयस्तिमितेषु समवेतेषु जनेषु, 'जय जय महाव्रत, जय जय सत्यव्रत, जय जय देवव्रत, ' इति जयघोषेण दुन्दुभिघोषेण च भुवनमाघोषयन्तः, पुष्पवर्षेण बाष्पवर्षेण च तमभिषिञ्चन्तो निलिम्पाः समवतीर्यप्रभुत्वमम्बरतलात्तं व्रतिनमाभाष्याचचक्षिरे—'भो भोः, क एवं भीष्मं व्रतं कुर्यात् । अतस्त्वं **भीष्मो**ऽसि' इत्यभिधाय बहु प्रशंसन्ति स्म ।

तावदेव सत्यवतीं पुरस्कृत्य कृताञ्जलिस्तिष्ठन् स दाशो भिया ह्रिया च कलिलमतिः सगद्गदमिदमावेदयामास—'भोः, उपस्थितेयं सत्यवती । प्रतिगृह्यतां तव पितुर्जायार्थं' इत्युक्त्वा पुनरुवाच-भो भो भीष्म, कस्तव गुणान्वर्णयितुमीष्टे, विशेषतो गुरुभक्तिम् । क्वेदं योषित्पिण्डेषु सर्वतः पारिप्लवं वयः । क्व च तवेयं संधा । कस्य वा लोके कथ्यतां स्त्रीकामेनाखण्डितं मनः । वहिः पुरुषमयोऽन्तः स्त्रीमयो हि सर्वो लोकः । योऽपि नाम सर्वां महीं शास्ति, सर्वान्महीपालान्वशं कुरुते, सोऽपि कामस्य शासनं नातिक्रामन् स्त्रीणां क्रीडामृग एव भवति । यो हि

सर्वान्वेदान् सर्वाणि शास्त्राणि सर्वाश्च कलाः शिक्षते, सोऽपि न शिक्षते स्त्रीनिग्रहविद्याम् । साधारणोऽयमाब्रह्मपिपीलिकमपरिहार्यो दोषः । अत एवातिगर्ह्यापि ग्राम्यधर्मकथा लोकस्योत्सवतां धत्ते । ईदृशोऽस्मिन् मोहान्धकारनिरस्तप्रज्ञालोके पञ्चबाणपेचकसंचारसुदुर्भगे कर्णारुंतुदधूर्तालापक्रोष्टुवाशितातिभीषणे सर्वतः प्रसृततृष्णोल्कामुखीरोमहर्षणे संसारचक्रे कथमन्धतमसपाटनपटीयसा ज्ञानवैराग्यतेजसा देदीप्यमानमानसबिम्बः प्रादुर्भूतोऽसि पुरुषमार्ताण्डः । कस्तव धर्मं संकल्पमात्रेणाप्यनुकर्तुं शक्ष्यति पुरुषमानी । योऽयं मम स्वार्थपरताप्रयुक्तो निर्बन्धः, स ते महते श्रेयसे यशसे च संपद्यते स्म । क्षम्यतां ममेदं दौर्जन्यम्' इति पादयोर्निपपात ।

तं पाणिभ्यामुत्थाप्य 'भोः, किमत्र दौर्जन्यम् । अयमेव दीर्घदर्शिनामाचारः । यो हि भाविनोऽर्थस्यानुरूपां व्यवस्थां प्रागेवाकृत्वा, स्वयमापातसुखलोभेन सहसा प्रवर्तेत, स पश्चाद्विपरिवृत्तार्थः सीदेत् । अतः प्रियाकरोत्यस्मात्त्वेयमनाकुलता कार्येषु' इति समाश्वासयन् भीष्मो, राजकीयैर्वस्त्राभरणैरलंकृतां तां सत्यवतीं तत्पित्रा सह रथमारोप्य प्रतस्थे । अथेङ्गितज्ञैः सचिवैः कृतोत्सवां पुरीं प्रविशन् स तत्र योजनगन्धागन्धसमाकृष्टानां नगरनारीणामपाङ्गभृङ्गकुलसमालिङ्गिताङ्गीं तां वराङ्गीं पितुः

संनिधिं नीत्वा सप्रणिपातं निवेदयामास—'एषा सत्यवती नाम दाशराजकन्या भवन्तमुपस्थिता । गृह्यतां भवता विधिवदस्याः पाणिः । योऽस्यामुत्पाद्यते भवता, स एव कुमारः कुरूणां राजा कर्तव्यः । मा तु चैकपुत्रत्वनिमित्तः संतापो भवतः । परं च । अनाश्रमी न तिष्ठेतेति हि स्मरन्ति धर्मवित्तमाः । अशक्यं खलु तदतिक्रमितुं भवादृशैः प्रमाणपुरुषैः । अतः पुनरनुसंधतामनया सहधर्मिण्या सहितो गृहमेधीयान् धर्मान् देवपादः । अहं तु कृताश्रवोऽस्मि प्रथमाश्रम एव यावज्जीवमवस्थातुम् । भविष्यन्ति च ममापि नैष्ठिकैकलभ्या लोकाः । इदानीमेवास्मत्कुलं तपसा प्रजया च समृद्धतरं सदितरेभ्यः कुलेभ्यो विशिष्यते । न खलु केवलेन तपसा केवलेन गृहधर्मेण वा महत्त्वमाप्तुं शक्यम् । अतः प्रतिगृह्यतामेषा' इत्यभिधाय तामर्पयामास ।

शंतनुस्तु सपदि तमात्मजं गाढमुपगूढवान् बभाषे 'अयि वत्स, किमिदं ते साहसम् । कथमेवं प्रतिज्ञातवानसि । ननु त्वया ह्यखण्डितं ब्रह्मचर्यव्रतं धारयितव्यम् । मया तु कामचर्ययैवायुर्यापयितव्यम् । अथ विपरिवृत्तो ह्यावयोर्धर्मः । यत्परिणतः पिता पुनर्दारान्वेषी, तरुणस्तनयस्तपस्वी । कथं कामकरण्डादस्मात्पिण्डान्निर्दग्धकामवासनाबीजस्त्वं समुत्पन्नोऽसि । अथवा नायं नियमो, यत्पितुः समानशील एव पुत्रो भवतीति । श्रूयते हि मन्दबुद्धेः

**कहोला**ज्जातस्य महामते**रष्टावक्रस्यो**पाख्यानम् । ईदृशस्य ते किं प्रियमुपहरेयम् । किं नाम ते मयोपहर्तव्यमस्ति, यत्सर्वतृष्णामूलभूतां योषितमेव विवेकबलेन विधूतवानसि। नास्त्येव तां त्यक्तवतः किमपि व्यपाश्रयणीयमस्मिन् लोके। तथापीदमस्तु। मृत्योश्छन्देन खलु म्रियते सर्वो लोकः । त्वं पुनरात्मनश्छन्देन म्रियस्व। अनभिप्रेतमृत्यौ त्वयि न प्रभविष्यति क्वचिदप्यप्रतिहतप्रसरोऽपि मृत्युः । विधातुः प्रसादल्लब्धा हि ममेयं वरप्रदानशक्तिः । ' इति तस्मै वरं दत्वा तां वासवीं दाशकन्यां सत्यवतीं विधिवदुपयेमे ।

इति श्रीभीष्मविजये भीष्मस्य भीष्मत्वलाभो नाम द्वितीय उल्लासः ।

---

अथ तां प्राप्य निर्वृतो राजा कालेन तस्यां **चित्राङ्गदविचित्रवीर्यौ** नामात्मजावुत्पादयामास । ततः प्राप्तयौवनं ज्येष्ठमात्मजं राज्येऽभिषिच्य स नातिचिरेण कालेन कालधर्मेणायुज्यत । चित्राङ्गदस्तु स्वयमुद्धतो भूत्वा जातुचिदवसरे सनाम्ना गन्धर्वेण सहयुद्ध्वा तेन दिवं गमितः । तदनु तदनुजन्मनो विचित्रवीर्यस्य बालतया, तत्प्रतिनिधित्वेन सत्यवतीमतेन स्वयं राज्यं कुर्वन् भीष्मो यौवनापन्ने तस्मिन् आत्मनि न्यासीकृतं

तदीयं राज्यमर्पयामास । जागरामास च तदेकगतिकतया स्वकुलस्य, नित्यमप्रमादेन तस्य रक्षणे पक्ष्मेव चक्षुषः ।

अथानुजस्य दारसंग्रहाय तदर्हा राजकन्या मनसा विभावयन्नेव, काशिराजे दुहितॄणां स्वयंवराय समयं विधाय तदर्थं दूतान् प्रेषयति, समापतत्सु ततस्ततो राजन्येषु, स्वयं धनुर्मात्रसहायवानेकेन रथेन **काशीं** प्रति प्रतस्थे । या किल नगरी गौरीगुरोर्हिमवतोऽपि निजावासगिरेः कैलासादपि प्रेमास्पदभूता सर्वमङ्गलाकान्तस्य । कौशिकाय सर्वां महीं वितीर्णवतः 'न मद्विषये वस्तव्यं ' इति तेनोपरुद्धस्य च राज्ञो हरिश्चन्द्रस्य महीमध्यवर्तिन्यपि स्वमहिम्ना दिव्यभूमिषु परिगणिता या खलु शरणं बभूव । ये नाम विना ज्ञानेन, विना योगेन, विना तपसा, विनैव धर्मान्तरेण यथाजातप्रकृतयो मानवास्तेऽपि यत्र पञ्चतामात्रेण पुनः पाञ्चभौतिकं शरीरं न गृह्णन्ति । तादृशीं तां पुरीं प्रविशति भीष्मे, सरभसमभिगम्य पूजयन् राजा क्षत्रियसमाजेनालंकृतां सभां नीत्वा, वरार्हेणासनेन तमर्हयामास ।

तत्र सभामध्यमध्यासीने तस्मिन् शांतनवे, तस्य तेजसा प्रधर्षिताः स्वयं तेजस्विनोऽपि ते पृथिवीश्वराः ग्रहा इव सवितृसवेशनिवेशिनो विद्यमाना अप्यविद्यमानसमाना बभूवुः । तद-

र्शनेनैव विगलितमानाभिमानानां शङ्काटङ्कटङ्कितस्वान्तानां सान्तर्भयतया स्फुटमस्फुटितालापानां तेषां भूपानां तदागमनं प्रति भिन्नभिन्ना मिथः संजल्पाः संजज्ञिरे '—ननु भोः, किमस्य नैष्ठिकव्रतधरस्य स्वयंवरमण्डपे कार्यम्। न खल्वनशनाय दीक्षितोऽभ्यवहारगोष्ठीं प्रविविक्षति। अथ वैमात्रेयस्य भ्रातुर्विचित्रवीर्यस्यार्थे यायमभ्यागत इति समर्थनमपि न संगच्छते। वरस्य रूपगुणादीनि प्रत्यक्षतो निरूपयन्ती गन्धाकृष्टा मधुकरीव तद्गुणाकृष्टा स्वयंवरवधूः स्वयं वरणस्रजं कण्ठेऽर्पयति। न हि राजकर्मणीव दारकर्मण्यपि प्रतिनिधिः प्रतिविधीयते, येन तदर्थता स्यात्। अथवा निश्चितमेतत्। तेन तेन विलासिनीसखानां विलासिनामनवरतरतिरमणविहारमनोहरेण भावहावादिभिः सुभगंभावुकेन भोगविकासेन विघूर्णितमतिरेष दुर्मतिः कारणतो ब्रह्मचारी नाहं नैष्ठिक इति स्वसधामतिसंधायास्माकं पन्थानमेवानुपित्सति। अहो अस्यारम्भशूरता। अहो वृथारभटीपटिमा। अयि देवव्रत, लोकेश्वरैरप्यनतिक्रमणीयं खलु मान्मथमाज्ञाचक्रम्। पश्य- यः किल सर्वार्थदीपिकाया धर्मसंहितायाः प्रणेता वैवस्वतो मनुः, स स्वात्मजां शतरूपामसकृज्जुगुप्सया शतरूपधरामपि बलादुपजगाम। योऽसौ तपस्त्रयीमयो विवस्वान्, सोऽपि पुनः संज्ञासङ्गकाम्यया सुतीक्ष्णं तक्ष्णस्तक्षणमपि तितिक्षते स्म। इन्द्रादीनामप्यतिविशदमेवाहल्याजारत्वादिकम्। विधातापि स्वां दुहितरमुपगच्छन्,

तद्वधं कर्मानुमन्यमानेभ्यः स्वपुत्रेभ्यः स्वदमसूयामास, नात्मनो-दुश्चारित्राय। विष्णुस्तु किमप्यपदेशनैकपत्नीव्रतधरायां जलंधरस्य दयितायां वृन्दायां सहसा प्रवर्तते स्म। रुद्रस्य तु प्रसभं भस्मीकृतमदनाङ्गस्यापि तत्प्रकोपेन किं न जानीषेऽर्धप्रच्युतिं पुरस्यैव। एवमाकुलेऽस्मिन् जगच्चक्रे कस्य वा दृढमखण्डितं ब्रह्मचर्यम्। अतः खलु पूर्वं मनीषेणोऽन्यथा स्ववचस्यप्रमाणता स्यादिति कृत्वा ब्रह्मचर्यादनन्तरं यौवनकालसध्रीचीनं गृहाश्रमं विदधिरे। स्थितेऽपि वैधे निराबाधोऽध्वनि, किमर्थमलोकसामान्येन न्यायेन प्रवर्तमानः सीदसि। अयि तात शान्तनव, दिष्ट्या वहुकुक्ष्यामेव ते प्रभातं जातम्। एवंविधस्य ते भीष्मतैव बीभत्सतामावहति। कर्मसु पारदृश्वनः खलु तद्यशसा प्रसूतं कर्मनाम शोभामादधाति। अथ कदाचिदुद्धतप्रकृतिरेष वीर्यमदेनास्मानभिभूय कन्या जिहीर्षति। तथा सति यथा पूर्वमात्मनो वाग्दोषेण भोगोपभोगप्रसङ्गेषु षण्ड इव बहिष्कारापन्नो निजगलार्पितनिगल इव स्वयमुच्छ्वसितुमपि न शक्नोति, एवमधुना स्वकर्मदोषेणास्माभिः करचरणार्पितनिगलो बन्धनालये समुच्छ्वसन् पादेषु शृङ्खलितो जालध्न इवाभङ्गुरं ब्रह्मचर्यमनुप्राप्स्यति।' इति। भीष्मस्त्वाकर्ण्यापि तेषां प्रलपितानि, स्वयमनाकुल्यैवावतस्थे।

तदन्तरे वरणस्रग्भिः समं समवतीर्णासु तास्वम्बाम्बिकाम्बालिकाख्यासु तिसृषु स्वयंवरकन्यासु, त्रिवेणीसंभेदगता जलचरा इव त्रेधा समुह्यमानात्मानस्ते क्षत्त्रियकुमाराः असकृद्भुजपरिघसमीक्षया ज्याकिणाङ्कपरामर्शेन मणिमकुटसंघट्टनेन पुनः पुनरङ्गुलीयकसंगमनेन चतुरालापकलापेन, चात्मनो महावीरतां प्रचुरविभूतिमत्तां रसिकाप्रेसरतामभिरूपरूपवत्तां च प्रकाशयन्तो, यादृच्छिकं तासां मन्दस्मितकटाक्षविक्षेपादिकं स्वस्मिन् पक्षपातपिशुनमिव संभावयन्तः, निमेषोन्मेषावपि प्रत्यूहभूताविव, उच्छ्वासनिःश्वासावपि प्रतिबन्धहेतू इव च मन्वानाः स्वासनेषूपविष्टा अपि डोलायमानमानसतया तदन्तिकं प्रति प्रचलिता इव बहुविधेन दौरवस्थ्येन दुःखासिकामासिषत। अथ पश्यतामेव तेषां, बालकदलिका इव तास्तिस्रोऽपि बालाः करिकलभ इव स कुरुकुञ्जरः शुण्डादण्डेनेव भुजप्रकाण्डेन लीलया समाददानः प्रचलच्छलाचल इव त्रिकूटाचलः स्वं रथमारोपयामास ।

तदक्षममाणाः क्षमापतयः ‘ कथमस्माकं भुजस्तम्भानसंभाव्य स्वयंवरस्थाः स्वयं हरेदेष धूर्तः । किमिदं निर्वीर्यकं मन्यते वीरचक्रमात्मसंभावनोपहतात्मायं दुरात्मा । अहो अस्याहोपुरुषिका। येषां खलु लोहिताङ्गस्येव वीक्षणमप्यनिष्टमेतादृशेषूत्सवेषु । तादृशेषु प्रथमः खल्वेष स्वयमुपहतनिखिलाभ्युदयमङ्गलः । न प्रश-

स्यते खलु त्यक्तैषणानां परिव्राजकानामिव स्पर्शसुखमनभिलष्यतां नैष्ठिकानां चैषणाप्रयोजितेषु विवाहादिषु पुनः प्रसङ्गः । स कथं निरपत्रपोऽभ्युदयभाण्डानि कृष्णसर्पेणेव सुदुर्भगेण करेण स्पृशेत् । स्पृशंश्च कथमशिक्षणीयोऽस्तु । येन किलापदानेन महिमानमीप्सति लोकः, तदातनूपातमनपवादेन विदधानो हि निदधाति महत्त्वपदे पदम् । शक्ता हि सर्वेऽप्येवं वितथप्रतिज्ञाकरणे । अयं वटुः पितुरर्थे कृताश्रवो वृत्तवानिति ननु गौरवमस्मिन्नस्माकम् । स एव सर्वलोकसमक्षमुद्घोषितां स्वसंस्थामपलप्य, विरुद्धमाचरन् कथमनिग्राह्योऽस्तु । खलनिग्रहाय खलु गृहीतशस्त्रा वयम् । अन्यथा जगदाकुलीभवेत् । अतः किमुदासिकया । इत्यन्योऽन्यमुद्योजयन्तः, तिष्ठ तिष्ठ रे कन्याचोरेति चोरंकारं तं निर्भर्त्सयमानाः स्वप्रहरणानि भृत्यादायं विधून्वन्तो युगपदासनेभ्यः समुत्तस्थुः ।

तथोत्थितांस्तान् सिंहनादेन स्तम्भितप्रसरान् कुर्वन् स कुरुसिंहः सुगभीरमिदमुदीरयामास—भो वीराः, एष युष्मान् शास्ति राजा विचित्रवीर्यः । यथा—‘ सत्स्वप्यष्टसु विवाहेषु, द्वावेव राज्ञां विहितौ गान्धर्वो राक्षसश्च । तयोरपि द्वितीयः खलु प्रशस्यतरः । निरवकाशो हि तस्मिन् गान्धर्वोऽवकाशं लभते । बहून् गुणान् समीक्ष्य खलु राक्षसापरपर्यायं प्रसह्यकन्याहरणं वीरधुर्याणामभ्य-

हितमुद्वाहमुदाहार्षुरार्याः । ननु विक्रमो हि प्रधानशिष्टः क्षत्रियाणाम्, न त्वर्याणामिवार्थलाभः । स चैषामन्वाचयशिष्टः । स च विक्रमोऽत्रैव निष्कृष्यते काञ्चनगुण इव निकषोपले । न खल्वन्तरेणान्तरं सारातिरेकं, केवलेन वस्त्राभरणाडम्बरेण कर्कशसाध्येऽत्र प्रवर्तितुं शक्यम् । ईदृशेषु वीराशंसनेषु प्रथमानो हि वीर इति प्रशंसनीयो भवति । स एव च पृथिव्या ईश्वरः पार्थिवः । इतरे तु पृथिवीविकारा एव । एवं वीर्यशुल्केन परिग्रहीतात्मानं बहु मन्यते वीरपत्नी कन्या । प्रीयन्ते च तादृशे वरे कन्याबान्धवाः । अतो धर्म्येण गुण्येन च तेन पथा प्रवर्तध्वम् ' इति । मया चैतदवोररीकृत्य दारकाङ्क्षिणस्तस्य राज्ञो विचित्रवीर्यस्य कृते वीर्यशुल्केन हराम्येताः । न खलु नियोज्यसाध्ये कर्मणि स्वयं राजानः प्रवर्तन्ते । आश्चर्यं वै वैनतेयहृतस्यामृतस्येव गाङ्गेयहस्तगतस्यामिषस्य हठात्प्रत्याहरणमन्येन । तथापि प्रयतध्वं दृष्टविजयैरस्त्रशस्त्रकलापैः । एष खल्वन्वेषो विजिगीषूणां, यत्तरसा पराभिभवेनानं संपरायेषु । अतो ये ये युष्मासु मानिमानिनः प्रवीरंमन्याश्च, ते सर्वेऽपि सर्वाभिसारेण प्रदर्शयत स्वस्वशिक्षापाटवम् । प्रहरत च प्रथमप्रहारप्रिये मयि । न किल भीष्मशरासान्निष्क्रामन्नाशुगः परस्य शरीरादाशुगमनिष्क्रामयन्विरमति । तदस्तु युष्माकमपि क्षणमात्रपरितोषः । अथ यदि भीताः स्थ, तदा जिताः स्म इति स्वात्मानं मोचयत । यत्तदात्मनीनं मन्यध्वे, तदाचरतेति गर्जन्

धनुर्विस्फारयामास । तेनाधिक्षेपवचनेन भग्नमिव द्वितीयमप्यात्मनः शृङ्गं समर्थयमानास्ते क्षत्त्रियर्षभाः ' किमात्थ रे मदाध्मात किमात्थ । एष न भविष्यसि । इति तर्जयन्तो जहिजहीति पटहानघ्नन्, पिगृहिपिगृहीति शृङ्गाण्यपिपरुः, धमतधमतेति शङ्खानधमन्, सरतसरतेति परि तमसरन्, किरतकिरतेति शरानकिरन्। अकुर्वंश्च केचन तस्य शरासं शरव्यं, तनुत्रमितरे, शिरस्त्रमपरे, वाहानेके, सारथिमन्ये, शेषाः पताकाम् । ततश्च क्षणुत बाणैः, तुदत शूलैः, तृण्ढ खड्गैः, पिण्ढ दण्डैः, भिन्द्ध भल्लैः, छिन्द्ध शल्यैः, एवं निरुच्छ्वासमविध्यन् । अगर्जंश्चोर्जस्वलं पर्जन्या इव महामरीध्र समाच्छादयाजस्रैः शरासारैः सरथं तं महारथं, हतोऽसि हतोऽसि मिथ्यातापसेति ।

एवमुपक्रान्ते सुतुमुले संप्रहारे, प्रक्रान्तेषु सुतीक्ष्णं प्रहर्तुं परवीरेषु, प्रेक्षकेषु च भयविस्मयस्थगितान्तरेषु नागरेषु, कृतोत्साहः स तालध्वजः शङ्खनादेन वीरवादेन च सृजन् परेषां हृदयकम्पं, विसृजन् सुतीक्ष्णानि शस्त्राणि, खण्डयन्मण्डलाग्रान्, दारयन्मुद्गरान्, चूर्णयन् कर्णिनाराचान्ः निरस्यन् प्रासान्, भिन्दन् भिन्दिपालान्, छिन्दन्नातपत्राणि, विरुजन्वालव्यजनानि, दलयन् फलकानि, सूदयन् सादिनः, प्रमथ्नन् रथान्, पातयन् केतनानि क्षणं विजहार । तावतैव भग्नेषु बहुषु, कतिचन प्रवीर-

गणनार्हा दोष्मन्तस्तुष्यन्तोऽपि तस्य लघुहस्ततया कृतहस्ततया च, ईर्ष्यन्तः परैरनाक्रमणीयेन विक्रमेण, नामग्राहमाहूयमानाः प्रयत्नसंचितानि स्वायुधानि प्रयुञ्जानाः सर्वसंनाहेन प्रतियुयुधिरे। बिभिदिरे तस्य कोदण्डकाण्डम्। विदधिरे च वक्षसि भुजस्तम्भे ललाटतटे च रुधिरस्रुतिम्। तदेषां करकौशलं श्लाघमानः स समरशौण्डीरः पुनर्गृहीतसंनद्धे धनुषि संहितेन भार्गवोपज्ञेनास्त्रेण लीलयैव विलूय परेषामवलेपमिव चापं, अक्लेशेनैव प्रभ्रंश्य जयाशंसनमिव दंशनम्, अयत्नेनैव निर्मथ्य मनोरथमिव रथं, कां दिशं गमिष्याम इति पलायनोन्मुखानां पारिप्लवबुद्धीनां तेषां भूभुजां भुजेभ्यः समवप्लुत्य निरुपप्लवं पदमन्विष्य परापतन्तीं तत्र तत्र विकीर्णां विजयश्रियमेकधाकारं समूह्य समाचकर्ष। क्षतजचन्दनसमालम्भे चन्द्रहासादर्शबिम्बे च नित्योत्सुका सा विजयश्रीः मा भूत्ते भ्रातुर्विचित्रवीर्यस्य परिवेत्तृतावचनीयम्। मा च ते व्रतं भाङ्क्षीत्। चराम्यहमपि भवता सममसिधाराव्रतम्' इति जयकोलाहलच्छलेनालपन्ती समुत्तुङ्गमस्य भुजाशिखरपर्यङ्कमारुरोह।

अवरोहता धनुर्गुणेनावरोपिते हृदयकम्पे सांपरायिकानाम्, सर्वतः प्रसृमरेण तेजसा निदाघचण्डभानुरिव भ्राजमानः स वीरकेसरी वीर्यशुल्काभिरलंकृतं स्वं रथं नगराय निवर्तयामास।

अथ प्रस्थिते तस्मिन्, तावल्लब्धाश्वासः **साल्वो** नाम सौभपतिः पार्ष्णिग्राहोऽनुद्रवन् सामुदायिकीं तां पराजयसिद्धिं स्वकीयां चिकीर्षुरिव तिष्ठ तिष्ठ रे वटुपाशेति क्षिपन्नुपरुरोध। अजन्यद्भुतमतिभयानकं च तत्र तयोर्जन्यम्। श्रीरपि मत्तवारणयोरन्तरगता वासितेव स्वयमुभयतः पाशकृष्टेव च क्षणं विचचाल। भीष्मपराजयकाङ्क्षिणां परेषां मनसि जयाशंसावल्लरी साल्वोपघ्ना मुहूर्तमवर्धत। यथा यथा च स्वप्रौढिप्रकटनाय नातिप्रगाढं प्रहरत्याजमीढः, तथा तथा स्वयमोजायमानो 'जितोऽसि जितोऽसि' इति जगर्ज जितकाशी स सौभपतिः। जय जयेति तद्गर्जितमनुजगर्जुश्चान्ये तत्सैन्या वप्राभ्व इव स्तनति स्तनयित्नौ। क्षणमेवं क्रीडित्वा पुनः प्रहर्तुं प्रवृत्ते परबले प्रियसंप्रहारः स कुरुवीरस्तिलवापी कृषीवल इव युगपदनेकान् सायकान् वपन्, इक्षुकाण्डभञ्जं भङ्क्त्वा तस्य कोदण्डदण्डं, पशुमारं मारयित्वा सधुर्यं सारथिं, वह्निसात्कृत्य शताङ्गं, तं साल्वं शरीरमात्रशेषं चक्रे।

कण्ठीरवाक्रान्ते गन्धहस्तिनीव स्वयमात्तगन्धे विहस्ते च तस्मिन् साल्वे, पारिप्लवाक्षेषु तदनुप्लवेषु पृतनाध्यक्षेषु, भयविस्मयतरलतारकमवेक्षमाणासु तासु हरिणेक्षणासु, स क्ष्मापतिनन्दनस्तारस्वरेण तमरातिमामन्त्र्य जगाद—अयि साल्व, कामं शूरोऽसि नर्मतन्त्रेषु विहारेषु, न कर्मतन्त्रेषु संप्रहारेषु। प्रगल्भोऽ-

सि नारीणां समितिषु, न पुनररीणाम् । अकिंचित्करं हीदं सर्वमीदृशेषु वीरव्यवहारेषु । लोकोत्तरेण कर्मणा क्रममाणो हि कर्मठो नाम । इतरे तु कमठा एव । अपेहि रे वराक, अपेहि । अपवादविधिरिव शास्त्रकदम्बस्य निरसनक्षमोऽपि सर्वशास्त्रकलापस्य, त्वादृशेषु विशास्त्रेषूत्सर्गायते भीष्मसायकः ।' इति तं सावज्ञमवधूय, तत्र समेतान् क्षत्रियानाह—भो वीराः, एष भीष्मः स्थाणुः प्रत्यवतिष्ठते । तद्यो वः कामयते स मयि प्रहरतु । सर्वे वा यूयं संहत्य पुनः प्रहरत । अथ वा यो वः कामयते, तस्मिन् प्रहरामि, सर्वेषु वा युष्मासु प्रहरामि ' इति । प्रत्युत्तरदानेऽपि कातरेषु तेषु प्रतिभटेषु, नातिपटीयसा विपाठेन तेषां मकुटानि पाटयित्वा, शङ्खनादेन दिशो नादयन् स्वपुरमाससाद । आसाद्य च तत्र सोपोद्घातवर्णनं ता वरवर्णिनीः सत्यवत्याः करे समर्पयामास । यत्किल जित्वरीति वणिक्सार्थैकसांकेतिकं नाम वाराणस्यास्तदिदं जगज्जित्वरस्यास्य क्षत्रियर्षभस्य केवलमन्वर्थतामापेदे ।

अथ निश्चप्रचे विवाहमुहूर्ते , संभृतेषु वैवाहिकेषु संभारेषु, समागतेषु नानादेशीयेषु लोकेषु, समाहूतेषु सामन्तमहीपालेषु, निर्वृत्तगोदानमङ्गले वरे राजनि विचित्रवीर्ये, स्वलंकृतासु विवाहमण्डपमलंकुर्वाणासु वधूभाविनीषु तिसृष्वपि राजपुत्रीषु, प्रवर्त-

माने पाणिग्रहस्य पूर्वभाविनि क्रियाकलापे, प्रत्यासन्नतरे च मुहूर्ते, त्वरयत्सु मौहूर्तिकेषु प्रवर्ततां पाणिग्रहणमिति, ससंभ्रममासनादुत्थाय भीष्मान्तिकमभिपतिता ज्येष्ठा अम्बा नाम काशीराजकन्या, तं प्रणम्य पश्यत्सु सदस्येषु पश्यन्त्योरितरयोः कन्ययोः, पश्यन्त्यां च देव्यां सत्यवत्यां, प्राञ्जलिर्विज्ञापयामास—आर्य पौरवेन्द्र, चिराय मम मनसि साल्वराजो निवसति । तथा तस्य मनश्च मयि प्रीयतेतराम् । दूतद्वारा निर्वृत्तो ह्यावयोरान्तरो व्यतिकरः । बाहीकेन संबन्धेन तं प्रथयितुं प्रवर्तिते स्वयंवरेऽनाशयज्ञेन भवता स भग्नो बभूव । इदानीमपि तन्मयीमेव धारणां धारयति मे मानसम् । अन्याय्यं खल्विदं, यदुतैकत्रान्तरात्मा, अन्यत्र बाह्य आत्मेति । अतो मां विमोक्तुमर्हसि । इति ।

ततः किं किमिति पर्युत्सुकेषु लोकेषु, सहसा विरतेषु मङ्गलवाद्येषु, निरुद्यमेषु पुरोहितवर्गेषु, स भीष्मस्तां निर्दिशन्नुवाच—शृणुत पारिषदाः, एषा खलु काशीराजस्य ज्येष्ठा कन्या अम्बा नाम । एते चास्या अवरजे अम्बिकाम्बालिके । स्वयंवरस्था एतास्तिस्रोऽपि वर्या राज्ञो विचित्रवीर्यस्य दारार्थं समाहृतवानस्मि । अद्यत्वे त्वेषा अम्बा साल्वाभिलाषिणी मां विसर्जयेत्यर्थयते । किमत्र प्रतिपत्तव्यम् । इच्छामि भवतामाशयमवगन्तुम् । ते तं प्रत्यूचुः—देव शांतनव, मानुषेषु सर्वज्ञं हि भवन्तमुशन्ति भावज्ञा

महानुभावाः । अतो भवतः क्रमगोचरमर्थमपूर्वमिव वयमुदाहरिष्यामः । तथापि गुरुतरं भवतः शासनमिति कृत्वा यथामतिविभवमुपन्यस्यामः । समानानुरागयोरेव वधूवरयोः समागमो नीरक्षीरसंसर्ग इव सुसंश्लिष्टो भवति । या तु स्वयमकामा तामुपरुन्धतः सिकता निष्पीडयतश्च समान एव रसास्वादः । या पुनरन्यकामा तां मोहेन कलत्रं कुर्वन्, करोति सकलेन स्वकुलेन सह सहसा निरयार्णवेऽवतरणम् । तदिमां ज्येष्ठां प्रथमं परित्यज्य पश्चात्प्रवर्त्यतां प्रस्तुतं मङ्गलम् । न खलु त्याज्यं पुरस्कृत्य प्रशस्यते यत्किंचिदप्यभ्युदयाचरणम् । किं पुनरीदृशं महामङ्गलम् । अयमेव श्रेयस्कामानां समुदाचारः । अतः परं देवः प्रमाणम्' इति ।

स च तद्वचनमनुमोदमानः प्रोवाच—'ननु पारिषद्याः, साधूक्तं भवद्भिः । अस्मदाशयसंवादी भवतां वादः । न ह्यपरक्तं जनं रञ्जयन्नीप्सितं लभते । वरं च संस्पृश्य प्रक्षालनादस्पर्शनं पङ्कस्य । यद्येतदेषा प्रागेवावेदयिष्यत्तर्हि तदानीमेव पर्यहरिष्याम । अधुनापि न किंचिच्छिन्नम् । सम्यगनुमोदामहे च सामयिकमस्याश्छन्दाविष्करणम् । तदियमम्बा प्रतिष्ठतामिष्टदेशगमनाय । अनुप्रस्थास्यन्ते गुप्त्यर्थमस्याः स्त्रीपरिजनाः गुप्तिपुरुषाश्चा सालयगृहद्वारम् ।' इति समादिश्य, तथेति प्रस्थितां तामम्बां

चतुरन्तयानेन सुगुप्तां प्रजिघाय । अथ प्रवर्तिते विवाहमङ्गले स राजा विचित्रवीर्यस्ते अम्बिकाम्बालिके विधिवदुपयेमे ।

इति श्रीभीष्मविजये भीष्मविक्रमो नाम
तृतीय उल्लासः ।

---

अम्बा तु सहर्षं साल्वराजस्य गृहद्वारमसाद्य, तत्र दौवारिकद्वारान्तर्लब्धान्तरा तं साल्वं प्रणम्य सप्रणयमावेदयामास—राजन्, एषास्मि तव प्रेमास्पदमम्बा । भवतः संगमाय चिरेण पर्युत्सुकाया ममाशालता भवतो वार्ताहराणामालापामृतेन नित्यमासिच्यमाना फलबन्धनकाले मम दुर्दैवनुन्नेन भीष्ममत्तमतङ्गजेन मुषिता बभूव । सैवेदानीं पुनरनुकूलेन दिष्टेन समाश्लिष्टा कुसुमिता भवति । फलिता च भवतु तवः प्रसादेन । न मे त्वदन्यत्र देवत्रापि मनो रमते । अत एव रूपैश्वर्यादिवरगुणसंपन्नोऽपि ममारोचको बभूव स कुरुकुमारः । ततश्च प्रस्तुते पाणिग्रहणसमये प्रत्युत्य स्वाशयं, ततो लब्धानुमतिस्तदुपस्थापितैः स्त्रीजनैः परिवृता भवन्तमुपस्थायिकागतास्मि । त्वदेकभक्तायां मयि निवेष्टुमर्हसि ।

तदुपश्रुत्य स तामूचे—'अयि अम्बे, असंशयं त्वयि मम प्रेमानुबन्धो बभूव । स च पश्यन्त्या एव ते दुर्विधेन विधिना

निर्बीजं भर्जितो हि। स कथं पुनः प्ररोढुमर्हति। अन्यथा क्वचिदप्यभूतपूर्वः सांयुगीनानां पुरोगामिनि मय्यपि जलमानुषात्पराजयः कथं पदं निधत्ताम्। न खल्वपराक्रान्तेऽप्यामिषे नखरायुधस्येवास्मादृशस्य पराक्रान्तस्य पुनः स्पृहा भवति। तद्भद्रे, त्वय्यभिकं तमेव भजस्व। मास्तु तत्रापि पर्यायपर्ययकृतो विपर्ययः' इति। अत्यन्तमनिष्टेन तस्य तेन प्रत्यादिष्टेन विनष्टोत्साहा सा विश्लथेन केशपाशेन बाष्पाञ्जनमलीमसेन कपोलतलेन निःश्वासधूमधूसरेणाधरेण प्रभ्रश्यमानमणिवलयेन करयुगलेन च स्वयं संसूच्यमानपतिव्रतीमङ्गलापगमा, तस्मिन् स्नेहातिभारेण तदपायशङ्काकलङ्किता क्षारनिर्णिक्ते वाससीव व्यपेतरागे तस्य मनसि पुनरप्यनुनयरागेण रागमाधातुकामा सगद्गदमिदमगदीत्-नाथ, अकस्मात्कृतप्रणयस्यापि कामिनीजनस्य प्रणयमप्रत्याख्येयं खल्वाहुः। किं पुनरा प्रज्ञोदयात्त्वय्येवानन्यभावनया भावितात्मनोऽस्य जनस्य। अभिज्ञोऽसि पर्युत्सुकजनव्यवहाराणाम्। अतस्त्वदेकभक्तां न मां हातुमर्हसि।' इति सोत्कम्पं पादयोर्निपपात।

तथापि तस्यां निराशेन तेन 'याहि याहि, मास्तु तत्रापि कालातिपातः' इति निरस्ता सा बाला प्रहतकन्तुकवत्त्वरया पूर्वस्थानं प्रति प्रस्थिता पथि पर्याकुलं मनस्येवमचकलत्—अपि नाम पुनः प्रसन्नां निवेदिततत्त्वां च मां साधुदृष्ट्या परिगृह्णीया-

त्स भीष्मः, उत कोऽदृष्ट्वा प्रत्याचक्षीत । तेन च परात्तायाः मे नास्ति पारावारमन्तरेण गत्यन्तरम् । भवन्ति हि दक्षिणाक्षिस्फुरणादीन्यदक्षिणानि लक्षणानि । नूनं तत्रापि मयि विषमविपाका नियतिस्तिरस्काराय पुरः स्थास्यति । अयि दुर्विदग्ध विधे, केयं तव निरनुक्रोशता । यद्यथाकालमनुरूपं रमणमासाद्य स्वैरं रममाणासु रमणीषु, मामेवमभिजातजातामभिरूपरूपामनुगुणगुणां च विनिर्माय समुज्जृम्भमाणेऽपि तारुण्ये, संशयितपाणिग्रहणामकृणोः । का नु नाम महतेऽन्या कन्या अस्मिन्मानुषमण्डले स्वयमेव कान्तार्थिनी कुलटेवैवं कुलं कुलमटाट्यते । अहो मूर्खता साल्वस्य । योऽसावनवधार्यैव मन्निवेदनाक्षराणि, विस्मृत्यैव पूर्वकृतमात्मनः समयं, निरास्थं निरास्थत । न चास्य हृदये दयापि नोदियाय । भीष्मशब्दश्रवणेनैव मनःकम्पकम्पितो हि भवति । अहो अस्य दौरात्म्यम् । यत्प्रत्ययेन त्रिशङ्कुस्वर्गमारूढास्मि । को नु नामान्यः पूर्वमसकृच्छ्लक्ष्णाभिरुक्तिभिः प्रलोभ्य तेन प्रतीतं जनं गोलाङ्गूलग्राहणेन जनुषान्धमिव प्रतारयेत् । अथवा प्रार्थनीयमपि स्वयमेवागतं वस्तु न बहु मन्यते लोकः । वरं हि प्रार्थ्यादमृतरसात्प्रार्थको यवागूरसः । एवमविचार्य खलु केवलेन चापलेन वञ्चितास्मि । हा किं करोमि मन्दभाग्या' इत्यादि बहु विलपन्ती हस्तिनां प्राप्य, तत्र कथंचिल्लब्धावसरा भीष्मं प्रणम्य विज्ञापयामास ।

'राजन्, पौरव, क्षमस्व मम चापल्यकृतमपराधम्। जानास्येवोत्पत्तिक्रमपरिहार्यं च स्त्रीणां मौग्ध्यम्। अनुभूतं च मया यत्किंचनकारितायाः फलम्। अलमियत्या मे शिक्षया। त्वत्तः समुद्विग्नो हि साल्वो भीष्माक्रान्तेयमिति मयि नानुरज्यति। अतस्ततो निवृत्ताभिलाषा पुनस्त्वामेव शरणं प्रपन्नास्मि। अनुकम्पनीयो हि मन्तूयमानोऽपि पश्चात्तापतप्तो जन्तुः, विशेषतो योषाजनः। तस्मात्प्रसीद प्रसीद। निर्वर्तय ममापि विवाहम्।' इत्यनुनयन्ती त्वद्दते नास्ति मे गत्यन्तरमिति बाष्पस्रवन्तीं सृजन्ती पाहि पाहीति पादयोर्निपपात। अनभ्यासमित्येति प्रागेव कृताध्यवसायः स महाशयः 'मास्तु दूनाया वाक्पारुष्यकृतं दुःखान्तरं' इत्युरसिकृत्य भङ्ग्यन्तरेण निरसिसिषुस्तामूचे 'उत्तिष्ठोत्तिष्ठ राजपुत्रि, उच्यतां मद्वचनेन सौभपतिः—'अयि साल्व, निवृत्तमावयोर्विद्वेषकारणम्। अतः स्वैरं परिगृहाण त्वया प्रार्थितपूर्वां, परित्यक्तामस्माभिरिमामम्बाम्। कारणवैरिणां हि कारणे निवर्तमाने, तेन सह निवर्तते तत्संनियोगशिष्टं वैरम्। तस्मान्निर्भयमनुगृह्यतामेषेति'। 'तव भ्रातुरेव मामपि भार्यां विधेहि। मास्तु मे पुनरपि मुक्तप्रार्थितं' इति मुहुर्मुहुर्नाथमानायां तस्यां, स पुनरुदीरयामास-शृणु राजपुत्रि, तव परिग्रहे दोषम्। राजा विचित्रवीर्यः खलु विवोढा, न वयम्। स हि बलवदभिनिविष्टचित्तस्तव भगिन्योः। तदुपरोधिनीं राज्यश्रियमपि न सहेत स कामी।

किं पुनः सापत्न्यकरणम् । त्वयि कृतप्रसादैरपि ब्रूहि किमस्माभिरिह कार्यम् । यथा वयं पराधीनेऽत्र निःसत्त्वा भवामो, न तथा साल्वः । इच्छन् हि स त्वां सपद्येव सुखयितुं क्षमः । पश्य स्वतन्त्रपरतन्त्रयोरन्तरम् । अतो हि कथमपि पारतन्त्र्यान्मोक्षन्ते स्वाच्छन्द्यकामाः । निवेदिततत्त्वो हि साल्वो न पुनरेवं निराकुर्यात् । भजस्व तमेव ।

सा तु सोपपत्तिकमिव तद्वचनमादाय ततो निवृत्ता पुनः साल्वगृहद्वारं प्राप्य, कृच्छ्रेण लब्धप्रवेशा तस्मै निवेदयामास- राजन्, वृत्तो हि तत्र प्रागेवोद्वाहः । पुनर्व्यतीतकालमागतायां मयि नातिप्रीतमनुजमाकलय्य प्रव्यथितो भीष्मो मयि कारुण्यरसमेदुरमानसोऽपि पारतन्त्र्यदुःखदुःखितो भूत्वा, स्वयं साक्षात्किमप्याचरितुमक्षमो मत्परिग्रहाय भवतेऽनुमतिं विततार । अतो निर्विशङ्कं मयि निर्विशतु भवान्' इति । सोऽपि तामुत्कण्ठाकुण्ठितविवेकामनाशयन्नामाज्ञाय, स्वयमपि भीष्मवद्व्याजोक्त्यैव निराकरिष्णुः प्रोवाच—अयि रभसशीले, किमेवं हस्तपतितं चापमपहाय, पुनर्जलमादाय धावसि । यदा भीष्मस्त्वयि दयार्द्रभावो बभूव, तदैव निर्बन्धनीयो ह्येषः । यदि विचित्रवीर्यो न कामयते, मा कामयताम् । सर्वसमक्षं त्वया परामृष्टचर्यां मामात्मनः सहचरीं विधेहीति कुतस्त्वया नायमुपरुद्धः । प्रायेण प्रत्युत्पन्नदृशो

हि सुदशः। तद्भद्रे, याहि त्वरया। अनेन वचनेन निर्बध्नती भवती भीष्मस्य प्राणेश्वरी भविष्यति। मा भूर्हस्तग्राहं दृढं ग्रहीतव्ये शिथिलसंग्राहा' इति श्रवणानुकूलेन वचनेन निवर्तयामास।

एवं मिथ्याप्रियवचनेन कृतोत्साहा सा कथमपि मामुद्वक्ष्यति स कुरूद्वह इति संनद्धेन मनोरथरथेन त्वरितमभिपत्य हस्तिनाम्, अन्तरलब्धान्तरा द्वारप्रदेश एव चिरं समयं प्रतीक्षमाणावातिष्ठत। अथ व्यतीते बहुतिथे काले जातु संदर्शनविषयीभूते भीष्मे साल्ववचनमावेदयन्ती सा तेन साधिक्षेपं क्षिप्यते स्म—अयि मूढे, किं न जानीषे मम नैष्ठिकत्वम्। एवं विप्रलम्भकवचनेन प्रलोभिता खलुभयकूलपशुरिव परिभ्राम्यसि। भीष्मस्त्वां कथमपि न परिग्रहीष्यति। 'बाल्यतः प्रभृति प्रलोभ्य, समये कथमेवं प्रतारयसि' इति व्यवहारेण साल्वं विजित्य, तत्र वा, अन्यत्र वा स्वतन्त्रा भव। न पुनस्त्वयात्र प्रवेष्टव्यम्। 'इति तामपसार्य, 'इतः परमेषा न प्रवेश्या' इति शृण्वत्या एव तस्याः सीमान्तपालमादिदेश।

एवं पलायिता सा तथैव साल्वगृहद्वारेऽपि चिरमलब्धावकाशा, जातुचिदवसरे तत्सविधं प्राप्य बाष्पपरिप्लुताङ्गी 'राजन्, भीष्मेण विद्राविताऽस्मि। प्राचीनमावयोः प्रणयमनुरुध्यस्व। युवा-

भ्यामुभाभ्यामपि पूतिकूश्माण्डवदपध्वस्ता किमहं कुर्याम् । त्वत्प्रत्ययेन परित्यक्तपूर्वावलम्बां मां परित्रातुमर्हसि' इति विक्रोशन्ती भुवि निपपात। स च तां रूक्षं प्रत्याचचक्षे। अयि मूढे, अनभिज्ञास्युक्तिवैदग्धीनाम । अतः शृणु । यावत्त्वं पितुर्वशवर्तिन्यभवस्तावत्त्वयि बलवान्मम मनोभवो बभूव । किमत्र शाठ्यं नाम । स च त्वां परामृशता तेन वटुपाशेन निःशेषं प्रमार्ज्यते स्म । सर्वपरित्यागेनापि रक्षणीयं खलु कलत्रचारित्रम् । संशयिते तस्मिन्, दूरमपसार्यते हि कण्ठाश्लेषसुश्लिष्टाद्दयिताजनादपि प्रणयः । किं पुनः सुस्फुटदोषादकलितसंबन्धाच्च त्वादृशाज्जनात् । अलर्कसमालीढा हविःस्थालीव बकवृत्तेस्तस्य हस्तपतितासीति शोचनीयस्ते दैवदुर्विपाकः' इत्यभ्युक्ते, सा ससंभ्रमं सनिर्वेधं चाचख्यौ 'मा खलु मा खलु। भोः, किमेवमनर्हमभिशंससि। जानीहि मां चारित्रेण पावकशिखोपमाम् । भीष्मोऽपि निरवद्यशील एव । अहमस्मि तत्र प्रतिभूः । यदि तद्भयेन मां न जिघृक्षसि, तर्हि तेनैव कारणेन निरस्यताम् । किमसद्दोषारोपणेनेति । स च सोपहासं निरास–अयि दुःशीले, ज्ञायते हि तव सौशील्यम् । अन्यथा कथं भीष्मचारित्रे प्रति प्रातिभाव्यं भवत्याः । यत्त्वयोक्तं पावकशिखोपमाहमिति, तत्तु सत्यम् । तथाविधया त्वया घृतकुम्भीकृतः स वर्णी । अथ वा किमनेन निरर्थकेन परपरिभाषणेनास्माकम् । न मे त्वया कार्यं। इति तां निष्कासयामास ।

एवमुभाभ्यामवधूता सा कन्या मुखमुरश्च मुहुर्मुहुराघ्नाना 'हा हतास्मि, वञ्चितास्मि, मुषितास्मि, प्रभ्रष्टास्मि, किं करोमि, क्व गच्छामि, अयि धूर्त साल्व, कथं मम चारित्रेऽपि कलङ्कमारोपितवानसि। अयि दुरात्मन् भीष्म, किमेवं पतिवरां कन्यां परस्य शङ्कनीयां विधाय विधूतवानसि। धिग्धिङ् मम बुद्धिमान्द्यम्। यन्मया हरणकाले साल्वपराजयकाले वा 'जहिहि मामन्यकामाम्' इत्यावेदयन्त्या रथादवप्लुत्य न पलायितम्। इदानीं किं करिष्यामि। कथं भविष्यामि। हा दुहितृवत्सले अम्ब, पश्य पश्य ते प्रेयसीं दुहितरमम्बाम्। 'इति विक्रोशन्ती, आतपमध्यपतितक्रमिवत्परितप्यमाना यांकामपि दिशमुद्दिश्य प्राद्रवत्। चिररात्राय हाहाकारेण प्रधावन्ती सा क्वचिदरण्ये तापसानवलोक्य सरभसमभिगम्य शरणं शरणमिति साक्रन्दमन्तिके न्यपतत्।

तथा निपतितां तां निशाम्य, निशाम्य च तदुदन्तमादितः, कृपया परिप्लुतचेतसां तेषां तापसानां महान् समाजः समजायत। तत्र वयसा तपसा च वर्षीयानृषिः **शैखावत्यो** नाम सामाजिकानामन्त्य तद्वृत्तमशेषतः श्रावयित्वा व्याजहार—भो भोः सदस्याः, एवं स्थितेऽत्र कथमितिकर्तव्यता भवतु। कुत्र वा अपराधो विश्राम्यति। तद्विविच्य ब्रूत। गहना हि धर्मस्य गतिः। तमनिर्धार्य यत्किंचिद्विब्रुवाणेषु सभ्येषु सांक्रामिको रोग इव सहसावत-

रेदधर्मः। शरणार्थिनि कृपणजने करुणामकृत्वा निरसनमपि नास्माकं समञ्जसम्। परा तपस्या हि दुःखिषु करुणा तापसानाम्। अतो विचारवैशाखेन निर्मथ्य विवादसागरं, उपाददीमहि तत्त्वामृतम्।

तत्र कश्चित्स्वमतमाह—अत्र त्वनया कन्ययैवापराद्धं, न भीष्मेण, नापि साल्वेन। क्षत्रधर्मं पुरस्कृत्य वीर्यशुल्कप्रदानेन कन्या मानयित्वा, यथाविधि परिणयाय कृतव्यवसायो हि भीष्मः। स कथं निन्द्योऽस्तु। ततः प्रवर्तमाने सामिकृते च विवाहे, तमवधूय स्वैरं प्रस्थितायामस्यां, एतद्विसर्जनादृते किमन्यदञ्जसा कृतं भवति। एतस्याः कृते द्विरभियुञ्जानः साल्वोऽपि दैवदौर्बल्येन दुर्बलीभूतः कथमुपालम्भनीयोऽस्तु। अन्याक्रान्तमामिषं कथमिव क्षत्रसमयमनुवर्तमानेन ग्राह्यं भवतु।' इति। अपरस्तं पक्षमधिक्षिपन्नाचचक्षे—'ननु भोः, कथं साल्वमनागसं मन्यसे। पश्य। अन्तरेण गुरुजनसंवेदनं, अन्तरेण वेशजनेन प्रियोपदेशमन्तःपुरगतं शिशुजनं प्रलोभ्य, तत्प्रत्ययेन हस्तगतं मङ्गलमपास्य, मा भूवमन्यकामा, अन्यरामा चेति स्वयमार्जवेन स्वाशयाविष्करणपूर्वकमापतितमबलाजनमभिभवन् सौभपतिर्हि शासनीयः' इति। तावुभावपि पक्षौ निरस्यन्नितर उदाजहार—ननु विषम उपन्यासः। सत्यपि सर्वानर्थहेतौ भीष्मे, कथं साल्वमुपालभते भवान्। न हि साल्व इमां प्रतारयितुमुद्यतः। तथा सति पुनरप्येत-

दर्थे संग्रामकथैव नाभविष्यत्। किंतु चारित्रशङ्कितो हि प्रत्याचष्टे। तत्र किमुत्तरं भवतः। यतः शङ्कितं चारित्रं, तेन हि तत्र परिहारोऽन्वेष्टव्यः। तदकुर्वन् भीष्म एवात्र मन्तुमान्, न साल्वो, नापि कन्या' इति। अथान्यः कश्चिदाह—न मे रोचते भवतां व्यवसितमेतत्। क्व नु कामक्रोधादिपुरस्कृतो राजकीयोऽयं व्यवहारः, क्व चारिषड्वर्गनिग्रहपरा वयम्। इयमद्यैवास्माभिः पितुर्गृहं नेतव्या। एतदेव शरणागताया अस्या अस्माभिः कर्तव्यम्। शेषमस्य पिता चिन्तयिष्यति। स हि शक्नोति भीष्मं साल्वं वा सामादिना वरत्वेन विधातुं, पुनः स्वयंवरकरणेन वा वरान्तरं संपादयितुम्।' इति। तदाकर्ण्य शैखावत्यः प्रोवाच 'वत्से अम्बे, प्रतिष्ठस्व ते पितुर्गृहाय। वयमपि साह्यायागच्छामः' इति। सा तु तं प्रणम्य निवेदयामास—भगवन्, इदमवस्थाहं न गमिष्यामि बन्धुजनसकाशम्। तदुपदिशत तपोनियमान्। अत्रैव तपस्यन्ती, जन्मान्तरेऽपि यथा नैवंविधा भवेयं, तथा यतिष्ये' इति। स तु तां पुनरूचे 'अयि राजपुत्रि, अशक्यं त्वया दुश्चरं तपश्चरितुम्। परं च। सुरूपा युवतिरसि। तदवश्यमनर्था आपतेयुः। तदलमनेन व्यवसायेन' इति।

अत्रान्तरे सृञ्जयेश्वरो **होत्रवाहनो** नाम यदृच्छया तत्रागतस्तैः सत्कृतः, तन्महाजनमध्यमलंचक्रे। अथ वर्णिते तत्समा-

जकरणकारणे, संभ्रान्तः स राजा 'किमियं काशीराजस्य कन्या अम्बा । स हि मे जामाता । इयं च मे दौहित्री । कथमिदं संवृत्तम् । एह्येहि वत्से' इति तामादाय, स्वाङ्के निधाय कथमिदमवस्थासि संवृत्ता' इति मुक्तकण्ठं प्ररुरोद । तमनुरुदितायां तस्यां च, कृत्स्नमेव सदस्तद्दुःखदुःखितं सन्मुहूर्तं करुणरसैकतानमवृतत् । तदनु मुनिभिराश्वासितो भूपतिस्तामाह—अयि जाते, मुञ्च शोकम् । अनेनैव पथा तव पितुर्गृहं त्वां नीत्वा, ततो यथोचितं विधातास्महे । अथ न मन्यसे तत्र गन्तुं, मम गृहमागच्छ । न हि स्त्री क्वचिदप्येकाकिनी स्थातुमर्हति । समेषु भर्ता, विषमेषु पित्रादयो बान्धवास्तस्याः परायणम् । अतः प्रतिष्ठस्वेति । सा च तं प्रत्यूचे—' आर्य, नाहमेवं दुर्दशापरीता बन्धून्दिदृक्षे । तदन्तरा, यथात्र शं विधातुं क्षमं, तच्चिन्तय । यतरोऽनयोरपराद्धस्तस्मिन्दण्डमपातयित्वा कथमुपशाम्येयम्' इति ।

तदन्तरे तत्रागतो जामदग्न्यानुचरो मुनिः **अकृतव्रणो** नाम तदुदन्तमाकर्ण्य प्रोवाच—'भो राजन्, श्वः प्रातरिहागमिष्यति भगवान् जामदग्न्यः । अवश्यमपनेष्यत्यस्याः शोकं स कृपणवत्सलः । तावत्प्रतीक्षध्वम् ' इति । साधुवादेनानुमोदिते तद्वचसि, परेद्यवि पुनः समुदिते विवस्वन्मण्डले वैखानसमण्डले च, प्रादुरभूवाखण्डितब्रह्मचर्यनिष्पन्नेन ब्रह्मवर्चसेन द्वितीयो भास्कर

इव भ्राजमानः, समावृण्वता मुनिगणेन नक्षत्रगणेन द्विजराज इव राजमानः, डामरकडारेण जटारोचिषा समिद्धजिह्वः सप्तजिह्व इव दीप्यमानः, प्रथमस्तपतां प्रहरतां च, एकायनं तैक्ष्ण्यस्य मार्दवस्य च, हर्ता सर्वक्षत्रजातेः, कर्ता समन्तपञ्चकस्य, आहर्ता महाक्रतोरश्वमेधस्य, पारदृश्वा विद्यानाम्, दाता निखिलवसुधावलयस्य, त्राता प्रपन्नानां, भगवान् **परशुरामो** नाम महामुनिर्जामदग्न्यः ।

सपदि प्राञ्जलावुत्तिष्ठति समाने विधिवदभ्यर्चितस्य तस्य मुनेः शासनेन पुनर्यथोपवेशमुपविष्टे, प्रवर्तमानेषूच्चावचेषु लोकाभिरामेषु व्याहारेषु, तदन्ते राजा सृञ्जयः रत्नां दौहित्रीं तस्य पादयोर्निपात्य, स्वसंबन्धकथनपूर्वकमस्या व्यसननिदानमावेद्य 'प्रपन्नबन्धो भार्गव, एषा मम दौहित्री भवन्तं शरणं प्रपन्ना । देह्यस्या अभयवाचम्' इति ययाचे । तद्दुःखदुःखितः सोऽपि तामुत्थाप्य पप्रच्छ—वत्से, कृतं रोदनेन । अवसितदुष्कृतफलासि । तवायं मातामहो मम परमसुहृत् । सुखदुःखयोः समवस्थता हि सौहार्दम् । तदस्माकमेवेदं दुःखं, न तव, नापि ते मातामहस्य । तद्विस्रब्धं ब्रूहि । परं च । शरणमप्रपन्नोऽपि स्वयमभिगमनेन रक्षणीयो हि विपन्नो जनः । किं पुनः शरणं प्रपन्नः । अतो निःशङ्कं कथय तेऽभिमतम् । नास्म-

च्छासनमतिवर्तेत भीष्मः साल्वो वा। कथय कतरो नियुज्यतां ते प्रियाकर्ता।' इति। तस्यां तु भीष्मं जहि, एतदेव मे प्रियं भविष्यतीति निवेदयन्त्यां, स पुनरुवाच, 'अयि, नूनं क्षत्रियाण्यसि, यदीदृशेऽपि व्यसने रौद्र्यं न जहासि। तव स्वीकरणाय भीष्मनियोग एव पूर्वः पक्षोऽस्तु। स यदि पूर्वपक्षतयैव निष्पद्येत, तदा तवायं मनोरथः सिद्धान्ततायै संपत्स्यते।' इति। सर्वैरभिनन्दिते स्ववचसि, तं राजानमापृच्छ्य स जामदग्न्यस्तां कन्यामादाय सहमुनिमण्डलः कुरुक्षेत्रमाजगाम।

भीष्मस्तु तदागमनमवगम्य यौजनशतिकतयाचार्यस्य, कृतसंभ्रमः, पूजोपकरणेन सह तत्संनिधिं प्राप्य सविनयमभिवादयामास। विधिवदुपसन्ने तस्मिन् कृतप्रसादः स प्रियोपचारो भार्गवस्तदर्हामाशिषमाशिशासिषमाण इदं जगाद—वत्स देवव्रत, प्रश्रयवानसि प्रतीक्ष्येषु, अनिर्मूढोऽसि कर्तव्येषु, चतुरस्रबुद्धिरसि बोद्धव्येषु, दूरेत्योऽसि प्रमादादिदोषाणाम्, प्रथमोऽसि वृत्तवताम्, अग्रणीरसि वीराणाम्, अचरमोऽसि गुरुभक्तानाम्। ईदृशस्य ते किमन्यदाशास्यं विद्यते। तदेवमाशास्महे—यद्वृत्तोऽस्यधुना, एवमेवाखण्डितचारित्रः पुरुषायुषजीवी जीयाः' इति। अभिमतेन तेनाशीर्वचनेन द्विगुणितभक्तिरेप भीष्मः प्राञ्जलिर्निवेदयामास——भगवन्, नेयमाशीः, वरो ह्ययम्। इयमेव मे

हृदयपरिवर्तिन्याशंसा, यदस्खलन्नेव शीलवर्त्मनोऽन्तं गच्छेयमिति। सा च शिष्यप्रियेण भगवता प्रसादीकृता। यच्च किमप्युपचर्यते समीचीनमिवाचरितमस्मिन् जने, सोऽपि भगवदनुग्रह एवेत्येतद् व्याचष्टे हि पितृभक्तत्वनैष्ठिकत्वादिकमेकजातीयकमुभयत्र। यथा देहसारूप्यं जन्यजनकयोः एवं वृत्तिसारूप्यं शिष्योपाध्याययोर्नियतमेव। एवं प्राञ्जलेन वचनेनाभिष्टूय, पुनः पप्रच्छ 'भगवन्, आप्तकामा हि भवन्तः। अतो न युज्यते किमपेक्षितमेव प्रचलनस्येत्यनुयोक्तुम्। महार्घकाला हि तपोनिष्ठाः। न ते क्षणमात्रमपि निरर्थकं क्षेप्तुमुत्सहन्ते। अतोऽनुमीयते बलीयसी काचिदितिकर्तव्यता भगवतो मनसि वर्तत इति। दृश्यते हि निरपेक्षाणामप्यनुग्राह्यजनेषु वात्सल्येन सापेक्षाणामिव क्वचिद् व्यवहारः। तदादिश्यतां कमुद्देशमपदिश्य सुदिनायते भगवानिमं दिवसम्।

सोऽपि सश्लाघमूचे--सम्यगुपन्यस्तं वत्सेन। निपुणोऽसि पराशयज्ञाने। नूनमधुना त्वदनुशासनमावश्यकमध्यवसाय, अपास्य तपस्यां, सत्वरमभिपतिताः स्मः। तदवहितः शृणु। अयि गाङ्गेय, प्रत्यहमापूर्यमाणेन नवनवेन प्रथाविशेषेणापूर्यमाणपक्षगतः कलानाथ इव कलाविशेषेण निःशेषमाह्लादयसि भुवनतलं, विशेषतोऽस्मान्। तस्य तव कोऽयमिमां कन्यामधिकृत्य

कलङ्कावतारः । प्रतायते हि त्वां प्रति तत्र तत्र दुःश्रवा किंवदन्ती । प्रायेण परोत्कर्षासहिष्णवो हि लोकाः। निर्दुष्टमपि चेष्टितं दुष्टतया व्याकर्तुं क्षमा खलु खलजिह्वा, किं पुनः स्वभावदुष्टम्। अतो हि विधातृशक्तिमप्यतिरिच्यते दुर्जनजिह्वा । पदार्थानां गुणदोषौ यथास्वमेव विवरीतुं प्रथते प्रथमा, तद्वैपरीत्येनापि दर्शयितुं चतुरा हि चरमा । अनुपेक्षणीयश्च सदाचारसंपन्नेनापि लोकमध्यपतितेन दुर्मुखोऽपि लोकः । शृणोष्येव निर्दोषामपि लोकापवादभयेनान्तर्वत्नीं स्वजायां परित्यक्तवतो महात्मनः काकुत्स्थस्य चरितम् । तद्वत्स, अस्या राजपुत्र्या गतिं विधाय शीघ्रं प्रमृड्ढि कौलीनं, यावन्न सर्वकर्णीनतामश्नुते ।

तदाकर्ण्य भीष्मः सव्यथमिदमूचे- ‘ अत्यद्भुतमेतत्, यदीदृशान्यक्षराणि भगवन्मुखात्प्रादुर्बभूवुः । कामं प्रलपतु नाम जघन्यो जनः । यदि विशेषज्ञा अप्येवमपरामृश्य तत्त्वं, यत्किंचिदुपन्यसितुमुन्मुखा भवेयुः, तदा नास्त्येव विशेषो विशेषपदप्रयोगस्य जानातेर्वा । इयं खल्वम्बा तदवरजाभ्यां सह राज्ञो विचित्रवीर्यस्य दारार्थं वीरसमयेन समानीता समुपस्थापिता च माङ्गलिकाय विधये । ततः प्रवर्तमानेऽभ्युदयकर्मणि, सैषा ममान्तिकमुपधाव्य साल्वमात्मनः कमितारं श्रावयन्ती, तथा विसर्जनमर्थयते स्म । अथ पारिषद्येष्वपि परित्यागमेवास्या विहितवत्सु,

तथैत्येनां सुगुप्तां सान्त्वाय प्राहिणवम्। किमत्र मम दुष्कृतं, यदवश्यं परिहर्तव्यं भवेत्। पुनः पप्रच्छ गुरुः—बाढमुदारमाचरितम्। अथ साल्वोज्झितायामस्यां का तव प्रतिपत्तिः। शिष्यः—वितीर्णानुमतिर्मयैतत्परिग्रहार्थं मत्तः समुद्विग्नः साल्वः। गुरुः—शङ्कितो ह्येनामसौ तत्याज, नोद्विग्नः। शिष्यः—यदि नोद्विग्नो न जाने शङ्काकारणम्। गुरुः—किं न जानीषे। त्वत्परामर्शेन शङ्कास्य। यतः शङ्कितं शीलं, तेन परिहारोऽन्वेष्टव्यः। शान्तं पापमिति कर्णौ पिधाय शिष्यः प्राह—कथं भगवतोऽपि मुखतीयं विजातीयमिदमभिशंसितम्। अनभ्यन्तरः खल्वहमीदृशस्यानर्हव्यवहारस्य। यद्यत्र किमप्यकार्यमभविष्यत्, तदा भगवानेव विमृशतु कथमभ्युपैष्यदासां वधूत्वेन स्वीकरणं जननी विचित्रवीर्यस्य। अतो मा पुनरेवमुपन्यस्थदाचार्यः। यत्तूच्यते यतः शङ्कितमिति तन्न तथा, येन शङ्कितं तेनैवान्विष्यतां, किमनया चिन्तयास्माकम्। गुरुः—मास्त्वकार्यम्। हरणमात्रेणाप्यपराद्धो हि भवान्। किमस्त्यधिकारो ब्रूहि नैष्ठिकव्रतधरस्य कन्याहरणे। शिष्यः—अस्त्यधिकारः प्रसह्य हरणे क्षत्रियस्य। ननु क्षत्रिया हि वयम्। यत्किल व्रतविलोपे तदेव प्रतिषिध्यते व्रतिनाम्, न त्वव्रतलोपी स्वधर्मोऽपि। हरणं स्वधर्म इत्युक्तम्। पुत्रसमानो हि यवीयान् भ्राता। ततः स्नुषास्थानीया भवति तद्भार्या। गुरुजनायत्ता खलु जनीजनस्य चारित्रगुप्तिः। तस्मिन्नेव जने विशेषतो

व्रतिनि यदि शङ्कोदियात्, अनाश्वासस्तदा सर्वत्र विश्वासस्य । न च तथा हरणेन कन्या दुष्यति। शकुन्तकुलान्तरपतितमामिषमिवोपर्युपरि वीर्यतारतम्येन हस्तात्हस्तिकया प्रशस्तबलस्य कस्यचिद्धस्ते पतति । ततः परमेव जननीगर्भाशयं प्रविष्टस्यानुशयिन इव स्वत्वाभिमानपुरःसरो गुणदोषव्यवहारः । प्राक् त्वापणस्थपण्यवस्तुन इव नास्त्येवाशुद्धिर्वर्योषाः । एवं स्थिते किमत्र ममापराद्धम् । गुरुः—अङ्ग, प्रशस्तबलस्य हस्ते पततीत्यनेन नान्तरीयकं खलु त्वदायत्तत्वमस्याः । तस्माद्ग्राहयेनां ते भ्रात्रा । शिष्यः—ननु पाणिग्रहणाय कृतावसरं वरमवमत्यान्यं पुमांसं प्रति चलितां कथं पुनर्ग्रहणाय नियुज्यतामनुजोऽपि राजा । गुरुः—यदि तथा कर्तुं नाभिप्रैषि, तर्हि कास्या गतिः । शिष्यः—साल्वो ज्ञातिजनो वा । गुरुः—साल्वो न कामयत इत्युक्तम् । कथं च वा स्वयमेवमवमता ज्ञातिकुलं दिदृक्षेत मानिनी । शिष्यः—तर्हि यथा भगवते रोचते । गुरुः—एव मे रोचते । यथान्याय्यमन्याय्यं वास्तु हरणम् । सर्वथा त्वत्परामर्शनिमित्तमस्या व्यसनम् । अतस्त्वयैव तत्परिहाराय परिगृह्यतां, किमन्याभ्यर्थनया । शिष्यः—केयं वार्षिकी गिरिनदीव कलुषा कूलमुद्रुजा च वाणी । स्वाभाविकेन रागादिदोषेण विपथेन प्रविवृत्सन्तमपि शिष्यजनं बलाद्व्यावर्त्य स्वाचारे स्थापयन् खल्वाचार्यो भवति । स स्वयमेवाकार्ये प्रवर्तयति यदि, ततः किमाचार्यकं

शैष्यकं वा। गुरुः—ननु प्रज्ञावादिन्, कथं गुरोर्वचनेऽपि ते कार्याकार्यचिन्ता। शिष्यः—न खलु निभालयामि यत्किंचिदपि गुरोर्वचनमिति कृत्वा कार्यं वा, उत कार्याकार्ये विमृश्य न्याय्यं वदन् गुरुरिति गौरवार्पणार्हो वा। गुरुः—असंबद्धवादी भवानित्युक्तं भवति। शिष्यः—न तथा, अपि तु पौर्वापर्यं विमृश्य युक्तमुपदेष्टव्यमिति। गुरुः—अथ वा किं वाक्प्रपञ्चेन। किमस्माकं वचसि त्वया स्थीयते न वा। शिष्यः—स्थीयतेऽन्यत्राकार्यात्। गुरुः—तर्हि न स्थीयत इत्युच्यताम्। शिष्यः—न स्थीयत एवाकार्येषु। गुरुः संरब्धमाह—कथमस्मदुक्तेष्वकार्यत्वम्। वत्स अकृतव्रण, धनुर्धनुः। शिष्यः-मास्तु संरम्भः। गुरुः-तर्हि गृहाणेमाम्। शिष्यः—भगवन्, केयं विभीषिका। न खलु भीतो भवन्तमनुनिनीषति भीष्मः। वर्षीयान् ब्राह्मणो गुरुरसीति खलूपसान्त्वयति। अतः शाम्यतु। गुरुः सप्रहासमाह--एहि मन्ये गुरुं विजेष्यसे, क्षत्त्रान्तको हि जामदग्न्यः। शिष्यः—किं बहुना। यदि योद्धव्यमेव, श्वः प्रातः प्रत्युत्तरयिष्यति भगवदुपदेशसंक्रान्तिरेव। एष साधयामि। इति तं प्रणम्य, ततो लब्धानुमतिः पुरमवाप।

अथ परेद्यवि दिवमुच्चरमाणेषु दिवसकरकरेषु, समराय कुरुक्षेत्रं गतो भीष्मो जयमाशास्तां भगवानिति मुनिं ववन्दे। तया तस्य विनयसंपदा प्रवणो भार्गवः प्राह ‘अयि गाङ्गेय, त्वज्ज-

याशंसिनो हि वयम् । प्रस्तुतप्रतीपं खल्वधुना तव जयाशासनम् । तस्मात्सिध्यतु ते जयवर्जं सर्वं समीहितम् ' इति । तद्वचनमनुमोदमानोऽसाविदमूचे--नन्वाशासितजय एवास्मि 'त्वज्जयाशंसिनो वयं ' इति मत्कर्तृकं जयमाशंसमानेन भगवता । अनयैव भवत्कृपया आशासे सर्वत्र विजयी भवेयम् । इत्यभिधाय पुनरर्थयामास——यच्चासंवर्मितेन भूमिष्ठेन च भवता सह रथी कवची च सन् प्रतियुध्येय । अन्याय्यं हि तत् । तत्प्रतिगृह्यतां सोपस्करः सांग्रामिकोऽयं स्यन्दनो भगवतेति । स च सश्लाघमूचे--वत्स, उचितज्ञोऽसि कर्तव्येषु । यद्येवमभिवादको नागमिष्यस्तदास्माभिः शप्तोऽभविष्यः । तदप्रमादेन युध्यस्व । संपन्ना एव वयं सांग्रामिकोपकरणसामग्र्या । द्रक्ष्यस्यनुक्षणमेव तत्सर्वम् । प्रीणयास्मानस्मत्संक्रान्तिषु प्रतिभानदर्शनेनेति तं विससर्ज । तावदेव जगत्यां विततीभवति तदुदन्ते, महावीरयोस्तयोर्विक्रमदिदृक्षया दिवि भुवि च महान् जनसमवायः सममहंप्रथमिकया स्वयं समवैति स्म । तत्र च ऋचीकादयो मुनयो रामतोऽभवन्, वसवस्तु भीष्मतः ।

भीष्मस्तु पुनः स्वस्थानमेत्य संनद्धो यावत्पश्यति, तावदभ्यर्णमवतीर्णं ज्योतिर्मालिनमिव विराजमानं स्यन्दनमधिष्ठाय शरानस्यन्तं जामदग्न्यमवलोक्य विस्मितः किमिदमिति निपुण

निरूपयामास । तदन्तरे 'कथं प्रणाय्येनात्मनश्छात्रेण सह कलहायसे' इति जामदग्न्यं निवारयन्ती देवी जाह्नवी 'अनुशाधि गुरोरविधेयमात्मजं' इति तेन प्रत्युक्ता पुत्रमुपगम्य सनिर्बन्धमिदमुवाच 'वत्स शान्तनव, किमिदं ते साहसं, यदात्मनो ज्ञानतीर्थमेव क्षोभयितुमुद्यतोऽसि । अशक्यं चात्र वृथापवादपङ्कक्षेत्रीभवनादृते समीहितपारं गन्तुम् । पश्य पश्यास्य तपःप्रभावोपढौकितानि सांग्रामिकोपकरणानि । स्वयं स्यन्दनायते ह्यस्य वादान्यकगुणावर्जितेयं काश्यपी । वाहायन्ते ननु वृत्ताध्ययनवशीकृताश्चत्वारो वेदाः । गोपायन्ति ह्यापादमस्तकं जपप्रसादिता वेदमातरो मातर इव स्वतोकम् । पश्य पश्योभयपार्श्वरक्षिणौ सुभटाविवास्युद्यतौ सत्यधर्मौ । समुत्तेजयति हि शरान् फलानुप्रपातं निर्व्याजतप्तितर्पितं तपः । समाधिसमाराधितोऽसौ मातरिश्वा स्वयमश्वचोदनयैनमुपास्ते । तदलमत्र विरोधेन । अथामुं जय्यं मन्यसे, तथापि न युक्तम् । पूज्यो हि वेदवान् वर्षीयांस्तपस्वी च द्विजातिः, विशेषतो गुरुः । तदुपसंहर संप्रहारकुतूहलं, आचर तदविचारितं यदादिशति ते देशिकः ।

तदाकर्ण्य पुनरुक्तकौतुको गाङ्गेय इदमुदाजहार—मातः, सर्वमुपपन्नमस्मद्गुरौ । अत एव मे बलवती तेन सह युयुत्सा । वरीयसा सह व्यायामः प्रसूते प्रथीयसीं प्रथाम् । प्रार्थनीयं

खल्वीदृशं प्रधनं बलावलेपलिप्तेन । यदि तदनिच्छयोपगच्छति, कस्तदुज्झितुमिच्छेत्पौरुषाभिमानी । अतो बहुमन्तव्या हि वैधर्म्य-वृत्त्यापि मम प्रियैषिण्यम्बा । विरतोद्यमे तु मयि, नूनं कलङ्कितैव भवेद्राजन्यकजन्यकलिता कीर्तिः । शक्त एव तेजस्विना तेजस्वी तपस्विना च तपस्वी ते पुत्रः प्रतिद्वंद्वीभवितुम् । मा च तदुपक-रणभूता वेदादयः पीड्येरन् । गुरुवन्ममापि रक्षणीया हि ते । अतस्तदपीडयैव तस्मिन् प्रहरामि । पश्य मे करकौशलम् । अस्ति ह्यस्मद्गुरौ मातृकं क्षात्रं, पैतृकं ब्राह्मण्यं च । अनुपमृद्यैव द्वितीयं क्षात्रे प्रहरेयम । परं च । तपस्वी ब्राह्मणो हि न हन्तव्यो न तु काण्डपृष्ठः । तस्य क्षत्रियतुल्यत्वात् । यत्तूच्यते गुरोः शासनं नातिक्रमणीयमिति, तदपि युक्त्यादिपरमेव, न पुनः कार्या-कार्यपरामर्शविधुरं स्थानबलोद्धतमधिकृत्य प्रवृत्तम् । कथं मम व्रतविरुद्धं शासदयमशासनीयोऽस्तु । किं बहुना । इममात्मानं वापि जह्यां, न पुनरात्मना परिगृहीतं व्रतम् । एष मे सर्गः । धर्मो मां रक्षतु । विस्रब्धा भव' इति तामुपसान्त्व्य, कालवर्षी पर्जन्य इव शरासारवर्षी मुनिमभिजगाम ।

ततः प्रवृत्ते महति तयोः शरसंपाते, पतत्रिभिरिव पत्रिभि-राक्रियमाणेषु हरिदन्तरेषु, ओतप्रोत इव नीरन्ध्रीभवत्यन्तरिक्षे, छिन्नभिन्नैरस्त्रशस्त्रैरास्तीर्यमाणे समराङ्गणे, शस्त्राशस्त्रिसमुत्थेन

चटचटात्कारेण समापूर्यमाणयोर्द्यावापृथिव्योः, प्रतिक्षणं ज्याघोषेण शङ्खघोषेण च क्षुभ्यमाणमानसेषु लोकेषु, सर्वतः प्रज्वलत्यग्नौ, तं शमयति पर्जन्ये, तं विधूनयति महावाते, तं स्तम्भयति पर्वते, तं विदारयति दम्भोलौ, तं निरस्यति कालदण्डे, तदपि निवारयति विष्णुचक्रे, तथा क्षणं सूचिभेद्येन संतमसेन समाव्रियमाणे विव्रियमाणे च सहस्रकिरणेन जगति, सर्वाद्भुतमनयोः करकौशलं सश्लाघमभिनन्दति कलहकुतूहलिनि देवर्षौ, नियमभृतोस्तयोरवहारकालमादिशन् प्रादुर्बभूव सायंतननियमकालः। पुनरुदयेन साकमहस्करस्य समुदिते संगरे तदस्तमयेन सह विश्राम्यति, तेनैव क्रमेण व्यतीतेष्वधिकविंशेषु वासरेषु, द्वाविंशे दिवसे, चिराय समयं प्रतिपालयन् स तालध्वजोऽन्तरमुपलभ्य तालद्वयसमुत्तालदर्शनं तन्महामुनेश्चापं लस्तके बभञ्ज। भङ्क्त्वा च स तेन गृहीत गृहीतं चापं प्रागेव ज्यासंयोगाद्विरुध्य भुवि पातयन्नपि तद्गौरवेणेव ज्यासंयोगानपेतं विदधे। अथ प्रकुपितेन सूतं सूदयता तेन मुनिना निसृष्टा कालायसमयी शक्तिर्विधूय सर्वाणि प्रत्यस्त्रशस्त्राणि महाबिलमुरगीव भीष्मस्य हृदयं प्रविवेश। तत्क्षणं निरर्गलमुद्गलितेन रुधिरेणोक्षिते विसंज्ञे रथात्प्रपतति तस्मिन्, आः किं मयाचरितमिति पर्याकुले गुरौ, सर्वतः समुद्भूते हाहारवे, विष्टब्धेषु विष्टपेश्वरेषु, एकाकाश्या केवलं दिष्ट्या हतोऽसि कन्याशत्रो, दिष्ट्या कृता मे वैर-

शुद्धिरिति सहस्ततालं रणकालीव ननर्त । तावन्नभसोऽभिपतितेषु तथा पतन्तं तमभूस्पृशमेव धारयमाणेषु वसुषु, ससंभ्रममभ्यागता तन्माता मन्दाकिनी स्य स्तनंधयमुत्सङ्गे निधाय प्रहरणमपास्य, शीतमेन पाणिनाङ्गानि प्रमृज्यात्रणं विदधाना, मुखसुंचारितेनारविन्दमकरन्दमादायचरेण तरङ्गशीकरमुष्टिधयेन मन्दमन्देन गन्धवहेनाश्वासयन्ती, क्षणेनोल्लाघमेनं स्यन्दनमारोप्य तद्रश्मीन् जग्राह । समाश्वस्तो गाङ्गेयो मातरमूचे—अम्ब, कृतमेतावता साह्येन मे । मा तु ते सूतकर्मजं क्लेशान्तरम् । शक्त एवाहं स्वयमेव सारथ्यं कर्तुं प्रहर्तुं च । न च मे परबलेनात्मनि मिथ्यागौरवमारोपयितुं सांप्रतम् । रक्ष मामेव विषमेषु । तदेवालं' इति तां निवर्त्य, स्वयमेव वाजिनो नियोजयन्, वाजवतो योजयंश्च मुनिमभियुयुजे । अभियुञ्जान एव स जिह्मगप्रतिमेनाजिह्मगेन तस्य भुजान्तरे प्रविव्याध । तेन बलवन्मर्मणि ताडिते क्षणमुपगतकश्मले तस्मिंस्तापसेन्द्रे, समुत्पेतुर्दिवि भुवि च बहुविधान्यौत्पातिकानि दुर्निमित्तानि । संप्रचेरुश्च तं प्रहर्तारमधिकृत्य, अयि गुरुद्रोहिन्निति, ब्रह्महन्निति, तपस्विकण्टकेति, कृतघ्नेति, दुःश्रवा विविधा वाचः । समवतेरुश्च समं भीष्मस्य मनसि भयकरुणबीभत्सरसाः । तावदपेतमोहे तिष्ठ तिष्ठ रे क्षत्रबन्धो, इति पुनरुत्तिष्ठति मुनिवरिष्ठे, दिष्ट्या वर्धामहे इति समुद्भूतसाराविणे, मुनिसमाजे, पुनरनुसंधीयमाने शरसंधाने, तयोर्विश्रान्तिमादिश-

न्निरचक्षुर्विषयो बभूव जगच्चक्षुः ।

अथ चतुर्विंशे वासरे भृशममर्षकलुषेण भार्गवेण ब्रह्मास्त्रे प्रयुज्यमाने, अनुप्रयुज्यमाने च तस्मिन्नेव कौरव्येण च, तदुभयतेजसा धूमायमानेषु भुवनकोशेषु, ऊष्मायमाणेषु लोकपालधिष्ण्येषु, निष्पच्यमाने पाथोनिधिपाथसि, अत्याहितमत्याहितमिति क्रान्दिशीकेषु वैमानिकेषु, संहर संहरेत्युच्चैर्निषेधन्तो नारदादयः ऋचीकादीनृषीन् हैमवतीं च पुरस्कृत्य ससंभ्रममभिदुद्रुवुः । तदन्तरे प्रस्वापास्त्रमभिमन्त्रयमाणे भीष्मे, मास्तु मास्त्वित्युपरुन्धन्तस्ते, नाहं प्रथमं विरमेयमित्युदीरयति तस्मिन्, विरम विरमेति मुनिं निवारयन्तः, विरमतु क्षत्त्रबन्धुरिति तस्मिन् प्रत्युदीरयति, पुनः पुनरुभयत्र प्रधावन्तोऽपि नाहमग्रे नाहमग्रे इत्युदीर्य, शरसंयोगान्वेषिणोस्तयोः, तदन्तरेऽवतरन्तः कथमपि जामदग्न्यं विनीतसंरम्भं वितेनुः । अथ जितोऽस्मि भीष्मेणेति वदति तस्मिन्, दिवः पतता पुष्पवर्षेण सह गुरोश्चरणौ पीडयन् भीष्मः क्षम्यतां ममेदं साहसमिति तमुपसान्त्वयामास । सोऽपि तमाश्लिष्य शश्लाघे—वत्स, अन्यादृशं तव विक्रममाकर्ण्य तत्प्रत्यक्षयितुं प्रथयितुं च वयं प्रवृत्ताः । तन्नास्त्यस्माकं मनागप्यक्षान्तिकारणम् । काङ्क्षितः खलु सर्वविजयिनोऽपि स्वशिष्यात्पराजयः । तत्प्रीता एव वयम् । चिरं जीवेत्याशास्य, अम्बामाह—अयि राज-

पुत्रि, त्वत्कृते कृतमस्माभिर्यावच्छक्यम् । इतः परं त्वमेवान्विच्छ, यत्ते साधीयः । वयं साधयामः' इत्युक्त्वा शिष्यैः समं महेन्द्रगिरिं प्रपेदे । स्थूणानिखनन्यायेन द्रढिमानमापादितेन तेन व्रतस्थेम्ना प्रकाशमानो भीष्मः समभिष्टूयमानो लोकैः पुरं प्रविवेश ।

इति श्रीभीष्मविजये व्रतस्थेमा नाम
चतुर्थ उल्लासः ।

एवं निवृत्तेऽपि जामदग्न्ये, स्वयमनिवृत्तसंकल्पा सा कन्या स्वयं युवजरती भूत्वा तीव्रेण तपसा महेश्वरमाराध्य, ततो भीष्मवधाय वरमवाप्य स्वतनुमग्नौ जुहवामास । हुत्वा च सा क्षिप्रमेव पञ्चालेश्वरस्य राज्ञो **द्रुपदस्य** दुहितृत्वेन पुनर्जन्म लब्ध्वा, **स्थूणाकर्णा**ख्यस्य यक्षस्य प्रसादेन पौंस्त्वमासाद्य **शिखण्डी**-ति विख्यातिं प्राप्य प्रवाहरूपेण जन्मान्तरेऽप्यनुवर्तमानं पूर्ववैरं पारयितुं समयं प्रतीक्ष्यावतस्थे । यदैतदैतिह्यं नारदादशृणोत्स महाव्रतो भीष्मः, तदैव प्रत्यशृणोत् 'नाहं स्त्रिया स्त्रीपूर्वेण वा कथमपि प्रतियुध्येय' इति ।

विचित्रवीर्यस्तु यदा ते अम्बिकाम्बालिके दारानवाप, तत आरभ्य स्त्रीमय एवाहोरात्रानपगमयन् क्षेत्रियेण यक्ष्मणा क्षेत्रीकृतो नातिदीर्घेण कालेनोपरतो बभूव ।

अथ भ्रातृव्यसनविषण्णं निर्विण्णमिव निरुद्यमं भीष्ममाहूय कार्यज्ञा सा राजमाता व्याजहार—तात शांतनव, अपौरुषेयी वागिव स्वतन्त्रा हि नियतिः। सुप्रणीतयापि न सा पौरुषेय्या वृत्या प्रसाद्यते। यत्र स्वयमेव सा प्रसीदति, तत्र पुरुषशक्तिः सागरगामिन्यां महानद्यां पतिता कुल्येवात्मन्यपि महत्त्वमारोपयति। तव पिता हि सत्यपि महात्मनि त्वय्यात्मजे, सुतबाहुल्येन कुलं विस्तारयिष्यन् किल पुनर्मामुदवहत्, उदपादयच्च द्वावात्मजौ। तदसहिष्णुना दैवेन समूलकाषं कषिते पितुरभिलाषे, विश्वस्तामात्रशेषेऽन्तःपुरे, अराजके राष्ट्रे, कथमुदास्से। नूनं दैवायत्ता सिद्धिः, तथापि नित्यमुद्यमवतैव पुरुषेण भाव्यम्। निरुद्यमं हि पुमांसं क्लीबमिव कामिनी कटाक्षपातमात्रेणापि नानुग्रहीतुमीहेत सिद्धिः। उद्यमो हि वत्सो नियतिधेनुं दोग्धुमीप्सितामृतम्। तद्भद्र, अपास्य दुःखं, कार्ये मनो धत्स्व। सर्वानर्थहेतुर्हि दुःखानुवर्तनमुद्यमशीलानाम्। अद्यत्वे त्वदेकव्यपाश्रयमिदं भरतकुलम्। प्रजाकामे चेमे तेऽवरजस्य जाये। अहमपि पितॄणामपतनीयां स्थितिं कारयित्वा भर्तृसालोक्यं गन्तुमाशंसे। तस्माद् त्वादयानयोः संतानं, स्वयं च कृतदारः शाधि राज्यम्।

स तां प्रत्यवादीत्—आर्ये सत्यवति, अवगत्याप्यामूलाग्रं मामकीनमुदन्तं, किमेवं द्वीपान्तरादभ्यागतेव व्याहरसि। यद्यहं तव

नियोगेन प्रजोत्पादनाय दारसंग्रहाय वा प्रवर्तेय, तदा ह्यनृतवादिषु प्रथमः स्याम् । प्रहरणग्रहणं च कुसुमाञ्जलिनाभ्यर्चनीयचरणारविन्दे भगवत्याचार्ये महते पातकाय ननु संपद्येत । यावज्जीवं ब्रह्मचर्यव्रतकरणेन तातं तोषयित्वा, तदर्थं सुदुर्लभं स्वच्छन्दमृत्युतावरं च गृहीत्वा, स्वर्गते तस्मिन्, तद्विपरीतमाचरन्, ब्रूहि गुरुवञ्चनापातकवान् स्यां न वा । तदलं मामुद्दिश्यानर्हमेवमभिप्रेत्य ।

सा तु तं प्रत्याचचक्षे——भो भीष्म, सर्वोऽपि स्वार्थे विमुह्यतीत्येतत्कथं त्वामपि स्पृशति । यदि धर्मलोपभयेनैवं शंससि, तर्हि प्रतिपद्यस्वात्र ते समर्थमुत्तरम् । पितुः प्रीणनाय खलु त्वयैतद्व्रतमारब्धं, न तु गृहाश्रमे दोषदृष्ट्या, प्रथमाश्रमे गुणभूयस्त्वदृष्ट्या वा । एकपुत्रत्वमात्मनो दुःखकारणं निगदता तेनावेदितं हि 'कुलवृद्धिरेव मे प्रीतिहेतुः' इति । निरयार्णवे निमज्जदात्मनः कुलमुद्धर्तुं क्षमे त्वय्येवमुदासीने, पिण्डोदकलोपकुपितेषु शतशः शपमानेषु स्वर्गादधः पतनोन्मुखेषु पितृषु, सा कथमुपाहर्तुं शक्या । विपरिवर्तते हि कालानुगुण्येन सर्वस्त्रिवर्गव्यवहारः । यः सुखस्थस्य धर्मः, स एव विषमस्थेनानुसर्तव्यो न भवति । तद्विपरीतोऽपि तदा धर्मो भवति । सुखस्थस्य हि विप्रस्य क्षत्त्रवृत्त्या वैश्यवृत्त्या वा जीविका अधर्मो भवति । सैव विषमस्थस्य

तस्य धर्मायते। एवं सुखस्थस्य ते व्रतपरिपालनं, तद्विघाताय प्रवृत्ते मुनौ प्रहरणं च धर्म्यमेव। इदानीं विषमस्थोऽसि। तदेतदवस्थानुरूपं धर्ममाचर, यदि स्वर्गगतं पितरमभिप्रायानुरोधेनाराराधयिषसि।

सोऽपि तां प्रत्यूचे—अयि, विषमस्तवोपन्यासः। पश्य। विनश्यत्कुलमनुपेक्षणीयमिति, आपदि धर्मान्तरमनुज्ञायत इत्युभयं च सत्यम्। तथाप्यस्ति महद्वैषम्यम्। स्वधर्मेण वृत्तिमलभमानस्यावश्यके प्राणधारणे प्रवृत्तस्य धर्मान्तरेण वृत्तिरनुज्ञायते। यथैवं विषमस्थं कुलं संततिकरणेन रक्षणीयं वर्तते। तथापि नियमवता मयैव स्वनियममपहायापि कर्तव्यमिति नायं नियमः। एवंविधनियमरहितेनान्येनापि कर्तुं शक्यत्वात्। तन्नियुज्यतामनयोर्वध्वोः संतानाय वेदवान् कोऽप्यग्रजन्मा। दृष्टपूर्वश्चायमाचारः। पुरा किल पितृवधामर्षितेन भार्गवेण निर्बर्हितेषु क्षत्रियवर्गेषु, योषामात्रशेषाणि कुलानि तासु संतानमादधानैः पुनरुज्जीवितानि तत्तत्पुरोहितैः। नूनं विषमस्थं ते कुलम्। न त्वहम्। विनिपाताय ह्यन्यधर्मस्वीकरणमनापन्नस्य। अतो मास्तु तव मम च स्वार्थहानिः। अन्विष्यतां कोऽपि तपस्वी।

तस्मिन्नेवमुक्तवति, सा सलज्जं सस्मितं च किंचिदभिदधे।

यदि मन्यसे संतानमावश्यकं, न मन्यसे च तदात्मना कर्तुं, अनुमन्यसे च विशिष्टेन पुरुषान्तरेण तद्भावनं, भवति मे तदा किमपि विवक्षितम्। यत्किल पितुर्गोप्यं स्त्रीणां, तन्नयासीक्रियते मातरि, तथा यद्भर्तुरपह्नूयते, तदपि निधीयते पुत्रे। अतः पुत्र इति कृत्वा त्वयि विस्रब्धमभिधीयते। तन्नासूयितुमर्हसि। पुरा किल पितुरादेशेन नौकर्म कुर्वाणायां मयि समापत्तिसमागतेन भगवता **पराशरेण कृष्णद्वैपायनो** नाम मुनिरुदपादि। सद्य एव यौवनप्राप्तेन तेन मे कानीनेनात्मजेन 'अम्ब, अवसरे तवानृण्यं गन्तास्मि' इति वरः प्रत्यपादि। अङ्ग, विदांकुरु तत्प्रसङ्गानुषङ्गिकं ममेदमङ्गसौगन्ध्यम्। यदि मन्यसे तस्यात्र नियोजनं, तदिदानीमेव प्रयोजयामि तम्।

इत्यूचिषीं स्वां गुरोर्महिषीं सहर्षबहुमानमाबभाषे स भीष्मः—अयि मातः, किं त्वं भगवतो वेदव्यासस्य जननी। पुरुषरूपेण विग्रहवानाम्नायो हि स महामुनिः। तस्य मातृत्वेन मन्ये भवतीमस्माकं भागधेयेनैवंरूपेण विहर्तुमागतां भगवतीं वेदमातरम्। सम्यक् पावितं पालितं चास्मत्कुलम्। स्वहस्तगते चिन्तामणौ किमर्थमेवं चिन्ताकुलाभूः। विनाशोन्मुखं हि कुलं व्यवहितसंबन्धेनासुबन्धेनापि वा येन केनाप्यनुग्राह्यं भवति, किं पुनरात्मन एवौरसेन, विशेषतः सर्ववेदेन सर्वज्ञेन यमनियमादिसंप-

न्नेन भगवतो नारायणस्यांशभूतेन पाराशर्येण मुनिना पुनरुज्जीव्यत इति। तदनुष्ठीयतामधुनैव यथोद्देशम्। उपस्थितेऽपि कार्यकाले किं विलम्बेन। इति सत्त्वाधमस्यै अनुमतिं विततार।

अथ विचित्रवीर्यक्षेत्रे वीर्यमादधानस्य व्यासस्य प्रसादेन पुनरङ्कुरिते शंतनोर्वंशे, समुद्भूताभ्यां **धृतराष्ट्रपाण्डुभ्यां** राजपुत्राभ्यां शाखाद्वयेन पुनर्विस्तार्यमाणे च सति, **दुर्योधन**प्रधानेषु धार्तराष्ट्रेषु **युधिष्ठिर**प्रधानेषु पाण्डवेषु च यथाभागं विभज्य राज्यं भुञ्जानेषु, जातुचिदवसरे राजसूयक्रतुमाहरमाणो राजा युधिष्ठिरः प्राप्तेऽग्रपूजाकाले, 'पितामह, ब्रूह्यर्हत्तमम्, यं प्रथममर्हयेयं' इति भीष्मं पप्रच्छ। सोऽपि तस्मै व्याचचक्षे—वत्स युधिष्ठिर, स्वयमभिज्ञ एवास्यर्हन्तमवधार्य यथावदर्हयितुम्। तथाप्यस्मत्संभावनयैवं चोदयसि। ननु वृद्धसेवी खलु भवान्। अनेन प्रसङ्गेन पावयितव्या च मे जिह्वा। तीर्थोपपादिता हि गौर्गोरिव प्रतिपादकं श्रेयसा योजयति। अतः श्रूयताम्। योऽयं तेजस्विमण्डलमण्डितेऽस्मिन् सदसि शशाङ्क इव नभसि स्वतेजसा सर्वमतिशयानो विभासते, तमिमं सभाजय ते मातुलेयं कृष्णम्। न ह्ययं मानुषेभ्यः केवलं विशिष्यते, विशिष्यतेतरां देवताभ्योऽपि। तिष्ठत्वभ्यधिकवार्ता। किमस्ति लोकेषु ज्ञानैश्वर्यादिभिः समानः पुरुषः पुरुषोत्तमस्य। नायं मानुषो, नापि देवः, देवदे-

वो ह्यसौ। एष हि केनापि कारणेन मध्यमं लोकमलंकुर्वन्, मानयन्मानुषोऽहमिति मानुषजन्म, महयन् क्षत्रियोऽहमिति क्षत्रियजातिं, फलयन् यादवोऽहमिति यदोः कुलं प्रबलम्, संभावयन् वासुदेवोऽहमिति वसुदेवं, उच्चैःपदे स्थापयन् सबन्धगन्धेनास्मान्, विडम्बयन्नन्यांश्च यथायोगं, बहुजन्मार्जितेन सुकृतसंचयेन जीवानां, जीवसामान्येन व्यवहारेणानुग्रहकाम्यया स्वैरं विहरति। आदितः प्रभृति पूतनासंहारादिकमस्य चित्रं पवित्रं च चरितजातं श्रोत्रपथातिथीकृतवतो विमर्शचतुरबुद्धेरीर्ष्यासूयादिदोषैरदूषितस्य कस्य वा भवत्वत्र संदेहः। अस्य हि बालस्यैव सतो वारुणपाशाद्विपाशितनन्दगोपस्य च्छत्रीकृतगोवर्धनाद्रेर्निर्मन्थितगोत्रभिदवलेपस्य गुरुदक्षिणीकृतकृतान्तभवनगतगुरुपुत्रप्रत्याहरणस्य स्वमायामहिमव्यामोहितवेदगर्भस्य कियत्येषा प्रशस्तिः कंसकालयवनादिदुष्टहन्तेति वशीकृतसर्वराजन्यचक्र इति च। यानि पूजानिमित्तानि विद्यावीर्यादीनि, तानि चास्मिन्नेव सामस्त्येन संख्यायन्ते। अयं हि कलासंख्यानुगतैरहोभिरधीती सर्वासु विद्यासु कलासु च। सर्वज्ञतामस्य व्याकुर्वते हि नित्यमात्मनः संशयच्छेदार्थमेनमुपसीदन्तो ब्रह्मकल्पाः परमर्षयः। असति महत्तरे ज्ञानाधिक्ये न कोऽपि ततः शुश्रूषयोत्सुकायेत, विशेषतो लब्धप्रतिष्ठः। अप्रत्यक्षविषये हि विषये कार्यमनुमापकं खलु कारणस्य। विद्यावीर्याभ्यामिव विभूत्यापि कोऽनुहरते

भगवतः कृष्णस्य । अस्य गृहशिल्पेष्वपि ग्रामतक्ष इव नित्यं संनिहितो हि भवति देवशिल्पी । निजप्रासादैकस्थापतेर्यो सुधर्मामस्य संजवनीकृत्य प्रसादाय प्रतीक्षते हि सहस्राक्षः । धनदादयोऽपि स्वां स्वां भूतिमुपदीकृत्यास्य समयाकाङ्क्षिण इत्येतन्न खलु न विदितं द्वारकोदन्तकोविदानाम् । परं च । सकललोकहितैकान्तवृत्तः सार्वतर्थस्य केवलमुदरंभरेर्जीवलोकस्य च सुमहत्खल्वन्तरम् । पश्य । अस्य हि श्रुतिधर्माविव पूजनीयो मातापितरौ, ब्रह्मवादिन एव भजनीया परा देवता, जगद्रक्षैव कण्ठाश्लेषप्रणयिनी दयिता, करुणैव पात्रे प्रतिपादनीया कन्या, साधव एव सजातीयतया व्यवहार्याः, सेतुत्रातार एव सगोत्रतया भावनीयाः, दीनबन्धव एव बन्धुकृत्येनानुसंधेयाः । ये खलु वेदद्रुहो देवद्रुहो भूतद्रुहो गोब्राह्मणहिंसकाः, सर्वे च तेऽस्य द्वेष्या हन्तव्याश्च । किं चान्यत् । यस्य वा प्रीतये क्रियाकारकपुरुषद्रव्यबाहुल्यनिष्पादनीयोऽयं महाक्रतुरारब्धो भवता, अयमेव स तेन प्रीणनीयो यज्ञपतिः । अचाक्षुषीमपि देवतां निगमश्रद्धाभावितेनात्मना प्रत्यक्षामिव कृत्वा, केवलेनोद्देशत्यागेनापि समाराध्य फलमीप्सन्ति त्रैविद्यवृद्धाः । क्रियाफलभूतायां तस्यां देवतायां स्वयं प्रत्यक्षमाविर्भूय कर्तुरुपस्थानीयायां, ब्रूहाद्य, कुत्र प्रवर्ततां क्रियासाकल्यसंपादिन्यर्हणा । अन्यच्च । अपरिहार्यतयावश्यंभावि मन्त्रतन्त्रक्रियालोपादि स्मरणमात्रेण यस्य सपद्येव

निष्क्रियते, क्रियते च साद्गुण्यं क्रियायाः। सुगृहीतनामधेये तस्मिन्नेव साक्षाद्गृहीतविग्रहे पुरः स्थिते, किमन्यदन्विष्यतां क्रतुसंपत्तये। किं बहुना। वत्स कौन्तेय, त्वं धन्यधन्योऽसि, यस्य तव देवतासार्वभौमः संबन्धी च मित्रं च। तदेनमर्चयाभ्यर्चनीयतममच्युतम्। इति तमादिश्य, पुनर्मन्द्रस्वरेण सभ्यानामन्त्र्य जगर्ज। भोः सभास्ताराः, यद्येतद्युष्मासु कश्चिदाक्षेप्तुमुत्सहेत, काममाक्षिपतु। शक्ता एव वयं न्याय्येन वादेन तं विजित्य, स्वमतं स्थापयितुम्।

धर्म्यमर्थ्यं च भवद्वचनमित्यैककण्ठ्येन प्रत्युदीर्य, पर्युत्सुकाः स्मो भगवते वासुदेवाय प्रवर्त्यमानया सपर्ययेत्यञ्जलिपद्ममुकुलावतंसितोत्तमाङ्गेषु समुत्थितेषु लोकेषु, आलोककोलाहलमुखरेषु मन्दारकुसुमवर्षिषु वृन्दारकवृन्देषु, चतुर्भिर्लोकपालैरिव वृकोदरादिभिर्भ्रातृभिस्त्रयीविद्ययेव याज्ञसेन्या च सहितः परमेष्ठीव स यजमानो युधिष्ठिरो यज्ञं यज्ञपतिं यज्ञफलं यज्ञफलदातारं च जगत्पतिं लक्ष्मीपतिं तं यदुपतिं पूजयित्वा, तत्पादावनेजनतीर्थेन कृतार्थीकृतात्मा क्रतुं समाप्य सस्नौ।

अथ तामद्भुतामृद्धिमीक्षितुमक्षान्तेन पार्श्वकवृत्त्या तामपहर्तुमुद्यतेन धार्तराष्ट्रेण प्रवर्तिते द्यूते धूर्तेन शकुनिना सह द्यूत-

माचरन्नजातशत्रुः क्रमेण जितसर्वस्वो जितानुजवर्गो जितात्मा जितजायश्च सन् जितोऽस्मीत्युपरराम। ततः 'एह्येहि कुरुदासि' इति **दुःशासनेन** महति तस्मिन्महीपतिसभे केशग्राहमाकृष्यमाणा देवी द्रौपदी 'भोः सदस्याः, कथं पश्यन्तोऽप्यपश्यन्त इव भवन्ति भवन्तः। किमहमदास्येवास्मि, उत दासीभूता। विविच्य कथयन्तु कृपणवत्सला धर्मज्ञाः' इत्याक्रन्दति स्म। आकर्ण्यापि चेतनावस्कन्दि तदाक्रन्दितं, अवगत्यापि तदुत्कटकोटिकमन्याय्यं, अवधार्यापि तस्याततायिनः सपद्येव शीर्षच्छेद्यतां, अशक्तिप्रयोजितयोपेक्षया तूष्णीमवस्थितेषु जनेषु, कात्स्न्र्येन मूकस्वप्नायिते सदस्याभिप्राये, स्वयं निश्चितबुद्धिरपि व्यवहारेषु, निर्ज्ञातदौरात्म्योऽपि दुर्योधनस्य, निरभिमानोऽप्यन्यायवादिषु, समर्थोऽपि विषमसमीकरणे, प्रगल्भोऽपि प्रत्यवस्थायिपर्यवस्थाने, विविदिवान् भूभारहरणार्थमवतीर्णतां सत्यसंकल्पस्य भगवतो विष्णोः, तथैतदुपोद्घाततां च तदुद्घातस्य, दृढश्चाश्च दैव्या संपदा संपन्नस्याजातशत्रोरेवान्ततो विजयो नासुरसंपदाभिभूतस्य धार्तराष्ट्रस्येति, धर्मैकतानमतेस्तस्य धर्मसूनोर्गुणप्रख्यापनायां कृतादरो भीष्म इदमुदाजहार—सुभे याज्ञसेनि, आत्मना पराधीनस्य नास्त्येवात्मीयपणनादिष्वधिकारः। तदस्मन्मतेन त्वमदास्येवासि। किंतु धर्मपुत्रेण पणितासीति कृत्वा मोमुह्यतेऽपरिच्छेदकलुषा मे मतिः। न ह्ययं समुपस्थितेऽपि सर्वनाशे धर्मं जह्यात्। न चा-

स्यानध्यवसायकृतो विपर्यासः क्वचिदपि संभाव्यते । वयं तु केवलं कृतश्रमा धर्मे, अयं पुनर्धर्ममयः । तस्मात्सर्वं युधिष्ठिराचरितं धर्म्यतया प्रमाणयितव्यं धर्मजिज्ञासुभिः । एवं महात्मनोऽस्य वैमनस्यकारी न कथमपि श्वःश्रेयसमश्नुवीत । अत एव वयमेवमुदासीना इवास्महे ।

अथ भीतेन धृतराष्ट्रेण विमोचितेषु तेषु, तेन दुर्मेधसा पुनः प्रवर्तितेऽपि द्यूते स्वयमन्तरीभूय पराजितः स सम्राट् स्ववर्गीयैः समं द्वादशवार्षिकं वनवासक्लेशमनुभूय, त्रयोदशे वर्षेऽज्ञातचर्यां चचार । तदन्तरे तदवस्थानमाज्ञाय पुनः क्लेशयितुमुद्यतेन दुर्योधनेन प्रहितेषु प्रणिधिषु पुनरागत्य तदलाभमावेदयत्सु, तान् जीवनाशं नष्टानुद्घोषयति **कर्णे**, नैतदेवमिति क्षिपत्याचार्ये ' पितामह, ब्रूहि सत्त्वमवस्थानं च परेषां ' इति तन्निश्चिचीषुणा धार्तराष्ट्रेण पृष्टो भीष्मः प्रोवाच । तात दुर्योधन, यादृशेन संबन्धेन युष्माकमस्मासु स्वातन्त्र्यं, न परिहीयते तादृशः संबन्धः पाण्डवानाम् । विशेषतोऽनुकम्पनीया ननु शोच्यां दशामुपगतास्ते । सत्येवमस्माभिरेव कथं संधिच्छेदकतास्थीयेत । तथापि पृष्टेन तथ्यमेव कथ्यमिति कृत्वैवं कथ्यते—ये खलु धर्मवत्सलाः साधवो न ते जातुचिदप्यपमृत्य्वादिनाभिभूयन्ते । जानास्येव धर्मैकजीवितं धर्मसुतम् । अतः सुखं जीवत्येव सानुबन्धः स

राजा। यत्र च सर्वं सुभिक्षतरं, निश्चिनु तं पाण्डवावासम् 'इति। **विराट**देशमेकं सुवृष्ट्या सस्यसंपदा चाढ्यंभावुकमवगत्य, तमभियेणयद्भिः कुरुभिः सर्वतः काल्यमानासु तद्गवीषु, तानभियुञ्जाने वैराटि**मुत्तर**मादाय संनद्धे **कपिध्वजे**, समुत्थिते प्रतिज्ञार्णवस्य तीर्णातीर्णत्वविवादे, तन्निर्णयाय दुर्योधनेन चोदितः पितामहो व्याचख्ये—'आस्तां तावज्ज्योतिषामतिचारेण त्रयोदश वर्षाण्यधिकपञ्चमासाश्च व्यतीता इत्येतत्। इदमेकमेवास्तु ते पर्याप्तमवधारणं, यद्युधिष्ठिरविनेय आचरति, तन्न्याय्यमेवेति। न जातुचिदप्यलभ्यं पाण्डवा लिप्सेरन्, लभ्यं च कथमपि न मुञ्चेरन्। न चायमर्जुनो जयेन विना निवर्तेत। तदयमेवावसरस्तद्भागप्रदानेन वैरं शमयितुम्' इति। तदनभ्युपगच्छति तस्मिन् पापे, समुद्भूते च दारुणे रणे, या खलु परान्व्यामोह्य नग्नंकरणी पार्थदिव्यास्त्रशक्तिः, सा प्रतीघातज्ञे भीष्मे केवलं प्रतिहता बभूव।

अथ सेनासंप्रहायोत्थितेषूभयेषु, पार्थप्रार्थनया तत्सारथ्यमास्थितवतश्चक्रपाणेः शस्त्राग्रहणप्रतिज्ञां यदा शुश्राव स भीष्मस्तदैव स्वयं प्रतिशुश्राव 'एषोऽहमस्मि भारतयुद्धे पार्थसारथिनापि शस्त्रं ग्राहयिता' इति। तदनु संध्यर्थमुपागतस्य 'देहि ग्रामपञ्चकं पाण्डवेभ्यः, मास्तु विरोधः' इत्यभ्यर्थयतो भगवतो वाक्यमवधीर्य, कामं प्रवर्ततां विग्रहः, सूच्यग्रभेद्यां भुवमपि परेभ्यो

न प्रयच्छेयं ' इत्युत्तरयन्तं तं सुयोधनहतकं जानन्नपि दुराग्रहप्रहग्रस्तं, आचारोऽयं वृद्धानां, यदात्ययिकेऽवसरे तत्त्वोपदेशेन विनिपाताद्बलान्निवर्तनमिति कृत्वा भीष्मो निजगाद—तात दुर्योधन, मयि स्थिते कथं युष्माकमिदं स्वातन्त्र्यम्। इयं हि राज्यश्रीर्मत्पितुः शंतनोर्मामेव प्रथममुपस्थिता। मय्युपेक्षितवति, मदनुमत्या क्षणं विचित्रवीर्ये विश्रम्य ततः पाण्डुमासाद्य निर्वृता तस्मिन्नेव रेमे। उपरते तु तस्मिन्, ततस्तव पितर, ततो युष्मांश्च शिश्रिये। सत्येवं कुतस्त्वमेव कुरुराज्ये भागी, न पाण्डवः। स्वार्जितेऽपि वित्ते भ्रातॄन् प्रथमभागिनो विधाय, तदुपलालनमेव स्वार्जितस्य साफल्यं मन्यन्ते सौभ्रात्रवित्ताः सत्पुरुषाः। त्वं तु पितृपैतामहेऽपि धने समानसंबन्धानेव सगर्भ्यानभागिनो विधाय, तदार्जितमपि धनं छलेनापहृत्य, यथावसरं पुनरंशमर्थयमानांस्तान् निःस्नेहं निर्मर्यादं चैवं क्षिपसीत्येतदहो ते दौर्जन्यम्। अन्यस्यापि साभिलाषस्य जनस्य विषीदतः, स्वयमेकः स्वादु न भुञ्जीतेति लोकन्याये जाग्रति, अपि नाम पुनरस्मिन् जन्मनि स्वाद्वन्नं भुञ्जीयेति सप्रत्याशं फलमूलानि भक्षयति, अपि नाम पुनः क्षौमाणि वसीयेति वल्कलानि परिदधाने, अपि नाम पुनः पर्यङ्कशय्यामधिशयीयेति दर्भास्तरणशायिनि स्वपितृव्यपुत्रे महात्मनि सम्राजि ज्येष्ठे युधिष्ठिरे, तदीयेन धनेन स्वयमात्मंभरिः सन् यत्किंचित्प्रदानेनापि तमुपसान्त्वयितुं नेच्छसि यदि, ब्रूहि ततः

किं ते पातकमस्तु । अस्ति किं भ्रातृसमानः सहायः पुरुषस्य । स हि प्रथमं हृदयं, द्वितीय आत्मा, तृतीयो बाहुः, चतुर्थो शक्तिः, पञ्चम उपायः, षष्ठः प्राणः । पितरावपि क्वचिदौपाधिकेन दोषेण व्यतिषाते, न भ्राता । स हि निर्व्याजो बन्धुः । यथा हि भ्राता द्विषन्तमपि भ्रातरं प्रत्यासन्ने परपराभवे ततो रिरक्षिषया तात्पर्येण त्वरमाणः संनिधत्ते, न तथा नित्यं प्रियवाद्यपि परः । ननु किमत्र त्वयापि निदर्शनमन्वेष्टव्यम् । यद्गन्धर्वराजेन स्वैरं परामृश्यमानेष्ववरोधवधूजनेषु, विषमदशापरीतेषु युष्मासु, सपद्येव पलायमाने पात्रेसमिते सूतपुत्रे, कान्दिशीके पाशककाशिनि सौबलपाशे, स्वकुल्याभिमानेन मानभङ्गभिया कृतसंभ्रमात् स्वबाहुभूतो भीमार्जुनौ तरसा प्रसारितवतः पाण्डवादन्यो न कोऽपि तत्र तव त्राता बभूव । किं बहुना । यदि स्वकुलस्य श्रेयस्कामोऽसि, प्रयच्छ तदा पाण्डवेभ्यो भागम् ।

नाहं प्रदास्यामीत्युत्तरयति तस्मिन् पापे, प्रतिप्रयाते यदुनाथे, युद्धार्थं कुरुक्षेत्रं गतेषूभयेषु सैनिकेषु सेनाधिपत्याय धार्तराष्ट्रेणार्थितो भीष्मः प्रोवाच—न वयं पाण्डवेषु प्रहरेम । अस्माकं रक्षणीया हि ते । द्रौपदेन शिखण्डिना न प्रतियुध्येमहि । स्त्रीपूर्वो ह्यसौ । अतस्तद्वर्जं परान् प्रतियोद्धास्महे । यद्येतन्मन्यसे, तर्हि साधयामः ' इति वदन्, तथा क्रियतामिति प्रतिवदता

तेनाधिकृतो रथातिरथसंख्याने कर्णमर्धरथत्वेन गणयित्वा, कुपितेन तेन ‘ यावदयं पितामहः शस्त्रं धारयति, तावदहं न युध्येय ’ इति प्रतिज्ञाते, तं क्षिपन्नूचे—कथं खद्योतपदसाधर्म्येण गर्वायमाणस्तमोऽपहस्य तमोनिरसनकार्ये आत्मानं सहायं मन्यते ज्योतिरिङ्गणः। मास्तु सर्वात्मना ते साहायकं ’ इति तं निरस्य, एकादशानामक्षौहिणीनां नेता भवन्, अक्षौहिणीसप्तकपरिमितं पाण्डवबलमभिजगाम।

इति श्रीभीष्मविजये भीष्मोपन्यासो नाम
पञ्चम उल्लासः।

अथ यथान्यासं विन्यस्यमानासु वाहिनीषु, प्रहण्यमानेषु संनाहपटहेषु, पेपीय्यमानेषु वीरपाणेषु, यथाबलं प्रतिद्वंद्वीभूय द्वंद्वोन्मुखेषु योधमुख्येषु, कवचादिकमवमुच्य रथात्तूर्णमवतीर्णो धर्मसूनुर्विस्मृतं स्वं न्यासमादित्समान इव कृतसंभ्रमः पद्भ्यामेव परानीकिनीमवजगाहे। तथा प्रस्थितं तमवलोक्य संभ्रान्तास्तद्भ्रातरोऽनाशयज्ञा एव वाग्यतं तमन्वधावन्। निर्ज्ञाताध्यवसायो यादवेन्द्रस्तद्गौरवेणेतरवदेव तमन्वियाय। नातिकोविदाः परे त्वनवगम्यैव तदागमार्थं, आगमार्थमिवानागमज्ञास्तत्त्वगृह्याभिरुपपत्तिभिर्बहुधा विकल्पयन्तस्तं भिया शरणेप्सुमभिप्रेत्य कटुकोक्तिभिरवहसन्ति स्म।

कर्णारुंतुदानि तदारटितान्युन्मत्तप्रलपितानीवानाकलय्य लक्ष्यैकतानमतिः स महामतिः समुच्छ्रितेन पञ्चतारेण तालध्वजेनाञ्चितं शताङ्गमभिगम्य, तत्र विभावसुमिव विभासमानं, मूर्तेन यशसेव मूर्धनि ध्रियमाणेन सितातपत्रेण सितातपबिम्बेन महीध्रमिव भ्राजमानं, निर्व्याजसंभजनसंवनिताभ्यां प्रतिभजनकाम्यया विग्रहमादायोपासीनाभ्यां सत्यधर्माभ्यामिव वालव्यजनाभ्यामुभयपार्श्वयोरुपवीज्यमानं, अन्तरमान्ततया बहिः प्रसृमरेण पौरुषसारातिरेकेणेव सुदृढेनाश्मसारमयेन चोरच्छदेन संछादितोरस्कं, विश्वजिघत्सया व्याताननं दण्डपाणाविवातिप्रचण्डे कुण्डलिते च कोदण्डदण्डे प्रक्ष्वेडनान् संघटयन्तं, धीरोदात्तं, वयसा वृद्धतममपि जरसोऽप्रसक्तया युवानमिव शोभमानं, स्वपितामहमवलोक्य, भक्त्या भयेन च कृतसंभ्रमो नीचैः प्रणिपपात ।

तथा प्रणतोत्थितं तं पौत्रमभिनन्दन् स शंतनुनन्दनो गुणैकवत्सलतया ' वत्स, सिध्यतु ते सर्वं समीहितं ' इत्याशास्य पुनरूचे—महात्मन् पाण्डव, नितरां प्रीयामहेऽनया तवाभ्युपपत्तया, यदेतादृशे व्यायामकाले प्रत्यनीकवृत्तया प्रत्यवस्थितेष्वप्यस्मासु गुरुप्रतिपत्तिं नाहासीः । अथ वा नैतदद्भुतं धर्मैकसर्वस्वे त्वयि । अर्थकामयोरपायभयेन हि तत्कृते धर्मं प्रशंसति सर्वो लोकः । त्वं तु धर्मस्यैव कृते त्रिवर्गमाचरसि । अन्यथा को न्वेवं हस्तग-

तावर्थकामावुपेक्ष्य, कलत्रादीनात्मानं च परिक्लेशयन् धर्मं रिरक्षिषेत् । स ते रक्षको भवतु धर्मः । योऽपि नाम प्रागेवार्थकामसंबन्धबहिर्भूतस्तेन तावुज्झिताविति नाद्भुतम्, ताभ्यां ह्यसावुज्झितः । इदं खलु महाश्चर्यं, यत्त्वयं भोगमध्यस्थ एव तृणानयोरप्यर्थकामयोः, धर्मप्रतिपन्थितायामुपस्थितायां, निःस्नेहमेतावत्याक्षीः । ईदृशस्य ते न केवलं वयमुपकर्तुं नेशमहे, प्रत्युत, अपकर्तुमपि सज्जामहे । ननु त्वमेव जानासि धर्मपरमप्यर्थसंबन्धोऽन्यथा करोति । तत्र शत्रोर्गृहे चिरनिवासाय तत्साह्यं कर्तुमुद्यताः स्मः । प्रतिबध्नाति ह्यकृतनिष्कृतिकं तदृणं परत्रापि । अवश्यं चानृण्यशुचिनैव पुरुषेण परलोकायोत्थातव्यम् । न बहुमन्यन्ते च देवाः पितरोऽपि पुरुपुण्यमप्यृणिनम् । न च साध्वसाधुविचारो भवति प्रत्युपकारकरणे । अतो जानन्तोऽपि तवार्जवमनार्जवं च तव शत्रोः, स्वार्थपरतया तत्र प्रसिताः स्मः । तस्माद्व्रियतां समरसाह्यवर्जं यत्तेऽभीप्सितम् ।

‘ पितामह, तव जयोपायमस्माकमुपदिश्य कामं युध्यस्व परस्यार्थे ’ इति पृच्छति तस्मिन्, स विहस्याह—‘ वत्स, न तं प्रपश्यामि, यः शस्त्रभृतो भीष्मात्प्रसह्य जयमुपाददीत । अवश्यमनुग्राह्यो भवान्, तथापि नायमवसरः । तदागमयस्व तं कालं ’ इति तं विसृज्य संशृण्वानस्यैव धार्तराष्ट्रस्य राजा युधि-

शिरो जयत्विति शरं जग्राह। अतिशक्ते तस्मिन्नशक्त्या कार्यस्य प्रत्यासत्त्या च संजनितक्षान्तिरसावक्षान्तिधनः सुयोधनोऽत्यन्तमप्रियमपि तथाशासनमन्यालापनिभेनापालापीत्।

अथावश्यं जेतव्यमिति, यशः संचेतव्यमिति, वैरं निर्यातयितव्यमिति, सुहृत्कार्यं निर्वोढव्यमिति, ज्ञातेयमादर्तव्यमिति, च तेन तेनोपाधिनोपहितात्मसु परानाक्रम्याक्रम्य तात्पर्येण संप्रहरमाणेषु वीरवर्गेषु, उभयपक्षसाधारणतया सिद्धप्रतिष्ठतया अव्याप्यवृत्तितया चात्मनो विनैव केनाप्युपाधिना, प्रधनाय प्रवृत्तः स कुरुवृद्धः सत्यपि सुविपुले बलौघे सहाये, स्वयं कार्मुकद्वितीय एव परानीकं प्रविश्य सर्वमाकुलयन्, खञ्जयन् सृञ्जयं, खेदयन् केकयं, शातयन् श्वेतशङ्खौ, शतं शतं निहत्य, शतं शतं विद्राव्य, प्रमन्थति स्म पाण्डवबलार्णवं कलशार्णवमिव मन्थानशैलः।

ततः सर्वतः समुद्भूते हतोऽस्मि हतोऽस्मीति परिदेविते, समुत्थिते च पाहि पाहीत्याक्रन्दिते, व्याकुलेषु पृतनापालेषु, पुनः क्लैब्यमुपगत इव विक्लवे च गाण्डीवधन्वनि, संघशः कल्यमानमिव कालेन, शलभायमानं भीष्मशरार्चिषि, अनाथमिव मथ्यमानं स्वबलमवलोक्य, कृपापरिप्लुतात्मा कृपणबन्धुः करुणासिन्धुः स भगवान् गजत्राता सपद्यपास्यन्नङ्गुलिपङ्क्तिबन्धुरानभीषून्,

मा भैष्ट, मा भैष्ट, एषोऽस्मि युष्माकमार्तिहर इत्युच्चैरभयवाचा समाश्वासयन् रथाङ्गकर्षं रथात्पपात । अभिपपात च कर्षन्नेव भुवि वसनाञ्चलं तिष्ठ तिष्ठेति भीष्माभिमुखम् ।

विद्युत्पुञ्जपिञ्जरेण सहस्रधारेण चक्रेण, वलशासनशरासनेनेव विचित्ररत्नप्रभापटलसंवलितेन कटककिरीटादिना च घनकालोदितं घनाघनमिव भासमानं स्तनितेनेव सान्द्रगम्भीरेण गर्जितेन च मुखरीकृतदिगन्तरालं तं पार्थसारथिमवलोक्य कृतोत्साहः स भीष्मकलापी मण्डलीकृतशरावापकलापो नृत्यन्निव पदे पदे पङ्कजगभीरेण स्वरेण तमामन्त्र्य मन्त्रयामास—' भोश्चक्रिन्, प्रहर प्रहर । न वयं बिभिमः कालदण्डात् । सर्वत्राप्रतिहतप्रसरापि तच्छक्तिः कुण्ठीभवत्यस्मासु, अश्मनि प्रयुक्तेव दारुविदारणपटीयसी कुठारधारा । परं च । न खल्वास्थास्माकमागमापायिषु भौतिकपिण्डेषु । बिभीमस्त्वतिमात्रं मृषोद्यतायाः । सा हि परो मृत्युः, न वैवस्वत इत्यस्मन्मतम् । एतदर्थो ह्ययमारम्भो न पाण्डवे द्वेषेण, नापि धार्तराष्ट्रे स्नेहेन । त्वय्येवमगृहीतशस्त्रे, कथं सत्यापितो भवेत्तदर्थोयोऽयमस्माकं सत्यंकारः । एवं स्वां संधामतिसंधायापि भक्तजनं सत्यसंधं विदधानस्य तव केन प्रत्युपकारेणानृण्यं यायाम् । आप्तकामो हि भवान् । तदस्मास्वेव जीर्णं भवतु तवायमुपकारः । अनया कृतज्ञताविज्ञप्त्यैव प्रीयतां भगवान् जना-

र्दनः ' इति । तदन्तरे सरभसमभिपतितेन पार्थेनानुनीते प्रति-
निवृत्ते कृष्णे, लोहितायति मिहिरमण्डले, विश्रान्तिमभजन्त सैन्य-
नेतारः ।

एवं व्यतीतेष्वष्टसु वासरेषु, पृष्ठमांसादनवृत्तिना कर्णेन संद-
ष्टकर्णस्य दुर्योधनस्य दुरुक्तैः समुत्तेजितः स महातेजा निदाघ-
भानुरिव दुर्निरीक्षाकारः, आघारवान्वीतिहोत्र इव प्रज्वलितः
सर्वतः प्रपातितैरशनिपातैरिव शरसंपातैः प्रहरन् मण्डले मण्डले
प्रमथ्नन् यूथंयूथं, प्रदहन् व्यूहं व्यूहं, प्रभञ्जन् पङ्क्तिं पङ्क्तिं,
पातयन् हास्तिकं, शातयन्नाश्वं, खण्डयन् रथकड्यां, दारयन्वीरवेदं
अर्दयन्दसदर्शं, एषोऽस्मि क्षत्रसंवर्तकशिष्यो भीष्म इति
पदे पदे समुद्घोषयन्, सर्वतः प्रवर्तयामास निरन्तररुधिरझरा-
सारसंपूर्यमाणा धनुर्दण्डखण्डतरङ्गिताः परिभ्राम्यद्रथचक्रावर्तसुदु-
र्गमाः कबन्धोत्थितगजाश्वादियादोमज्जनोन्मज्जनभयानकाः, कङ्क-
गोमाय्वादिखगमृगकुलास्वाद्यरसाः शोणितमयीरापगाः । किं
बहुना । अर्वागेव बलमक्षौहिणीसंख्यायाः पाण्डवबले शेषयित्वा
सायं संख्यमुपसंजहार स शस्त्रसंख्याविचक्षणः ।

अथ समुद्विग्नो युधिष्ठिरः ' नन्वपर्याप्तं शेषमस्मद्बलं पुनर्जि-
घत्सोर्भीष्मस्य कल्यवर्ताय । नास्त्यौपयिकं तदनुनयादृते ' इति

ब्रुवन्नेव तच्छिबिरमुपयाय, 'पितामह, प्रदिशोपायमस्माकं जीवातवे' इति सन्नया गिरा प्रणम्य बाष्पायमाणस्तस्थौ। तदवस्थं तमवेक्ष्य घृणाघूर्णितमनाः स महामना मनस्येवमकरोत्——नूनमस्मत्प्रतापसंतापेन बलवदुपतापितोऽयं तपस्वी। ललाटंतपेन तपनातपेन संतप्तगात्रस्य विश्रान्तिमन्विष्यतो दहनप्रवेश इव धार्तराष्ट्रेण बहु क्लेशितस्य विश्रान्तिसुखमाशंसोरस्मन्निमित्तोऽयमस्य जीवितसंशयः। अन्याय्यं खल्वदृष्टपितृमुखानां सुखार्हाणामप्यसुखशतैरुपतापितानामस्मच्छिशूनामस्मत्त एव पुनर्विपत्तिरित्येतत्। समानसंबन्धयोर्द्वयोर्विषमस्थः खल्वनुग्राह्यो न सुखस्थः। विजातीयोऽपि धार्मिको जनः स्वजनो भवति धर्मवित्तानां, नौरसोऽप्यधार्मिकः। किं पुनरस्मत्कुलावतंसोऽयम्। प्रीयन्ते च सुकृता श्रद्धावता च स्वकुल्येन वितीर्णे जलाञ्जलौ पितरः। तदेनमवश्यं देहन्यासेन पालयामि। अस्मासु शक्तिषु न स्यादेव कथमप्यस्य श्वोवसीयसम्। इति कृताध्यवसायस्तमुवाच—'वत्स युधिष्ठिर, स्त्रीपूर्वं शिखण्डिनं पुरोधाय विजयमादत्तामयं विजयः। कृतं विषादेन' इत्युपायमुपदिश्य तं विससर्ज।

अथोदिते सवितरि पुनः प्रक्रान्ते प्रधने पूर्वतोऽप्यधिकतरं प्रहरन् स परंतपः 'कः पुमान् भीष्ममभियोक्तुमीष्टे' इति वीरवादव्याजेन श्लाघून् पाण्डवान् बोधयामास। तत्क्षणमेव भिनभि

कन्याशत्रुमित्युत्थिते शिखण्डिनि, तन्निरोधाय प्रत्युत्थितेषु धार्तराष्ट्रेषु, मा भैषीरिति शिखण्डिनो रथमारुरोह तद्रक्षार्थे कृतत्वरो गाण्डीवधन्वा। उभयपक्षयोः संनद्धावभूतां भीमधृष्टद्युम्नौ। पृष्ठगोपावभवतां नकुलसहदेवौ। रथ्यान् सारथिं चागोपायतां पुरः प्रधावन्तौ सात्यकिसौभद्रौ। ररक्ष सर्वासु दिक्षु राक्षसो भैमसेनिः। जहि जहीति प्रोत्साहयन्ननुससार राजा युधिष्ठिरः। जयति पाञ्चालः शिखण्डीति मुहुर्मुहुरापूरयामास भगवान् पाञ्चजन्यम्।

जयत्यतिरथो भीष्म इति वादित्राणि पुनः पुनर्वादयित्वा, हन्यतां याच्ञोपलब्धेन पुंस्त्वेन पुरुषमन्येयं दुष्टकन्या, असौ कन्यानटः षण्डश्चेति साधिक्षेपमुपरुन्धानेषु कुरुप्रधानेषु, प्रतिक्षिपत्सु च प्रतिपक्षेषु, तस्य पार्षतस्याभिकर्षणापकर्षणकृतेन रणरणकेन प्रादुर्बभूव सुमहान् सुतुमुलश्च तत्र संप्रमर्दः। मुहूर्तमेवान्यूनातिरिक्तमुच्चलत्यभ्यामर्दे, अपक्रान्तप्रायेऽपराह्णसमये, उत्कलिकाकुलितेन कालक्षेपमक्षममाणेन सव्यसाचिना प्रयुज्यमानैर्दिक्पालोपज्ञैरस्त्रैर्ध्वाङ्क्षवत्सर्वतो विक्षिप्यमाणेषु परेषु, घण्टापथायमाने भीष्माभिसरणवर्त्मनि, द्रुतमभिदुद्राव स द्रौपदः।

अथ विरम विरम गाङ्गेय, कृत नरलोकविडम्बनेनेति वि-

यति समुत्थितां भारतीमुपश्रुत्य यावत्पुरः पश्यति स भारतोत्तमः, तावददृश्यतादेशिकेन श्मश्र्वादिनाप्यलुप्यमानस्थानिचिह्नेर्मुखकण्ठादिस्थानैरनपेक्ष्यैव वाग्विकल्पनमभिधीयमानप्रकृतिधर्मः विकर्षन्नपि सबाणं बाणासनं कोणेन वीणां क्वणयन्निव विभाव्यमानः, एकस्मिन्नेव जन्मनि स्त्रीपुंसयोरुभयरसज्ञस्य मम पुरः कियानस्यैकतरमपि तद्रसमजानानः क्लीबसधर्मा त्वमिति मुहुर्मुहुरट्टहासमिषेण भीष्मं परिहसन्निव भासमानः, मदते कोऽन्य इमं महावीरमाकम्पयितुं क्षम इति तदभियोगक्षममात्मनो जन्मकृतं स्त्रीत्वमपि बहु मन्यमानः पाण्डवदत्तहस्तः शिखण्डी। एकदेशविकृतां साक्षादम्बामेव तमुत्पश्यन्नेव सस्मार चिरवृत्तस्यापि पुरः स्थितस्येव रोमहर्षणस्य भार्गवसंगरस्य। सस्मार च तत्प्रसङ्गेनात्मनः पूर्वजन्मवृत्तान्तस्य। सपद्येव विगलितोत्साहे तस्मिन्महासाहसिके, तस्य हस्तात्सहसा निपपात धार्तराष्ट्रस्य जयाशया सह सशरः शरासः। तत्क्षणं पार्थनुन्नेन शिखण्डिना प्रयुक्तेषु शरेषु 'मा भूरेव जन्मान्तरेऽपि मयि निरनुक्रोशः' इति तत्प्रसादनार्थमुपसृष्टेषु कुसुमवर्षेष्विवाशराहत्यैव भीष्मशरीरे विशीर्यमाणेषु, 'अतिशूरोऽसि भीष्मसहयुध्वन्' इत्यवहेलनपरेषु परेषु, तदवस्थे स्वकुलकूटस्थे तस्मिन् स्वयं प्रहर्तुमनभिलष्यन् बीभत्सुः कृष्णेन बलाच्चोदितः कथंचिदभ्युपगम्य, जयस्तम्भमिव स्वपितामहस्य वक्षसि सुदृढं निचखान विशिखम्।

तदनु दिवः पतता पुष्पवर्षेण सह रथात्प्रपतिते तस्मिन् पुरुषप्रकाण्डे, हाहाकारेण समं समभिद्रुतास्ते उभये च वीराः सशल्येन रुधिराप्लुतेन च गात्रेण भुवि शयानं उपरक्तमस्तोन्मुखं च मयूखमालिनमिव, दिवः पतितं महागजमैरावतमिव, वज्रभिन्नं गिरिराजं हिमवन्तमिव, ध्रुवपदात्प्रभ्रष्टमौत्तानपादिं ध्रुवमिव च तमवलोक्य विह्वलाः 'गतं गतं मानवसौभाग्यं, हतं हतं पौरुषगाम्भीर्यं, शून्यं शून्यं मध्यमभुवनं, भग्नं भग्नं शौर्यशृङ्गं, अस्तमिता संग्रामकथा, इतः परं वायसोऽपि वैनतेयायेत' इति तद्गुणान् प्रशंसन्तो बहु विलपन्ति स्म । अथ तानपरे शशंसुः—ननु भोः, अस्त्येवास्य जगदेकवीर इति प्रथा। इदं खल्वत्र विचिन्तनीयम् । अस्य हि गुरुभक्तिरेव जाया, नियम एवात्मजः, विद्यैव कन्या, धर्म एवात्मा, तप एव धनं, सत्यमेव साम्राज्यं, विवेक एव बन्धुः, एवं परिवारवानेष इत्थमन्तराले प्रणष्टो यदि, ब्रूत को भविष्यत्येषां शरणम् ।

तदन्तरेऽन्तरिक्षादवतरन्तो हंसा मानुषवाचा भीष्ममूचुः—भो गाङ्गेय, जानीह्यस्मांस्तव मातुः संदेशहरानृषीन् । शृणु तद्वाचिकम् । अयि वत्स, काममस्तु ते स्ववंश्ये धर्मसुते पक्षपातः । अस्तु नाम च स्त्रीपूर्वेण योद्धुं जुगुप्सा, तथापि कथमेवमकाले मुमूर्षुरसि । न प्रशस्यते हि गतिविशेषमीप्सतां दक्षि-

णायने मरणम् । तदभिज्ञोऽपि किमेवं व्यामूढोऽसि ’ इति । तदाकर्ण्य किमयं प्रतिवक्ष्यतीति सोत्कण्ठेषु जनेषु, भीष्मस्ता-नाह—ननु हंसाः, कथं भीष्मेऽपि व्यामोहः । तदुच्यतां मे माता—अम्ब, नूनमन्यादृशं ते मयि वात्सल्यं, यत्परलोकेऽप्य-नुत्तमां गतिमभिलषसि स्वसूनोः । अस्त्ययं लोकप्रवादः । यथा—दक्षिणायने कृष्णपक्षे निशि च मृतानां धूममार्गेण चन्द्रलोक-प्राप्तिः, भोगक्षये पुनरावृत्तिरिति; तथा उत्तरायणे शुक्लपक्षे दिवा च मृतानामर्चिरादिमार्गेण सूर्यद्वारेणापुनरावृत्तिपदप्राप्तिरिति च । वस्तुतस्तु नायं नियमः । विद्वदविद्वद्विषयौ खल्वेतौ मार्गौ । ये खलु विद्वांसस्तेऽर्चिरादिना यान्ति, तेषां दक्षिणमप्युत्तरायते । ये पुनरविद्वांसः केवलकर्मिणस्ते धूमादिना यान्ति, तेषामुत्तरमपि दक्षिणमेव । अकिंचित्करो हि कालः । अहं पुनर्लोकन्यायानुस-रणच्छलेन मम पितुर्महिमानं प्रचिख्यापयिषुरस्मि । यद्यहमिदानीं म्रियेय, यदि वा कालविशेषं प्रतीक्ष्य शास्त्रं ध्रियेय, उभयथापि गुरोर्वरो न प्रख्याप्येत । असति व्यतिरेके न हि पृथग्गृह्यते मिश्रयोर्धर्मयोः सामान्यविशेषभावः । अवश्यं चातनूपातं पितृ-गुणप्रख्यापनपरेण भाव्यं सुपुत्रेण । तदहं तद्दूरबलं व्याकुर्वाण-स्तावत्प्राणान् धारयितास्मि । मास्तु मत्कृते विषादः ’ इति ता-ननुज्ञाप्य, शान्तनवः पार्थोपकल्पिते शरोपधाने निहितमूर्धा शरतल्पन्यस्तकलेबरः सन्, व्याप्रियन्तां स्वव्यापारेषु भवन्त इति

सर्वानपगमय्य, संहृतकरणग्रामः कार्यकरणविलक्षणमपास्तसमस्तदोषं प्रत्यञ्चमात्मानमात्मना निदध्यौ स महायोगी।

इति श्रीभीष्मविजये स्वच्छन्दमृत्युताप्रकाशनं नाम

षष्ठ उच्छ्वासः।

तदनु यथाक्रममशेषतो द्विषतो निहत्य प्राप्तराज्यो राजा युधिष्ठिरः कृष्णप्रासादासादितं दुरासदं तमात्मनो विभवमहोदयमसकृन्मनसा विभावयन्, भक्त्या कृतज्ञतया च प्रसितमतिस्तत्पुरस्काराय ससोदर्यः स्वयं पादचारी गीतवादित्राद्युपचारपुरःसरः समुत्तुङ्गशृङ्गकुलसंकुलं स्फाटिकमस्य प्रासादतलमारुरोह। कलशार्णव इव विपुलावदाते तत्र, फणामणिकिरणकरम्बितफणिराजभोगोपमे पर्यन्तखचितरत्नप्रभारूषिते दन्तावलदन्तविनिर्मिते, विस्तारितसितास्तरणे कुन्दकुसुमनिकुरुम्बविडम्बिनि पर्यङ्कवर्ये शयानं, मरकतसच्छायेन कलेवरच्छायेन पुनरपि बालक्रीडामाचरन्तमिव नवशाद्वलशोभिनि वृन्दावने, ईषदुन्मिषिताभ्यामरविन्दसुन्दराभ्यां लोचनाभ्यामावेद्यमानप्रबोधावस्थं तमवलोक्य जय जयेत्यभिधावन्, अपि सुखं शयितं भगवतेति पप्रच्छ।

आभिगामिकगुणसंपन्ने, संभ्रमकारिण्यभ्यागतोपचारेषु, अप्रमादिनि मान्यमाननासु, अनुद्धतप्रकृतौ, पूर्वाभिभाषिणि बन्धुप्रिये पाण्डवैकप्राणे तस्मिन्नुदासीनवदासीने, मुहुर्मुहुः सो-

ग्वशायनिकोऽसौ राजा स्वयमलब्धोत्तरतया किमिदमपूर्वमौदासीन्यं कृष्णेऽपीति व्यग्रो भवन्, भगवन् अधोक्षज, एवमेकान्तेन मनसा किमभिध्यायसि। न ह्येवमनादृतपूर्वं मे निवेदनं भवता। अतो भवितव्यमत्रानल्पेनैव कारणेन। यदि मन्यसे नातिगोप्यमिव, तदिच्छामि तस्य हेतुमवगन्तुम्। इति। तावत्प्रतिलब्धवृत्तिरिवोत्थितो हृषीकेशः कथं भूपतिरागत इति सहसा मञ्चादवतरंस्तमुवाच—राजन्, यस्तव प्रपितामहेन शंतनुना हैमवत्यामुत्पादितः, येन पितुः कृते स्वसुखं तुच्छीकृतं, यस्य भुजशुष्ममूष्मायमाणं सोढुमक्षमाः सर्वे क्षमापतयः क्षत्रसंवर्तको मुनिश्च, येन वा पितृमहिमप्रख्यापनपरेण शरमये तल्पेऽतिकृच्छ्रं तपस्तप्यते, सोऽसौ तव पितामहो भीष्मस्तैलधारावदविच्छिन्नप्रवाहेण विजातीयप्रत्ययान्तरानन्तरितेनैकजातीयकेन मन्मयेन ध्यानयोगेन वशीकृत्य बलादात्मनो हृदयपुण्डरीके मामवस्थापितवान्। जानीहि मां सर्वत्र स्वतन्त्रमपि भक्तपरतन्त्रम्। प्रथमः खल्वेष महात्मा सत्त्ववतामिव सात्वतानां च। त्वया सह वाचा व्याहरन्नपि चेतसा तस्य मनस्येवाधुनाऽपि वर्ते। अतः क्षन्तुमर्हसि। इदानीमेवावाभ्यां सभाजयितव्यः स भागवतोत्तमः' इति त्वरयन्, तेन सह कुरुक्षेत्रमाजगाम स योगेश्वरो हरिः।

तत्र व्यासादिभिर्मुनिबृन्दैः परितः परिवार्यमाणं, आरब्ध-

माणकलेवरमहर्निशमात्तशस्त्रैर्वसुभिः, निरिन्धनं शमीगर्भसंभवमिव प्रशाम्यन्तमपि तपसा देदीप्यमानं, निस्तरङ्गं तरङ्गमालिनमिव समुपरतबाहीकव्यापारमपि कल्लोलितमिवाविच्छिन्नप्रवाहेण ध्यानयोगेन, विजितश्वासप्रचारं, प्रत्याहृतनिखिलेन्द्रियवर्गं तं कुरुवृद्धमपश्यतां तौ यादवेन्द्रपौरवेन्द्रौ। दृष्ट्वा च तौ चन्द्रवंशावतंसौ मा भूत्समाधिभङ्ग इति तदन्तिके क्षणं तूष्णीमस्थाताम्। सुचिरमेकाग्रेण चेतसा तं पुराणपुरुषं निध्यायन्नवस्थितः स योगी विद्युन्निमेषवत्सपदि तिरोहिते तस्मिन्महसि, किमिदमाकस्मिकमात्मापध्वंसनमिति ससंभ्रममक्षिणी समुन्मील्य यावत्पश्यति, तावत्तमेव योगनाथमग्रतः साक्षात्कुर्वन् कुतूहलितः 'भगवन्, योगेश्वर, अपि स्वागतम्। इदं ते नमः' इत्यञ्जलिं बध्नन्नाबभाषे 'अहो मम सौभाग्यं, यदद्याप्युपनिषत्कदम्बैरन्विष्यमाणं, अनवगाह्यं प्रत्यक्षादिप्रमाणैः, अस्तिनास्त्यादिनानाविप्रतिपत्तिकारणं विवादशीलानां, प्रकाशरूपं केवलेन भक्तियोगेन केवलं शरणं प्रपन्नानां, परात्परं परमपुरुषाख्यं परं धाम मा भूद्ध्यानयोगकृतः परिक्लेशोऽस्य तपस्विन इति कृपया मनसोऽवरुह्य परममङ्गलेन घनश्यामेन वपुषा मम पुरः प्रादुर्भूतम्। भगवन्, पुण्डरीकाक्ष, ईदृशेऽवसरे एवं दर्शनदानेनानुगृह्णतस्तव किमहं प्रतिकुर्याम्। शस्त्रव्यथाकलुषितात्मनो ममागदङ्कारो भवन्, देहि मे योगसिद्धिम्।

तथाभ्यर्थितो हरिः 'अद्यैव वीतव्यथो भव। प्रतिभान्तु च ते सर्वाणि शास्त्राणि, अतीतानागतविषयाणि ज्ञानानि च' इति तस्मै वरं दत्त्वा, सपद्येवापेतसर्वोपद्रवे निर्भातसर्वतत्त्वे च तस्मिन् संजाते, पुनरुवाच—भोः शांतनव, ज्ञातिवधेन विदूयमानमानसो न यथावत्प्रजाकार्ये मनः कुरुतेऽयं राजा युधिष्ठिरः। यथैष व्यपेतकालुष्यो यथापुरं स्वधर्ममाचरेत्तथोपदिश्यतां भवता। कृतकिल्बिषतया त्वयि साक्षान्निवेदयितुमपत्रपमाणो मां चोदयति। अवश्यं च जिहासुनेमं लोकं विभज्य प्रदेयं हि स्वं रिक्थं रिक्थार्हेभ्यो दायादेभ्यः। अतस्तव धर्मज्ञानरूपं धनमर्पयार्हत्तमेऽस्मिन् पौत्रे' इति। स च विहस्य प्रत्याह 'भगवन् शास्त्रयोने, तदिदं दीपनीराजनमादित्यस्य, यद्विष्णोः संनिधौ विष्णुपदीसंभवस्य प्रवचनम्। अतस्त्वयैवोपदिश्यताम्' इति। ननु भोः, तव गुणप्रचयार्थोऽयमास्माकीनो व्यवसायः। अतः शाधि धर्मानिति पुनरपि कृष्णेनोक्ते, स भीष्मः सकौतुकमूचे—'अहो मयि पक्षपातो भगवतः। तदवश्यं प्रवचनीयस्य प्रवचनीयोऽस्मि। कामं पृच्छतु युधिष्ठिरः' इति। तावदस्ताचलशिखरमीयुषि त्रयीवपुषि ज्योतिषि, श्वः प्रातरुपदेश इत्युक्त्वा भीष्मं प्रणम्य तौ पुरमगच्छताम्।

अभ्येद्युरुपस्थेव जिज्ञासून् पौरान् भ्रातॄंश्चाह्वयन् कृष्णं पुर-

स्कृत्य भीष्मान्तिकमुपगतो राजा एषोऽस्मि तव विनेय इति सप्रणाममग्रतस्तस्थौ। तदन्तरे बहव ऋषिसंघास्तत्र समवयन्ति स्म। ततो नारदवसिष्ठव्यासादिषु सभास्तारेषु, तदध्यक्षे भगवति वासुदेवे, प्रष्टरि प्रष्ठे धर्मात्मना धर्मसुते, प्रवक्तरि च धर्मज्ञानतपसामेकायने तत्रभवति भीष्मे, तां सभां कलयाप्यनुकलयितुं नालं बभूव सभापि स्वयंभुवः। अथ पितामह, व्याचक्ष्व राजधर्मानापद्धर्मान्मोक्षधर्मांश्चेति युधिष्ठिरेण पृष्टो भीष्मो नमो भगवते धर्माय धर्मगोप्त्रे कृष्णाय चेति नमस्यन्व्याचचक्षे।

वत्स पाण्डव, सन्ति बहवो राजधर्माः, विशिष्यते तेषु प्रजापालनम्। तत्र सम्यगवस्थितस्य नरेश्वरस्य न परिहीयते ऐहिकमामुष्मिकं च श्रेयः सत्स्वसत्स्वप्यन्येषु धर्मेषु। तदभावे तु मोघप्रयासकमेव सहस्रमपि धर्मान्तराणाम्। राजशब्दोऽपि रञ्जनेन विना कथमर्थवान् स्यात्। अतो हि गर्भिणीसधर्माणमुदाहरन्ति प्रजेश्वरम्। यथा नातिप्रियेणाप्यात्मनो गर्भीयेणान्नपानादिना नियमेन तं भावयत्यन्तर्वत्नी, एवं प्रजापालोऽपि प्रजानुकूल एव कर्मणि मनो दध्यात्। तर्ह्येवोपपन्नं स्यादुभयत्र वृत्तितौल्यं प्रजाशब्दस्य। तेन च नातिमृदुना नातितीक्ष्णेन वा भवितव्यम्। अतिमृदोर्मस्तकमारोहति हस्तिन इव हस्तिपकः। अतितीक्ष्णात्तु महोरगादिव नित्यमुद्विजेल्लोकः। अतो वसन्तभानुरिव मृदुतीक्ष्णा-

न्तरवर्ती शाधि पृथिवीम् । मा भूः कार्येष्वालस्यवान् । न ह्यलसस्य वदनेऽपि लसति लक्ष्मीः, किं पुनः सदने । मा च भूरनिश्चितबुद्धिरर्थेषु । उत्तानस्वभावं स्वामिनं पेशलकल्पैर्वाग्भिर्व्यामोह्य, गृध्रसृगालन्यायेन स्वार्थसाधनायोत्तिष्ठेरन्वाचोयुक्तिकुशलाः । अतः सागरेणेव सर्वत्र सुगभीरेण सदा सदाचारवता च भाव्यम्। न खल्वाचारहीनस्य 'सत्यं वद, धर्मं चर' इत्यादिवचनं शुकशारिकावचनतो विशिष्यते । अननुशासितारमप्यनुष्ठातारमाचार्यमिव भावयन्तो निरवद्यहृद्येभ्यस्तच्चेष्टितेभ्यः स्वयमेव संगृह्णीयुरुपदेशान् धर्मकामा मनीषिणः । प्रशस्यतरमेव वाचनिकादानुष्ठानिकमनुशासनम् । ये खल्वहिंसासत्यादयः सामान्यधर्मास्तेषां नित्यतया, न ते पृथक्प्रयत्नेनोपदेष्टव्याः । अवश्यमनुष्ठेया एव ते । न तैर्विनाभूतमुदरपूरणमात्रेण कृतार्थमानिनं पुरुषशब्देन व्यवहर्तुमुत्सहेत देवानांप्रियोऽपि । पुरुषाकारः पशुर्होषः । परहिंसोद्यतेन पुरुषेणेदमालोचनीयं—यद्येवमेव मां हिंस्यात्, तत्कथं मम स्यादिति । यद्येवमेव कार्ये कार्ये विमर्शं कुर्वन्, यदात्मनोऽप्रियमहितं च न तत्परस्य कार्यमिति निश्चिनोति, कथं स हिंसारुचिः स्यात् । अहिंसा हि परमो धर्मः । कामं वञ्चयतु नाम परानतिक्षुद्रस्वभावो लोकः, तथाप्यहो आत्मवञ्चकता अनृतवादिनः, यदयं दुरात्मा सर्वप्रत्ययसाक्षिणं स्वं प्रत्यगात्मानमपि वञ्चयन्नन्यथा दृष्टमन्यथा व्याहर्तुं धृष्णोति ।

आत्मापहारिणस्तस्य न जाने का गतिरिति । तात पाण्डव, मा प्रसाङ्क्षीद्युष्माकं जिह्वा स्वैरेष्वप्यनृतवादाय । एवमस्तेयादयोऽप्यूह्याः । राजन्, इत्येवमुक्तगुणसंपन्ने महीं शासति शासितरि, कथं भवेत्प्रजानां धर्मप्रच्युतिरधर्मस्वीकृतिर्वा । धर्मोत्तरे च जगति, कुतो वा न कालवर्ती भविष्यति वासवः । तादृशं तं कालं कृतयुगमुदाहरन्ति कालतत्त्वकोविदाः । तथा तद्धर्मापकर्षस्य तरतमभावेन त्रेताद्वापरयुगे, यदा तु सर्वोऽपि विपरिवृत्तो भवति धर्मः, सोपप्लवश्च लोकः, तदा पापिष्ठं कलियुगं च कल्पयन्ति कल्पनाचतुराः । एवं राजायत्ततां मनसिकृत्य खलु चतुर्युगरूपस्य कालस्य, स्वयमस्मार्षुः 'राजा कालस्य कारणं' इति । तद्भद्र, त्वं च धर्मेण पृथिवीं पालयन्, एधि कृतयुगस्य कर्ता । मा च ते मनः स्प्राक्षीत् ज्ञातिवधनिमित्तो विषादः । एवं कर्कशो ह्यस्मदीयो धर्मः, यत्प्रत्यवस्थितेन पित्रा पुत्रेण भ्रात्रादिनापि वा वीतशङ्कं प्रतियोद्धव्यं धर्मस्थेन क्षत्त्रियेण । एवं स्वधर्मं कृत्वा किं शोचितुमर्हसि । परं च । परैरपहृतसर्वस्वस्त्वमापद्गतोऽभूः । निर्धनस्य क्षत्त्रियस्य युद्धादृते नास्त्येव धनार्जनोपायः धनेन विना समुच्छ्वसितुमपि नालमस्मिन् लोके । न च विप्रस्येव भैक्षादिनापि वृत्तिर्विहिता राजन्यस्य । जघन्या च मुखंपचता समरश्लाघिनः । अवश्यं हन्तव्यश्चाततायी । एवमापद्धर्मपर्यालोचनयापि न किंचिदवद्यम् ।

अध्यात्मसमीक्षया तु नतरामस्ति शोकावकाशः । पश्य । योऽसौ ममैते हता इति ते शोकः, किमयमात्मनिमित्तः, उत देहनिमित्तः । नित्यो ह्यात्मा, आकाशवदसङ्गश्च । देहे जायमानेऽपि नायं जायते, म्रियमाणेऽपि न म्रियते । देहस्य वधेऽपि नात्मनो वधो भवति । अविनाशिनमनुच्छित्तिधर्माणं चैनं समामनन्ति । अतो न युक्तैव तं प्रति वधाशङ्का । देहनिमित्तापि शङ्का कथं संगच्छते । अपरिहार्यो हि तस्य विनाशः । यद्यज्जनिमद्वस्तु, तदवश्यं विनश्यत्येव । तस्यान्येन संयोगश्च प्रवाहे काष्ठसंयोगवदवश्यं वियोगवानेव । किमस्ति तादृशं वस्तु लोके यत्स्वयमविनश्वरमिष्टवियोगरहितं च । यच्च ते मन्निमित्तमेते हता इति दुःखं, तदपि दूरतः परिहर्तव्यम् । प्राक्तनेन कर्मणैव सर्वो जन्तुर्जायते म्रियते च । इतरस्तु तत्र निमित्तमात्रम् । अन्यथा कथमिदं संगच्छते । बलवद्भिः पच्यमानोऽपि कश्चिन्म्रियते । मुद्गरादिना गाढं मूर्ध्नि प्रहतोऽप्यन्यो जीवति । निश्चिनु स्वेन कर्मणा विना परमाणुपरिमाणमपि सुखदुःखादि जीवस्य न भवतीति । योऽपि जीवानां सर्वफलप्रभुरीश्वरः सोऽपि पर्जन्यधर्मा राजधर्मा च सन् तेषां कर्मानुगुणमेव फलं ददाति । यथा पर्जन्यः प्रवर्षन् यथाबीजमेव बीजान्यङ्कुरवन्ति करोति, यथा च राजा तत्तत्कर्मानुगुणेनैव फलेन कर्मकराननुगृह्णाति, एवमीश्वरोऽपि कर्मानुगुणमेव जन्तूनां फलं प्रदाता । तस्मात्स्वकर्मैव सुखदुःखादे-

रीश्वरप्रसादस्य च कारणं भवति । तद्यदि शास्त्रीयं फलासङ्गव- र्जितं च, तेनानुष्ठितेन क्रमान्मुक्तो भवति, वैपरीत्ये तु बद्धस्ति- ष्ठति। न च कथं प्राक्तनकर्मकृतत्वं जन्मादेरिति भ्रमितव्यम्। कार्यं कारणेन विना न संभवति । इदं शरीरं जनिमत्त्वेन कार्यं सत्, तन्नियतपूर्ववर्ति कारणमपेक्षते । तच्च कर्मैव । तेन च कर्मणा स्वाश्रयभूतं करणं कर्ता चाक्षिप्यते। ततश्च यथेदानीं, एवं प्राग्जन्मन्यप्ययं शरीरी सन्नेतज्जन्मप्राप्त्यनुरूपं कर्म कृत्वा तत्फलभूतमिदं शरीरं प्राप्तवानिति गम्यते । अनेनैव न्यायेन पूर्व- तराण्यपरतराणि च जन्मान्यनुमातुं शक्यन्ते । तथा च कर्मव- शात्पुनः पुनरुत्पद्यमानेषु विपद्यमानेषु च तेषु तेषु शरीरेषु, स्वय- मविनाशी सन्, वासोग्रहणन्यायेन जीर्णं जीर्णं शरीरं विहाय, नवं नवमुपाददानो ऽयमात्मा कथं विनङ्क्ष्यति । यद्यप्ययमविना- शी, तथापि कष्टा खल्वस्य संसारगतिः । अत्यन्तमशुचौ स्मृतिमात्रेणोद्भ्रान्तिकारिणि गर्भाशये सुचिरं निवसतः, शैशवे च स्वयमकल्यस्याविदितान्तरवेदनानिदानैर्विरच्यमानेन विरुद्धोपचा- रेण भूयस्तरां परिक्लिश्यमानस्य, कौमारे दुःसहान्विद्याभ्यासनि- मित्तान् गुरुकुलवासनिमित्तांश्च क्लेशाननुभवतः, यौवने काम- क्रोधादिसमवायेन स्त्रीपुत्रादिनिमित्तेन शत्रुमित्रादिकृतेन धना- दिनिमित्तेन मानावमानकृतेन च निरन्तरेण मानसेन ज्वरेण परितप्यमानस्य, वार्धके च क्रमेणेन्द्रियवैकल्यकृतेन कफवाताद्या-

मयनिमित्तेन मुहुर्मुहुर्मृत्युभयोज्जृम्भणेन च कम्पमानस्य कुत्र कीदृशं वा जन्तोः सुखमस्ति । ततो वैवस्वतगोचरस्य पापच्यमानस्य च कुम्भीपाकादिषु न वक्तव्यमेव यातनाप्रायत्वम् । ततश्च पुनरपि जन्मदुःखं पुनरपि मरणदुःखमित्यपरिहार्या हि दुःखपरंपरा देहिनः । एवं तिर्यगूर्ध्वमधश्च रागादिनिमित्तैः कर्मभिर्घटीयन्त्रवत्कुलालचक्रवच्च परिभ्रमतां जीवानां ब्रूहि कीदृशं सुखं भवति । अत एवैवं विद्वांसः श्रेयस्कामा महात्मानो रागद्वेषनिमित्तान् सर्वान् व्यापारानपास्य फलाभिसंधिवर्जं स्वकर्म कुर्वाणाः, तेन मृदितकषाया भूत्वा भक्तियोगेनेश्वरप्रसादमासाद्य ज्ञानयोगेन मुक्तिं व्रजन्ति । अयमत्र संग्रहः । अवश्यमनधिकृतेन ज्ञाने कर्मैव कर्तव्यम् । अधिकृतेनापि लोकसंग्रहार्थमनुष्ठेयमेव । यस्य यद्विहितं कर्म, तस्य तद्गुणवदेव । तदाचरन्मुच्यते । अन्यथा पतति । प्रकृते क्षत्रियस्य ते शत्रुवधः स्वधर्म एव । न तेन त्वं प्रत्यवायी स्याः । अतो वीतशोकः पालय प्रजाः । परं च । परेश्वरे कृष्णे प्रसन्ने किं विचिन्तया । तथाहि वत्स,' इति समाश्वासयन् भीष्मः प्राप्ते तूत्तरायणे पुनरस्मान् पश्येरिति तं राजानमजातशत्रुं समादिश्य नगराय निवर्तयामास ।

इति श्रीभीष्मविजये उपदेशसंग्रहो नाम

सप्तम उच्छ्वासः

अथ गणरात्रान्ते उदीचीं प्रति प्रत्यावृत्तेषु सप्तसप्तेः सप्तिषु, कृतसंभ्रमो राजा कृष्णं पुरस्कृत्य कुरुक्षेत्रं प्राप्तस्तत्र शरतल्पस्थं भीष्मं प्रणम्य, 'पितामह, प्राप्तमुत्तरायणम्। शाधि माँ' इति निवेदयामास। तमवलोक्य प्रमुदितः शांतनवः सश्लाघमाह- 'वत्स युधिष्ठिर, मम वचसि स्थितोऽसि। सिध्यतु ते सर्वं समीहितम्। अद्य हि माघो मासः शुक्लः पक्षश्च भवति। अतीतान्यष्टपञ्चाशतमहानि ममेदमवस्थस्य। पितुर्वरबलेन हि ध्रियन्ते कृच्छ्रगताः प्राणाः। अनुमन्यस्व मामिदं मर्त्यनीडं जिहासुम्' इति तमनुज्ञाप्य कृष्णं ययाचे 'भगवन् पुण्डरीकाक्ष, अहो मयि ते कृपा। यदीदृशेऽवसरे मम दर्शनगोचरोऽसि। यत्किल प्रायणान्तदर्शनं तदेव भाविनो जन्मनः कारणमुशन्ति महान्तः। तदानीमीप्सितस्मृतिलाभाय किलादितः प्रभृति भवन्तं भावयन्ति भावनाचतुराः। स एव साक्षाद्दर्शनपथमुपगतोऽसि यदि, किमस्तु ततः परतरं सुकृतं पुरुषस्य। तस्मात्क्षणमेवमेव तिष्ठ, यावदुत्क्रामामि, इति। अप्रतिबन्धो वसुपदं याहीति भगवतादिष्टे, तथेत्यभिधाय स भीष्मः आधाय प्राणादिकलापं भ्रूमध्ये, निधाय तमसः पारे प्रकाशमानं स्वयंज्योतिर्वस्तु स्वान्ते, क्षणं निदिध्यासनपरोऽवतस्थे। तावदभ्रभुवमवतीर्णे सहस्रधुर्येण रथेन सह त्रयस्त्रिंशत्कोटिदेवतामण्डलमण्डिते सहस्राक्षे, सर्वतः प्रसूनवर्षिषु वैमानिकेषु, स्तुवत्सु मुनिगणेषु नृत्यन्तीष्वप्सरःसु, स्वयमुच्चक्रमिषुर्भीष्मो बद्धा-

ञ्जलिपुटोऽनेन स्तवराजेन तुष्टाव —

पाहि पाहि भगवन्, परमपुरुष महापुरुष, पुरुषोत्तम, अपरिमिताचिन्तनीयस्वकीयशक्तिविलासलेशविकासविभासितबहुविधाण्डपिण्डचराचरजीवनिकायनिकाय्यभूतस्वोदरकोणैकदेशप्रदेश, धन्वलमदमत्तविशृङ्खलवृत्तक्षत्रलक्षासुराक्षौहिणीक्षोभक्षुभितक्षोणीभरक्षपणकृते नवनवनवनवचनमुखरमुखकमलकमलभवपुरमथनशतमखमुखमखभुगनुनयपरिकलितमनुजभुवनविहरणकुतुक, भोजराजनियोजितवत्सतृणावर्तबकबकीप्रमुखशिशुमारककुलतूलजालकालानलायितबाललीलायित, स्वमायावञ्चितवैरिञ्चमायाप्रपञ्च, कालीयफणीन्द्रफणागणमणिमयमहारङ्गस्थलप्रचण्डताण्डवपण्डित, गोपीजनसमुदयमानसराजहंसस्वैरविहारपद्माकर, छत्रीकृतगोवर्धनाद्रे, कंसकालयवनमागधशिशुपालादिमत्तमहामृगयूथमृगयाविहारविक्रान्तकण्ठीरव, नरकण्ठीरव, देवकीवसुदेवजन्मजन्मार्जितनिरवद्यतपःसंचयसमुदञ्चसौभाग्यमहोदयपरिपाकमूर्ते, दूरीकृतद्रुपदराजकन्यकार्ते, अद्भुतकीर्ते, रुक्मिणीसत्यभामादिपत्नीमुखपद्मपद्मबन्धो, करुणासिन्धो, पाण्डवकुलजीवातो, धार्तराष्ट्रकुलतूलजालधूमकेतो, प्रपन्नजनरक्षैकप्रयोजनावतार, समन्ततारितविश्वंभराभार, विश्वंभर, सत्यसंकल्प, कल्पनातीतस्वरूप, क्रियानहमतीन्द्रियमवाङ्मनसगोचरं ते स्वरूपमवगन्तुम् ।

धेहि धेहि रथ्यखुरपुटोत्थितधूलिधूसरितं परागरूषितलोलोलम्बकदम्बकविडम्बकनिटिलतटावलम्बिविलुलितालकावलीचुम्ब्यमानालिकं समराङ्कणालंकरणं मदभियोगाय सचक्रमभिद्रवतस्ते वदनारविन्दं मम हृदयारविन्दे। सकृत्ते नमोऽसकृत्ते नमो दशकृत्वस्ते नमः शतकृत्वस्ते नमः सहस्रकृत्वस्ते नमः। परममङ्गल, जगन्मङ्गल, पाहि पाहि कृष्ण, नमस्ते नमस्ते। इति स्तुवन्नेव ब्रह्मरन्ध्रेण परंज्योतिःस्वरूपः समुत्थाय दिवमारोहन् यथापुरं स्वे वासवे पदे चकासामास।

**जयतु जयतु दिव्यं धाम कृष्णाभिधानं**
**जयतु जयतु भीष्मः सत्यधर्मव्रतात्मा**
**जयतु जयतु धर्म्या पद्धतिः साधुगम्या**
**जयतु च सुमतीनां वाचि सारस्वतश्रीः॥**

इति श्रीलक्ष्मणसूरिविरचिते
श्रीभीष्मविजये स्वर्गारोहो
नाम अष्टम
उल्लासः॥

समाप्तश्चायं ग्रन्थः॥

ओंतत्सत्॥

---

S. MURTHY AND CO., MADRAS—1909.

# ॥ टिप्पणी ॥

(पृष्टम् १.) भीष्मस्य विजयमधिकृत्य कृतं काव्यं भीष्मविजयम्, अभेदोपचारात्। येनेति। सुदुर्ग्रहौ सुतरां दुर्दमौ कामो मन्मथः कालो यमश्च येन निगृहीतौ शिक्षितौ, ततश्च स सर्वलोकानामीष्टे सर्वलोकेश्वरो भवतीत्यर्थः 'अधीगर्थदयेशां कर्मणि' इति लोकानामित्यत्र कर्मणि षष्ठी। तं राजशेखरं चन्द्रशेखरं नौमि स्तवीमि। अत्र काव्यार्थसूचनं यथा—भीष्मस्य नैष्ठिकत्वात्स्वच्छन्दमृत्युत्वाच्च कामकालनिग्रहीतृत्वं, ततश्च सर्वलोकेष्वव्याहतगतित्वं तृतीयपादार्थः। राजशेखरं क्षत्रियश्रेष्ठम् 'राजा मृगाङ्के क्षत्रिये नृपे' इत्यमरः। 'मङ्गल्या शङ्खचन्द्राब्जकोककैरवशंसिनी' इत्युक्तेरत्र चन्द्रवाचकराजपदप्रयोगान्मङ्गल्यत्वम्। आसीदित्यस्य राजेत्यनेन संबन्धः। सुधेत्यादि। सुधासाराणिष्यन्दिनो गुणा मयूखा इवेति राजपक्षे। सुधासारनिष्यन्दिगुणाश्च ते मयूखाश्चेति चन्द्रपक्षे च समासः। विस्रसा जरा। वैकृतजातं विकारसमूहः। 'जातं व्यक्तौघजन्मसु' इति मेदिनी। अत एवेति। शंतन्यतेऽनेनेति शंतनुः। 'यं यं कराभ्यां स्पृशति जीर्णं च सुखमश्नुते। पुनर्युवा च भवति तस्मात्तं शंतनुं विदुः' इत्यादिपर्वणि। समामनन्ति स्मरन्ति 'पाद्मा' इत्यादिना श्रोतॄमनादेशः। लहरी स्यन्दः। समुक्षितानां सिक्तानाम्। भावानां पदार्थानां जन्तूनां वा। 'भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु। क्रियालीलापदार्थेषु विभूतिबुधजन्तुषु। रत्यादौ च' इति मेदिनी। सौभाग्यं सौन्दर्यम्। लोलुभा अतीवासक्ता। समुपलम्भनमनुभवः। कौमारेत्यादि कुमारो नवयौवनवान्, तत्संबन्धी यो विहारस्तत्र कुतूहलिनीव स्थिता राजलक्ष्मीरित्यर्थः। यद्वा। कौमारविहारकुतूहलिनि इवेति पदच्छेदः। कुमारविशेषणम्। अपूर्वपतिं कुमारीं पतिरुपपन्नः कौमारः 'कौमारापूर्ववचने' इति सूत्रेण तथा

निपातनात् । तस्य यो विहार इत्यादि । उपवाहिता प्रापिता । अवततारेति यस्मिन् कुमार इत्यनेन संबध्यते । गुणगृह्या गुणपक्षपातिनः 'पदास्वैरि' इत्यादिना ग्रहेः क्यपि संप्रसारणे रूपं गृह्यति । पक्ष्ये वृत्तिः। विदूरस्थं दूरदेशवर्ति विदूराख्य-पर्वतवर्ति वा । समृद्धं संपूर्णम् । समुपादित्सन्ते सम्यगुपादातुमिच्छन्ति 'सनि मीमा' इत्यादिना ददातेः सनि 'अच इस्' 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपश्च । तद्विपरीते गुणविहीने । लोष्टपाषाणवल्लोष्टपाषाणेष्विव । लोष्टानि पांसुपिण्डाः । पाषाणा ग्रावाणः । (पृ. २.) अपदार्थभावनया वस्तुत्वेनापरिगणनीयत्वचिन्तया न्यायादनपेतं न्याय्यम् 'धर्मपथ्यर्थन्यायादनपेते' इति यत् । त्वग्दोषिणीति । तथा चोद्योगपर्वणि— देवापिस्तु महातेजास्त्वग्दोषी राजसत्तमः...अथ कालस्य पर्याये वृद्धो नृपतिसत्तमः । संभारानभिषेकार्थं कारयामास शास्त्रतः । तं ब्राह्मणाश्च वृद्धाश्च पौरजानपदैः सह । सर्वे निवारयामासुर्देवापेरभिषेचनम् । बाह्लीकेन त्वनुज्ञातः शंतनुर्लोकविश्रुतः । पितर्युपरते राजन् राज्यकाममकारयत्' इति । अखण्डितेति अखण्डितश्चासावुपभोगश्च तस्य प्रदानेन । यद्वा । न खण्डिता अखण्डिता तस्या उपभोगप्रदानेन । खण्डिता नायिकाविशेषः । तल्लक्षणं तु—'पार्श्वमेति प्रियो यस्या अन्यसंभोगचिह्नितः । सा खण्डितेति विज्ञेया धीरैरीर्ष्याकषायिता ॥' इति ।

संचरमाण इति 'समस्तृतीयायुक्तात्' इति तङ् । विजयवैजयन्ती विजयप्रदर्शनार्था पताका । लब्धान्तरो लब्धावकाशस्तेन । छिद्रितान्तरश्छिद्रीकृतान्तरात्मा 'अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च' इत्यमरः । शुनः पदमेष्विति श्वापदा दुष्टमृगाः 'अथ हिंस्रपशुर्व्यालः श्वापदः शियिरित्यपि' इति त्रिकाण्डशेषः । 'शुनो दन्तदंष्ट्रा' इत्यादिना पूर्वपदस्य दीर्घः । शरणे (रक्षणे) साधु शरण्यम् । सहचरो भर्ता । अनुचरः परिजनः । साध्वसगन्धो भयलेशः । 'गन्धो गन्धक आमोदे लेशे संबन्धगर्वयोः ।' इति विश्वः । निर्वृतं संतुष्टम् । एकान्ते भीरवो भयशीला एकान्तभीरवः । यद्वा एकान्ततो नियमेन भीरव इति । प्रतिपत्तिर्गौरवम् ।

गौरवे प्रतिपत्तिः स्यात्' इति हारावली । (पृ. ३.) **तद्विशेषमिति** ॥ त्वन्नामादिकं ब्रूहीत्यर्थः । अन्यथा देवजातिज्ञानमात्रमकिंचित्करमित्याह— **न हीति** । जिज्ञास्यं ज्ञातुमेष्टव्यम् । ज्ञातुमिच्छा जिज्ञासा । वक्तुमिच्छा विवक्षा, अन्या विवक्षा विवक्षान्तरम् । मयूरव्यंसकादित्वात्समासः । अनेहसा कालेन 'कालो दिष्टोऽप्यनेहापि' इत्यमरः । अनीश्वरः प्रवेष्टुमशक्तः 'स्थेश' इत्यादिना वरच् । अवष्टम्भ अवलम्बो गर्वश्च । विष्टम्भयति शिथिलयति 'स्तम्भेः' 'अवाच्चालम्बनाविदूर्ययोः' इति च सूत्राभ्यां स्तम्भेः सस्य षः । अपथेषु पारदारिकत्वाद्यमार्गेषु 'अपथं नपुंसकं' इति तत्पुरुषे निपात्यते । **भारतेति** भारतं भरतवंशोत्पन्नमात्मानं व्यपदिशन्ति व्याहरन्तीति भारतव्यपदेशिनः । भारतवर्षीयत्वव्यपदेशिनश्चेति ध्वनिः । नेता नायको राजा । विषयो देशः । कुलीनः सत्कुलप्रसूतः 'कुलात्खः' एतेन परदारविमुखत्वेनैव लिङ्गेन कुलं निश्चेयमिति भावः । उपोद्बलयति दृढयति । ऐतिह्यं पारंपर्योपदेशः । 'पारं-पर्योपदेशः स्यादैतिह्यं' इत्यमरः । प्रसन्नो निर्मलस्तत्त्वावगाहीत्यर्थः । प्रसन्नतरोऽतीव संतुष्टः । 'प्रसन्ना स्त्री सुरायां स्यात्स्वच्छसंतुष्टयोस्त्रिषु' इति मेदिनी । भावो मनः। ओंकारोऽङ्गीकारः प्रणवश्च । **वाक्प्रपञ्च इति** । 'ओमित्येतदक्षरमिदं सर्वं' इत्यादिश्रुतिभ्यः सर्वस्य वाक्प्रपञ्चस्योंकारात्मकत्वमोंकारकार्यत्वं चावधृतम् । प्रपञ्चो विस्तारः । **एकातपत्रेति** । एतेनात्मनः सार्वभौमत्वं परिग्रहान्तररहितत्वं च दर्शितम् ।

उपमन्त्र्यमाणे सानुरागं प्रार्थ्यमाने । खेलः क्रीडाविशेषः । वलितं वक्रितम् । कन्दलयन्ती वर्धयन्तीत्यर्थः । अङ्कूर इति 'अङ्कुरोऽङ्कुर एव च' इति द्विरूपकोशे [पृ. ४.] जगती मही । **प्रख्यातेत्यादि** । अहमपि भवानिव महाकुलप्रसूतेत्यर्थः । महीभृत् राजा पर्वतश्च । कुलगिरेर्हिमवतः संजाताहमिति वास्तवार्थः । समयेन कालक्रमेण । प्रवणा प्रीतिमती विदग्धाश्चतुराः । सलिलवेण्यो जलप्रवाहाः 'वेणी केशस्य बन्धने । नद्यादेरन्तरे देवताले' इति मेदिनी । परपरिग्रहः परस्त्री । उपग्रहो नियन्त्रणा संकोच इति

यावत् । अनार्योऽश्रेयः । शूककीटो वृश्चिकः । संकल्पयोनिर्मन्मथः । कल्पनानर्हे-ष्वनुचितघटनेषु । मोघसंकल्पो निष्फलोद्यमः विरमतीति 'व्याङ्परिभ्यो रमः' इति परस्मैपदम् । अनवद्यमनिन्द्यं समीचीनमित्यर्थः । 'अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु' इति वदेर्नञ्युपपदे गर्हायां यन्निपात्यते । कृच्छ्रोपपादनीयं प्रयत्नेन संपादनीयम् । स्त्री च पुमांश्च स्त्रीपुंसौ 'अचतुर' इत्यादिना निपातनात्साधुः । गृह्यका गृहेष्वस्वतन्त्राः कृता गवाश्वादयः । 'गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते' इत्यमरः । 'पदास्वैरि' इत्यादिना ग्रहेरस्वैरितायां क्यप्. गृह्या एव गृह्यकाः । माननीयाः पूज्याः । (पृ—५.) त्रिवर्गो धर्मार्थकामाः। सहधर्मिणी भार्या । 'धर्मं चरति' इति ठक् । धार्मिकः सुतरां धार्मिकः सुधार्मिकः। जाया भार्यैव अधिरोहणी निश्रेणिस्तस्याम् । जायापदप्रयोगेण चात्मन एव पुत्रात्मना जायमानत्वं दर्शितम् । तथा च मनुः—'पतिर्जायां संप्रविश्य गर्भो भूत्वेह जायते । जायायास्तद्धि जायात्वं यदस्यां जायते पुनः । ' इति । निश्चितं श्रेयो निःश्रेयसम् । 'अचतुर' इत्यादिना अजन्तो निपातः । जङ्घालतमोऽतीव वेगवान् 'जङ्घालोऽतिजवस्तुल्यौ' इत्याद्यमरः । 'प्राणिस्थादातः' इत्यादिना मत्वर्थीयो लच् । प्ररोचना रुच्युत्पादनम् । कान्ता कामिन्येव हृद इति रूपकम् । अगाधजलो जलाशयो हृदः । कुटुम्बिनी पतिपुत्रवती कुटुम्बव्यापृता स्त्री । तस्याम्। संगुणितं विशिष्टम् । अवज्ञातुमस्वातन्त्र्यकरणेन पराभवितुम् । ईहेत इच्छेत् । अभिसंधिरभिप्रायः । निवेशनं गृहम् । अथेति पक्षान्तरग्रहणार्थः । नियमं प्रतिज्ञाम् । 'संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः' इत्यमरः । नियमयसि निवारयसि । अपसर्तुमपक्रमितुम् । कृतार्थमात्मानं मन्यत इति कृतार्थमानी 'आत्ममाने खश्च' इति चाणिनिः । स्रोतस्विनी नदी । धृष्णोति प्रगल्भते । (पृ—६,) पर्यनुयोक्ष्यामहे प्रक्ष्यामः । स्मरेत्यादि कामबाधितस्य ममोपकारिणी भवेत्यर्थः । विशल्यः क्रियतेऽनयेति विशल्यकरणी महौषधिविशेषः । उपवदमानः प्रार्थयमानः 'भासनोपसंभाषा ' इत्यादिनोपमन्त्रणे वदेस्तङ् । कालयामास गमयामास ।

दोहदश्चिह्नेषु गर्भलक्षणेषु । कुसुमिता संजातकुसुमा तारकादित्वादितच् । **उपर्युपरीत्यादि** 'उपर्यादिषु त्रिषु' इति द्वितीया । 'उपर्यध्यधसः सामीप्ये' इति द्वित्वम् । **पुत्रलाभेनेत्यादि** 'प्रसितोत्सुकाभ्यां तृतीया च' इति तृतीयासप्तम्यौ ।

उदयो लग्नमुत्पत्तिश्च । संमदपूरः संतोषप्रवाहः 'प्रमदसंमदौ हर्षे' इति निपातनात्साधुः। द्वितीयमाश्रमं गार्हस्थ्यम् । समनयत्सु संघीभवत्सु । (पृ—७) पितरि शंतनौ । अपवर्गो मोक्षः। आशासाना आशिषं प्रयुञ्जाना । रोरुद्यमानमतीव रुदन्तं, रुदेर्यङन्ताच्छानच् । घातकी हिंसाशीला । प्रास्यति स्म चिक्षेप । **आ इति** 'आस्तु स्यात्कोपपीडयोः' इत्यमरः। उद्भटो भयानकः आटोप उपक्रमो येषां तेषु । आकूतमभिप्रायः । भ्रुकुटीं प्रेक्षन्त इति भ्रुकुटीप्रेक्षास्तेषु 'ईक्षिक्षमिभ्यां च' इति णः । ललाटं पश्यन्ति लालाटिकाः 'संज्ञायां ललाटकुक्कुट्यौ पश्यति' इति ठक् 'लालाटिकः प्रभोर्भावदर्शी कार्याक्षमश्च यः' इत्यमरः । निवचनेकृत्य वाचं नियम्य 'मध्ये पदे निवचने च' इति गतित्वम्। अस्य च गर्भितेत्यनेन संबन्धः। वाचं नियम्यान्तर्निरुद्धहाहाकारेष्वित्यर्थः । इतिकर्तव्यता इत्थमिदानीमाचरितव्यमिति निश्चयः । जडीभूतेष्विव कृत्याकृत्यविधुरेष्विव । अपोढं त्यक्तम् । स्तम्भितो निर्व्यापारीकृतः । 'काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः' इत्यमरः । नरपरिवृढो राजा 'प्रभौ परिवृढः' इति निपातनात्साधुः । समक्षमक्ष्णः समीपे । संवित् प्रतिज्ञा । लाडस इच्छा ! अवहित्था आकारगुप्तिः तया सह सावहित्थम् । संयमी योगी । तितिक्षा सुखदुःखादिसहनम् । वाचंयमो मौनव्रती 'वाचि यमो व्रते' इति खच् । 'वाचंयमपुरंदरौ च' इति वाचोऽमन्तत्वं निपातितम् । तूष्णीकस्तूष्णींशीलः। 'तूष्णींशीलस्तु तूष्णीकः' इत्यमरः।'तूष्णीमःको मलोपश्च' इति कमलोपौ। चाटुकारः प्रियालापः।विप्लुष्टं दग्धम् । कादम्बिनी मेघमाला । कमितुः कान्तस्य । घनेन निरन्तरेण रसेनास्वादेन अनुविद्धं व्याप्तमिति यावत्। अन्यत्र घनरसो जलम् । चमत्कारश्चातुर्यम्। अवमो निकृष्टः न अवमोऽनवमः । संवनितात्मा वशीकृतमनाः । स्वात्मनोऽपि न सस्मारेति 'अधीगर्थदयेशां कर्मणि' इति षष्ठी । अधीगर्थः स्मृत्यर्थः। (पृ—८) विततीभवति

च्याप्रियमाणे। अदान्तममर्षवशमापन्नं स्वान्तं मनो येषां ते तथोक्ताः। आन्तरेणातिसूक्ष्मेण। प्रतीत्या गौरवेण प्रत्ययेन वा। 'अनेडमूकः स्याद्वक्तुं श्रोतुमशिक्षिते' इत्यमरः। अन्तर्वत्नी गर्भिणी अन्तरस्त्यस्यां गर्भ इति विग्रहे 'अन्तर्वत्पतिवतोर्नुक्' इति नुक् ङीप् च। अत्याहितं महाभीतिः। प्रहतपूर्वया पूर्वमभ्यस्तया। निष्ठां नाशम्। 'निष्ठा निष्पत्तिनाशान्ताः' इत्यमरः। निभृतमेकान्तः। नृशंसस्वभावा हिंसाशीलाः। तोकमपत्यम्। अस्तोकमधिकम्। 'उदर्कः फलमुत्तरं' इत्यमरः। विपरिणंस्यते विपरिणामं पक्वतां प्राप्स्यति। कर्मकर्तरिप्रयोगोऽयम्। माध्यस्थ्यमकुरुत न किंचिदूच इत्यर्थः॥

विशासितेषु हिंसितेषु। वर्धिष्णौ वर्धनशीले वर्धमान इत्यर्थः। 'अलंकृञ्' इत्यादिना इष्णुच्। गर्भेऽर्भके 'कुक्षिभ्रूणार्भका गर्भाः' इत्यमरः। प्रणयोऽनुरागः। (पृ—९.) अत्रुटितेऽभग्ने। अयातयाम इति। 'जीर्णं च परिभुक्तं च यातयाममिदं द्वयम्' इत्यमरः। तद्भिन्नमयातयामं नवमुपभोगक्षमं चेत्यर्थः। तस्मिन्। सृज्यत इति सर्गः भोगरूपः सर्गो भोगसर्गः। तस्मिन्। उपदेशस्तत्त्वानुशासनम्। संभाषणं उपदेशं विनापि सामान्यसंलापः। सहवास एकत्र सहवसतिमात्रम्। समागमः समीपोपगमनम्। संनिधानं दर्शनविषयीभवनमात्रम्। उद्वेजितो वैराग्यमापादितः। प्राप्ता वैजननं प्राप्तवैजनना आसन्नप्रसवेत्यर्थः। 'प्राप्तापन्ने च द्वितीयया' इति समासः। 'द्विगुप्राप्तापन्न' इत्यादिना परवल्लिङ्गताप्रतिषेधात्पूर्वपल्लिङ्गता। वैजननं सूतिमासः। आसेचनकमत्यन्तप्रियदर्शनम् 'तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात्' इत्यमरः। अनूनं संपूर्णम्॥

सनातनो नित्यः। धर्मः पादप इवेत्युपमितसमासः। माया परव्यामोहनसामर्थ्यम्। दम्भेन चरन्ति दाम्भिका धर्मध्वजिनः 'चरति' इति ठक्। संत्रासः कम्पः। संयुगे (युद्धे) साधवः सांयुगीनाः प्रतिजनादित्वात्खञ्। घनः काठिन्यम् 'मूर्तौ घनः' इति निपातनात्साधुः। मूर्तिः काठिन्यमित्युक्तम्। ऊष्मा उष्णः। विलापितो द्रवीकृतः। ग्राम्यसुखं स्त्रीसङ्गजं सुखम्। न अत्यन्तं नात्यन्तं नञर्थस्य नशब्दस्य अत्यन्तशब्दस्य च सुप्सुपेति समासः। प्रविविक्षतां प्रवेष्टुमिच्छताम्।

उपकुर्वकाणामिति । ब्रह्मचारिणो द्विविधा उपकुर्वाणा नैष्ठिकाश्चेति । वेदग्रहण-पर्यन्तं गृहीतनियमा उपकुर्वाणाः । यावज्जीवं ब्रह्मचर्यव्रतधरा नैष्ठिका इति भेदः । उपकुर्वाणा एवोपकुर्वकाः। चैत्यवृक्षो मार्गस्थो विश्रान्तिहेतुर्वृक्षः । चत्वार आश्रमा एव चातुराश्रम्यं चतुर्वर्णादित्वात्स्वार्थे ष्यञ् । उपलभ्य प्राप्य । (पृ—१०) गृहसारान् गार्हस्थ्यस्य मुख्योपयुक्तान् पदार्थान् । पाटच्चरश्चोरः । कदर्थ्ये गर्हिते । स्वप्ने दृष्टो व्याघ्रः स्वप्नव्याघ्रः । तस्य स्वयमवस्तुत्वेऽपि यथा त्रासादि-कारित्वं तद्वदित्यर्थः । भूतावेशः पिशाचादेरनुप्रवेशः । भिषज्यमानश्चिकित्स्यमानः । 'भिषज् चिकित्सायां' इति कण्ड्वादिरयं धातुः । दिवान्धो घूकः । न्यलीयतान्त-र्हितो बभूव ।

पावकिः स्कन्दः । ओजश्च प्रसादश्च ताभ्यां शालते शोभत इति ओजः-प्रसादशालिनी तया । ओजो दीप्तिः । प्रसादः स्वाच्छ्यम् । बुद्धिजाड्यकृतकालुष्य-रहितमित्यर्थः । वाक्पक्षे तु यथावसरं समासभूयस्त्वं, तथाप्यर्थवैमल्यं च भवत इत्यर्थः। अर्थवैमल्यं प्रसादः । इत्युक्तम् । प्रसित आसक्तः । परायणं परा गतिः । सर्वं कषति हिनस्तीति सर्वकषा तस्याम् । 'सर्वकूलाभ्रकरीषेषु कषः' इति खश् मुम् च । प्रतिप्रसवं प्रसवे प्रसवे वीप्सायामव्ययीभावः। प्रतिप्रसववृत्त्येति । अपवाद-स्यापवादः प्रतिप्रसवः, तस्य वृत्त्या व्यापारेण । न स्त्री स्वातन्त्र्यमर्हतीति न्यायः सामान्यः, तदपवादोऽस्याः स्वाच्छन्द्यवरः । तस्यापवादः 'इतः परं ते स्वाच्छन्द्यं मास्तु' इति तद्वरभञ्जनं, तदर्थमित्यर्थः । समिध्यमानो दीप्यमानः । इन्धनं दारु । दाक्षिण्यं परच्छन्दानुवर्तित्वम् । 'दक्षिणः सरलोदारपरच्छन्दानुवर्तिषु' इत्यमरः । उपेक्षणमनादरणम् । क्षेमाय कल्पत इति 'कृपि संपद्यमाने च' इति चतुर्थी । विरतिर्विरामः । अपवर्गः फलप्राप्तिः । 'अपवर्गे तृतीया' इत्यादिषु तथोक्तत्वात् । हानं त्यागः । उपादानं स्वीकरणम् । प्रतिपन्थिनी शत्रुर्नाशिनीत्यर्थः । वंशकरीरः कुलतन्तुर्वेणुवङ्कुरश्च । (पृ—११) अतिप्रसङ्गोऽत्यासक्तिः । कुण्डमिवोधो यस्याः सा कुण्डोध्नी 'ऊधसोऽनङ्' पटलं छदिस्तच्छिनत्तीति पटलच्छित् ताम् । प्रौढा प्रगल्भा । तन्त्रं शास्त्रम् । 'वरिवस्या तु शुश्रूषा' इत्यमरः । 'नमोवरिवश्चित्रङः क्यच्'

अनुकूलयितव्येषु अनुकूलमाचरितुमर्हेषु । सर्वाङ्गीणेन सर्वाङ्गव्यापिना, सर्वकर्मीणेन सर्वकर्मव्यापिना, सर्वपथीनेन सर्वपथव्यापिना 'तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति' इति खः । अभिनन्द्यं श्लाघनीयम् । आविष्टा गृहीतासि । बालग्रहः पूतनावद्बालघाती भूतविशेषः । क्रियासमभिहारेण पौनःपुन्येन । निबर्हयति नाशयति । अभियुक्तैर्दीर्घदर्शिभिरित्यर्थः। अवसितः समाप्तः ॥

सोत्प्रासं भावगर्भेण हासेन सह । साधयामि गच्छामि 'प्रायेण व्यन्तकः साधिर्गमेरर्थे प्रयुज्यते ' इत्युक्तेः । इक्ष्वाकोर्गोत्रापत्यमैक्ष्वाकः । 'दाण्डिनायन' इति निपातनात्साधुः । (पृ—१२) ब्रह्माणं विशिनष्टि **तत्र तदानी**मित्यादिना । जातरूपं कनकम् । शतपत्रं पद्मम् । रत्नसानुर्महामेरुः । करुणादीत्यादिपदेन मुदितोपेक्षे गृह्येते । आवर्जयन्त्या वशीकुर्वाणया । वैशारद्यं चातुर्यम् । **अणिमादीति** 'अणिमा महिमा चैव गरिमा लघिमा तथा । प्राप्तिः प्राकाम्यमीशत्वं वशित्वं चाष्टभूतयः' इत्युक्तैर्मूर्तिमद्भिरष्टभिरैश्वर्यैः । काष्ठासु दिक्षु । 'काष्ठोत्कर्षे स्थितौ दिशि' इत्यमरः । **यमनियमेति** । 'यमनियमासनप्राणायामप्रत्याहार-धारणाध्यानसमाधयोऽष्टावङ्गानि' इति पातञ्जलसूत्रोक्ताः । अनिमेषवृत्तिना दृढमवधानवतेत्यर्थः । अवतिष्ठमानं वर्तमानम् । 'समवप्रविभ्यः स्थः' इति तिष्ठतेस्तङ् । **अध्यधीति** उपर्युपरीतिवत्प्रक्रिया । **वाङ्मनसेति** । वाक् च मनश्च वाङ्मनसे 'अचतुर' इत्यादिना अजन्तो निपातितः । चित्रीयमाणं विस्मयावहं 'नमोवरिवश्चित्रङः क्यच् ' जगदेव चित्रमालेख्यम् , तस्य चित्रणे आलेखने चतुरं दक्षम् । 'चित्र चित्रकरणे अद्भुतदर्शने च' इति चौरादिकधातोर्भावे ल्युटि रूपं चित्रणमिति । स्मयो गर्वः । ब्रह्मलोके भवा ब्राह्मलौकिकाः अध्यात्मादित्वाट्ठञ् अनुशतिकादित्वादुभयपदवृद्धिश्च । सूरयो ज्ञानिनः प्रधानमनतिक्रम्य यथाप्रधानम् , पदार्थानतिवृत्तावव्ययीभाव. । एवमुत्तरत्रापि ।

उपतिष्ठमानेषु सेवमानेषु । देवपूजायां तङ् । **ब्रह्मेति** । तुन्दिलान् पूर्णानित्यर्थः । **योगचर्येति** । योगचर्यया योगानुष्ठानेन निर्यापितं व्यपोहितं क्लेशपञ्चकं यैस्तान्, 'योगश्चित्तवृत्तिनिरोधः ।' 'अविद्यास्मितारागद्वेषाभिनिवेशाः

अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या, दृग्दर्शनशक्त्योरेकात्मतेवास्मिता, सुखानुशयी रागः, दुःखानुशयी द्वेषः, स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः' इत्युक्तं पातञ्जले । दृक्शक्तिः पुरुषः दर्शनशक्तिर्बुद्धिः, तयोरत्यन्तभिन्नयोरप्यैकात्म्यमिव यद्भानं सैवास्मितेत्यर्थः । सुगममन्यत् । नदीष्णातान् कुशलानित्यर्थः। 'निनदीभ्यां स्नातेः कौशले' इति स्नातेः सस्य षः। (पृ-१३) निष्ठुरं बलवत्तमम् । 'निसस्तपतावनासेवने' इति षः । पृषतेन बिन्दुना 'पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम्' इत्यमरः । सभाजयन् प्रीणयन्, 'सभाज प्रीतिदर्शनयोः' इति चौरादिको धातुः ।

उपतस्थुषी उपस्थितवती । अवधानभङ्गः प्रमादः । समीरो वायुः । समीरणं प्रेरणम् । अपदिश्य व्याजीकृत्य । विस्रंसमाने गलन्तम् । नीवीबन्धो वस्त्रग्रन्थिः । अवाग्दृष्टिषु पराङ्मुखनेत्रेषु । सदसि साधवः सदस्यास्तेषु । उत्सङ्गदेशे श्लथनीवीके शरीरावयवे । गाढं दृढम् । अवगाढं मग्नम् । प्रस्तारिते व्यापारिते तारके अक्ष्णोः कनीनिके यैस्तेषु । क्षुद्रचेष्टितमल्पकृत्यम् । अपदमस्थानमलभ्यमित्यर्थः। कृपणाशयाः क्षुद्रबुद्धयः । **ऋतुगामिन इति** । ये खल्वृतुस्नातया स्वभार्यया सह आषोडशवासरं निषिद्धतिथ्यादिवर्जं रात्रावुपगमनं कुर्वन्तः शेषकाले शुश्रूषार्थतामात्रेण ता उपभुञ्जते, ते गृहस्थब्रह्मचारिण उपचर्यन्ते । तैरप्यसाध्योऽयं लोकः । तद्ब्रह्मचर्यस्य गौणत्वादित्यर्थः । गृहैः स्त्रीभिः सह मेधः संगमोऽस्त्येषामिति गृहमेधिनः । मोघोद्यो निष्फलः । निर्दग्धं भर्जितम् । ईषद्भास आभासः वैराग्यस्याभासो वैराग्याभासः । कृतार्थमानिनां विरक्तमात्मानं मन्यमानानाम् । (पृ—१४) लालस इच्छा । वृत्तिर्मनोव्यापारः। कषायो रागादिदोषः। 'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः' इति श्रुतौ कषायशब्दस्य तथा व्याख्यातत्वात् । ग्रामो वर्गः। निर्वाणं मुक्तिः। ब्रह्मलोकं गतानां हि तत्र ब्रह्मणोपदिष्टतत्त्वानां ब्रह्मणा सह कैवल्यप्राप्तेस्तल्लोकस्य निर्वाणपदत्वम् 'स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते' इति, 'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्' इति, 'कार्यात्यये तदध्य-

क्षेण सहातः परमभिधानात्' इति च श्रुतिस्मृतिन्यायेभ्यो ब्रह्मलोकं गतानां क्रममुक्तेर्दर्शितत्वात्। **गृहाश्रम इवेति** 'कृत्स्नभावात्तु गृहिणोपसंहारः' इति न्यायेन सर्वोपकारकत्वं गार्हस्थ्यस्य दर्शितम्। 'सर्वोपकारक्षममाश्रमं ते' इति तत्रभवान् कविसार्वभौमः कालिदासश्च। वाल्लभ्यं प्रीतिविषयत्वम्। समुदाचारो मर्यादा। अवहेलनमवमाननम्। समागमस्य संपर्कस्य आगमो निदानमित्यर्थः। समयः शपथः॥

हव्यं देवेभ्यो दीयमानमन्नम्। कव्यं पितृभ्यो दीयमानमन्नम्। उपस्थानीयाः पूजनीयाः उपस्थातारो वा 'भव्यगेय' इत्यादिना कृत्ये कर्तरि च निपातनात्। कटकं सानु 'कटकोऽस्त्री नितम्बोऽद्रेर्दन्तिनां दन्तमण्डने। सामुद्रलवणे राजधानी-वलययोरपि।' इति मेदिनी। अद्रेर्नितम्बः सानु। चरन्तीं भक्षयन्तीम् 'चर गतिभक्षणयोः' निशाम्य वीक्ष्य। (पृ—१५) न ऊनमनूनं। ऊनं निकृष्टम्। उपन्यासो वाङ्मुखमुदाहरणमित्यर्थः। ललामभूता अलंकारभूता। वयसा तुल्या वयस्या सखी 'नौवयोधर्म' इत्यादिना यत्। निध्याय विलोक्य ध्यात्वा च। विनश्वरतां विनाशित्वम्। उद्विग्ना भीतास्मि। सौहार्दं मैत्री। **अजर्यमिति**॥ संगतं मैत्री। अजर्यमजीर्यदस्तु 'अजर्यं संगतं' इति संगते विशेष्ये नञ्पूर्वाज्जीर्यतेः कर्तरि यन्निपात्यते। कदर्थयितुं तिरस्कर्तुम्। संजल्पितमसंबद्धं वचनम्। आवश्यकत्वेनावश्यकर्तव्यत्वेन। वातानां समूहो वात्या। पाशादित्वाद्यः। अनुरुध्यमाना अनुसरन्तः 'अनो रुध कामे' इति दैवादिको धातुः। समाधिमयेन ध्यानरूपेण। वराका निकृष्टाः। लुण्टाककर्मणि स्तेये। 'जल्पभिक्षलुण्टवृङः षाकन्' इति षाकनि वराक इति लुण्टाक च रूपम्। पृ—१६ असांप्रतमयुक्तम्। असंप्रतिपन्नेनानर्हेण। निर्विद्यमाना निरुत्साहा भवन्तः। गां वाचं शापमिति यावत्। सौरभेयी नन्दिनी। क्षमी क्षमाशीलः शमादित्वात्क्षाम्यतेस्ताच्छीलिको घिणुन्। छन्दोऽभिप्रायोऽनुरोध इति यावत्। निष्कृतिः प्रायश्चित्तम्। अनुहरमाणा अनुसरन्तः 'हरतेर्गतताच्छील्ये' इति तङ्। व्राताः समूहाः। पुरुषस्यायुः पुरुषायुषम्। 'अचतुर' इत्यादिना अजन्तो निपातः। अप्रतिद्वंद्वो निःसमः।

चारित्रं सदाचारः। प्रमाणं संशयच्छेदकः। पोतं कृत्वा प्लवं तारकं विधाय। पोतानर्भकान् दुर्जातं व्यसनं दुष्टं जन्म च। उदधार्षमुद्धृतवती। अनुक्रोशो दया। उपक्रोशो निन्दा। निर्वक्ष्यति पारयिष्यति। सर्वां धुरं वहतीति सर्वधुरीणः'खः सर्वधुरात्' इति खः। (पृ-१७) अनुशोचनं दुःखम्। यौवनेनेति प्राप्तयौवनोऽयं त्वां प्राप्स्यतीत्यर्थः, न्यास उपनिधिर्निक्षेप इति यावत्। आपृच्छ इति। 'आङि नुप्रच्छयोः' इति तङ्।

इति प्रथम उल्लासः।

---

## द्वितीय उल्लासः।

---

पृ—१७. निरूपयन् पश्यन्। आर्तरूपोऽतीव दीनः। दोदूयमानो भृशमुपतप्यमानः, 'दुदुं उपतापे' इति धातोर्यङ्। एवमुत्तरत्रापि। जोघूर्ण्यमानो भृशं भ्राम्यन् 'घुणघूर्ण भ्रमणे' तातप्यमानो भृशं तपन् 'तप संतापे' मोमुह्यमानो भृशं मुह्यन्। सर्वत्र पूर्ववत् यङ्। समुह्यमानो नीयमानः। निर्वेदो विरतिः। विमर्शः पर्यालोचनम्, (पृ-१८)जघनमिव जघन्यं शाखादित्वाद्यः। परिमाणं प्रमाणम्। कार्पण्यं दैस्त्यम्। उच्चैःपदाद्ब्रह्मलोकात्। अनीशता हा हतोऽस्मि किं करिष्यामीत्यादिबुद्धिः। तथा क्लेशः। पूतिगन्धि दुर्गन्धविशिष्टम्' 'गन्धस्येदुत्पूतिसुसुरभिभ्यः' इदि इत्। भौतिकं भूतविकारम्। अस्वादु स्वादु कृत्वा स्वादुंकारम्। 'स्वादुमि णमुल्' चर्वितमास्वादितं चर्वणं आस्वाद्यांशो यस्मात्तस्मात्। 'पुनः पुनश्चर्वितचर्वणानां' इति भागवते च। न विरज्यते वैराग्यं न प्राप्नोति 'कुषिरजोः प्राचां श्यन् परस्मैपदं च' इति कर्मकर्तरि प्रयोगे परस्मैपदाभावे आत्मनेपदम्। बीभत्सं जुगुप्सावहम्। अरोचकमुद्गमनकारणमित्यर्थः। पिण्डं शरीरम्। हृणीयमानस्य जुगुप्समानस्य 'हृणीङ् जुगुप्सायां' इति कण्ड्वादिरयं धातुः। निम्नं गाधेतरम्। एतन्निग्रहान्तः स्त्रीनिग्रहावसानः। कदम्बं

समूहः । संपिण्डितो निष्कृष्टः । वदन्ते भासमाना वदन्ति जानन्ति वा । भासने, ज्ञाने च यथाक्रमं तङ् **वितपन्त इति** 'उद्विभ्यां तपः' इति तङ् । विजयन्ते वशीकुर्वन्ति 'विपराभ्यां जेः' इति तङ् । **आसनानीति** पद्मासनवीरासनभद्रासनस्वस्तिकदण्डासनादीनि द्रष्टव्यानि । विनयते नियच्छति 'कर्तृस्थे चाशरीरे कर्मणि' इति तङ् । सगेलोपं सृष्टिक्रियाया अपायम् । आवरणेन तिरस्करण्या । अन्वयमास दृष्ट्युपघातं कृतवान् । **द्वित्रानिति** द्वौ वा त्रयो वा द्वित्रास्तान् । 'संख्ययाव्ययासन्न' इत्यादिना बहुव्रीहिः 'बहुव्रीहौ संख्येये डजबहुगणात्' इति डच् । 'संख्याया अल्पीयस्याः' इति द्विशब्दस्य पूर्वनिपातनियमश्च । विभावयामि पश्यामि । पृ—१९. धुरं वहन्ति धौरेयाः श्रेष्ठा इत्यर्थः । तान् । 'धुरो यड्ढकौ' । वागुरा मृगबन्धनार्थो जालविशेषः 'वागुरा मृगबन्धनी' इत्यमरः । येव वागुरेति समासः । विशृङ्खलगतयः स्वच्छन्दगतयः । मृगेक्षणाभ्यां स्त्रीमध्याम् । 'मृगतृष्णा मरीचिका' इत्यमरः । बम्भ्रम्यमाणस्य पौनःपुन्येन अतीव वा भ्रमतः मोहमुपगतस्येति यावत् । मृगस्येव धर्मो यस्य स मृगधर्मा तस्य 'धर्मादनिच् केवलात्' इत्यनिच् । तिरोभावयामास पिहितवान् । प्रतीतिरवभासस्ताम् । प्रतिबद्ध्यते प्रतिहन्यते ज्ञानवैराग्यादि अनेनेति प्रतिबन्धो स्त्रीरूपः पदार्थः । करणे घञ् । अनुबन्धिना अनुवर्तिना । अनुसंधानं ध्यानावर्तनम् । **प्रजाकार्येष्वित्ति** राज्यं शशासेत्यर्थः ।

**परिग्रहेति** ॥ स्त्र्यन्तरस्वीकरणमकृत्वैवेत्यर्थः । हायनेषु संवत्सरेषु । अनुगङ्गातटं गङ्गातटसमीपे 'अनुर्यत्समया' इत्यव्ययीभावः । आखेटाय मृगयार्थम् । ओघः प्रवाहः । अकस्मादित्यव्ययम् । कारणं विना । विष्टभ्यमानं निरुद्धगतिकमिव । पेपीयमानमतिशयेन पीयमानमिव यङन्तात्पिबतेः कर्मणि यकि शानच् । अन्वेषकोऽन्वेष्टुम् 'तुमुण्वुलौ क्रियायां क्रियार्थायाम्' इति ण्वुल् । मध्येसलिलं जलमध्ये 'पारेमध्ये षष्ठ्या वा' इत्यव्ययीभावः । परितः सर्वतः 'पर्यभिभ्यां च' इति तसिल् 'सर्वोभयार्थाभ्यामेव' इति सर्वार्थे वृत्तिः । **उदात्तेति** । 'आशयस्य विभूतेर्वा यन्महत्त्वमनुत्तमम् । उदात्तं नाम तत्प्राहुरनेकगुणसंश्रयम्' इत्युक्तमुदात्तलक्षणम् ।

धन्वानं निर्जलप्रदेशमिव 'समानौ मरुधन्वानौ' इत्यमरः। मरुर्निर्जलप्रदेशः। (पृ-२०) ऐन्द्रजालिक इन्द्रजालविद्यावान्, इन्द्रजालशब्दात् 'चरति' इति ठक्। दर्शनीयरूपोऽतिशयेन सुन्दरः। प्रशंसायां रूपम्। अदर्शनतामन्तर्धानम्। कवचहरे नवयौवनवतीत्यर्थः। 'वयसि च' इति हरतेरच्। चित्रीयमाणा विस्मयं प्राप्नुवन्। धरित्री भूः जाया यस्य स धरित्रीजानिः, राजा 'जायाया निङ्' इति निङि 'लोपो व्योर्वलि' इति यलोपे च रूपम्। हल्लेखस्तर्कैः 'हल्लेखस्तर्कः' इति त्रिकाण्डशेषः। आलिखितं लिखितमिव अन्तरं मनो यस्य येन वा स तथोक्तः। तोकमर्भकम्। चरमोऽष्टमः। आशंसते इच्छति 'आङः शासि इच्छायां' किशोराणां तरुणावस्थां प्राप्तवतां 'किशोरोऽश्वस्य शावके। तैलपर्ण्योषधौ च स्यात्तरुणावस्थसूर्ययोः' इति मेदिनी। सजति सक्तं भवति 'दंशसञ्जस्वञ्जां' इति सञ्जेर्नलोपः। लिङ्गानि चिह्नानि। तान्याह—**अस्येत्यादिना**। संवदततरामतीव समानं भवतीत्यर्थः। राजवर्चसं राजतेजः। 'पल्यराजभ्यां चेति वक्तव्यं' इति समासान्तोऽच्। **अनादेयेनेति**। नद्यां भवो नादेयः, 'नद्यादिभ्यो ढक्' न नादेयोऽनादेयस्तेन। आदातुमर्हमादेयं न आदेयमनादेयम्। अन्तरायोपहतेन विघ्नव्याहतेन। अन्तरायश्चात्र सप्तानां पुत्राणां सपद्येव मारितत्वात्, अष्टमस्य नीतत्वाच्चेति भावः, सुखाकरोमि प्रीणयामीत्यर्थः 'सुखप्रियादानुलोम्ये' इति डाच्। पर्यवसितात्मा निश्चितबुद्धिः। आपगां नदीम्।

(पृ—२१) पञ्चषेषु पञ्चसु षट्सु वा 'द्वित्र' इत्यत्रेव प्रक्रिया। निदाघकरः सूर्यः। सप्रमाणं वयः सदृशाकारविशिष्टं कलेवरं यस्य तम्। **पिप्पलदण्डेति**। पिप्पलदण्डोऽश्वत्थदण्डः, यद्यपि 'क्षत्रियो वाटखादिरौ' इति मनुवचनेन वाटखादिरयोरन्यतर एव दण्डः क्षत्रियब्रह्मचारिणा लभ्यते, तथापि 'बैल्वपालाशौ ब्राह्मणस्य दण्डौ, अश्वत्थपैलवौ शेषयोः' इति गौतमवचनेन तुल्यबलत्वात्पाक्षिकत्वं पिप्पलदण्डस्यापीति ज्ञेयम्। 'दण्डोऽपरः पैप्पलः' इति महाकविभवभूतिप्रयोगाच्च। आदिशब्देन रौरवक्षौमयोर्वसनोत्तरीययोर्ग्रहणम्। समानो ब्रह्मचारी सब्रह्मचारी 'चरणे ब्रह्मचारिणि' इति सः। तुल्य इत्यर्थः। एवमुत्तरत्रापि। हर्यक्षशावकस्य सिंहडि-

म्भस्य। समाने यूथे (कुले) भवः सयूथ्यः 'सगर्भसयूथसनुताद्यत्' महांश्चासौ उक्षा च महोक्षः 'अचतुर' इत्यादिना निपातनात्साधुः । उक्षा वृषभः । समानं गोत्रं यस्य सः सगोत्रः । 'ज्योतिर्जनपदः' इत्यादिना समानस्य सः । गोत्राधिपो हिमवान् । सगर्भ्यमेकोदरजातमिव । प्रक्रिया सयूथ्यवत् । अकूपारः समुद्रः । पीवरं पुष्टिमत् । प्रभिद्यमाना नवोद्यन्मदजला करटस्थली गण्डप्रदेशो यस्य तम् 'नद्यृतश्च' इति समासान्तः कप् । विंशतिवर्षदेशीयं ईषदूनविंशतिवर्षवयस्कमित्यर्थः 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति देशीयर् । परिचितचरी पूर्वं परिचिता 'भूतपूर्वे चरट्' इति चरटि टित्त्वान्ङीप् । प्रस्तुतं प्रकृतम् । अस्फुरितचर्चोऽनुद्घाततर्कः । प्रधर्षितात्मा स्तम्भितबुद्धिः ।

नेदीयस्या संनिहिततरया । वैयाघ्रपद्यो व्याघ्रपद्गोत्रोद्भवः । गर्गादित्वाद्यञ् । **देवव्रतवर्मेति** 'शर्मवद्ब्राह्मणस्योक्तं वर्मेति क्षत्रसंयुतम् । गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः' इति स्मरणाद्वर्मेत्याम । **दक्षिणेनेत्यादि** तथा च मनुः 'व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः । सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन च दक्षिणः ॥' इति । 'उत्तानाभ्यां हस्ताभ्यां' इति स्मृत्यन्तरात् उत्तानितेन दक्षिणेन पाणिना दक्षिणपादः स्प्रष्टव्यः, तथोत्तानितेन सव्येन पाणिना सव्यः पादः स्प्रष्टव्य इत्यर्थः । **अष्टाभिरङ्गैरिति** 'जानुभ्यां च तथा पद्भ्यां पाणिभ्यामुरसा धिया । शिरसा वचसा दृष्ट्या प्रणामोऽष्टाङ्गः ईरितः ॥' स्मरणात् । समाप्यायिते तर्पिते । श्रवसी श्रोत्रे । बहुपादवटवृक्षः । अवरोहवृक्षकेण शाखाया भुवमवतीर्णेन शिफामूलेन । 'वृक्षक' इत्यत्राल्पार्थे कन् । (पृ—२२) **अधीतीति** अधीतमनेनेत्यधीती इष्टादित्वादिनिः **शास्त्रेष्विति** 'क्तस्येन्विषयस्य कर्मण्युपसंख्यानं' इति सप्तमी । शास्त्रेषु धनुर्विद्यायां । विनेतारौ गुरू । परिनिष्ठितबुद्धिर्निष्कृष्टज्ञानवान् । पावकिः स्कन्दः। एकरेखाधिरोहिणाविति तुल्यबलावित्यर्थः खलु वेति । 'अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा' इति प्रतिषेधार्थकत्वात्खलोः क्त्वा । बहु न वक्तव्यमित्यर्थः। उरसा निर्मित औरसः 'उरसोऽण् च' यमुः पितुः शंतनोः 'पिता जनयिता वप्ता' इति त्रिकाण्डशेषः । कृतबुद्धीनां ज्ञानवताम् । कीटाः कृमयः। सरीसृपाः सर्पादयः । देही जीवः।

कामादि स्त्रीविषयेच्छादि । मन्दं तुच्छमसंबद्धमित्यर्थः । अतिरेक आधिक्यम् । द्विपदां मनुष्याणाम् । अतिरिच्यते विशिष्यते । (पृ—२३) तिर्यग्भ्यो मृगादिभ्य.। ईदृशं जन्म मनुष्यजातिः । जलबुद्बुदवत् जलविकारेण तुल्यम् । सर्वार्थान् धर्मार्थकाममोक्षान् दोग्धीति सर्वार्थदोही तेन । 'संपृच' इत्यादिना दुहेर्घिनुण् । विविधं क्षेपो विक्षेपोऽनवस्थानम् । विक्षिप्यमाणमपार्थं नीयमानम् । पुरुषः पशुरिव पुरुषपशुः । प्रतीक्षणस्य प्रत्याशाया द्वारमुपायः । एकतानेनानन्यवृत्तिना । आश्रयाश्रयिभावेनाधाराधेयभावेन । धर्मधर्मिभावेन गुणगुणिभावेन । सुसंश्लिष्टौ संपृक्तौ । तौ सत्यधर्मौ । मा हासीर्मा त्यज । पश्यतोरित्यनादरे षष्ठी । पश्यन्तौ तावनादृत्येत्यर्थः । पिता च पुत्रश्च पितापुत्रौ तयोः । 'आनङृतो द्वन्द्वे' इति सूत्रे 'पुत्रेऽन्यतरस्यां' इत्यतः पुत्र इत्यनुवृत्तेरानङित्युक्तम् । अन्तर्द्धिमन्तर्धानम् । अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वस्योपसङ्ख्यानात् 'उपसर्गे घोः किः' इति धाञः किः। गतेन गमनेन । भावे क्तः। दण्डनीतौ राजनीतौ । द्वैधेषु विवादेषु 'द्वैधं विवादे' इति त्रिकाण्डशेषः। पुरुषकारः पौरुषम् । संगरेषु युद्धेषु । प्रत्ययितः संजातविश्वासः। प्रतिभुवमात्मनः प्रतिनिधिम् । विशश्राम विश्रान्तिमभजत ।

(पृ—२४)-मेलयित्वा समाजीकृत्य। शोभना मेधा येषां ते सुमेधसः 'नित्यमसिच् प्रजामेधयोः' इत्यसिच् । निर्विशयं निःसंदेहम् । आविष्करणपूर्वकं पूर्वं स्वमतं प्रकाश्येत्यर्थः । 'आश्रवो वचने स्थितः' इत्यमरः । न आश्रवोऽनाश्रवः । उत्कटकामेनातीव स्त्रीलम्पटेन। सृज्यत इति सर्गो जीववर्गः । कर्मणि घञ् । तिर्यक्स्रोतोवर्गं मृगपक्ष्यादिजीववर्गम् । विकलकरणेन वागादीन्द्रियरहितेन । इदं करुणार्णवे कारणम् । समाधिरैकाग्र्यम् । तृतीयमेव तार्तीयीकम् । 'तीयादीकक् स्वार्थे वा वाच्यः' इति वार्तिकम् । असाक्षीत्सृष्टवान् सुकल्पेन पुष्कलकरणत्वेन समर्थेन । तेन सर्गेण मनुष्यजात्या। अवन्ध्योऽनिष्फलः परिश्रमः सृष्टिप्रयासो यस्मिंस्तम् । प्रसिता बद्धा मतिर्यस्य सः । स्वभूतं स्वाधीनम् । अपरस्परा अविच्छेदेन क्रियां कुर्वाणाः सन्तः 'अपरस्पराः क्रियासातत्ये' इति निपातनात्साधुः । अपरे च परे च सततमविच्छेदेनाराधयन्तीत्यर्थः । सुकृतिनः

पुण्यवन्तः। कृतिनः कृतज्ञाः कुशला वा। **नास्तीत्यादि** 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इति स्मृतेः। विनिपातपथेनाधोगतिवर्त्मना। प्रच्युतिः स्खलनम्। **मा च प्रसादश्चीदिति** सङ्गं मा करोतु। प्रोपसृष्टात्सजेर्लुङि 'न माङ्योगे' इत्यडभावे च सति रूपम्। अधर्मः स्वधर्मत्यागो निषिद्धाचरणं वा। परधर्मोऽन्यदीयधर्मः। परोक्षं नियामकः (शासिता) परोक्षनियामकः। अनुरोधोऽनुसरणम्। (पृ—२५)उभौ च तावीश्वरौ चोभयेश्वरौ। तयोः प्रसादस्य साधनमुपायभूतम्। अन्विच्छति चिन्तयति मृगयमाणे वा। **व्यसनेति** मृगयाक्षादिष्वप्रसक्त इत्यर्थः। कामवर्षिण्यभीष्टदायिनि। **दण्डोद्यतेति** 'सर्वो दण्डजितो लोकः' स्मृतेः. युवराजस्य धूर्युवराजधुरा ताम् 'ऋक्पूर्' इत्यादिना धूःशब्दात्समासान्तोऽप्रत्ययः। परवाञ्छिता च। तीक्ष्णा च सा सृणिश्च (अङ्कुशः) तीक्ष्णसृणिः, सा पाणौ यस्येति समासः। 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ' इति समासः। सादिना हस्तिपकेन। 'सादी तुरङ्गमातङ्गरथारोहेषु कथ्यते' इति विश्वः। सरणिं वर्त्म स्वधर्मवर्तित्वमित्यर्थः। अपकृष्टो हीनजातिसंभवोऽपि॥

तिग्मतेजस्यतिबलिनि उपतस्थिवान्द्भिः प्रपन्नैः प्रोपसृष्टात्तिष्ठतेः क्वसुः। उपह्रियमाणेन उपदात्वेन दीयमानेन। कलिन्दकन्या यमुनानदी। आपतितमागतम्। घ्राणतर्पणं सुरभिम्। **हृषित इति** 'हृषेर्लोमसु' इति निष्ठाया इड्वा। परीवाहेण प्रवाहेणेव। **कृतसान्निध्य इति** तं गन्धं लक्ष्यीकृत्य प्रस्थित इत्यर्थः। **विवक्षितमिति** 'विवक्षितगुणोपपत्तेश्च' इति सूत्रे 'लोके हि यच्छब्दाभिहितमुपादेयं भवति, तद्विवक्षितमित्युच्यते, यदनुपादेयं तदविवक्षितमिति' इति भगवत्पादैर्भाषितत्वात्तद्वदिह विवक्षितशब्देनोपादेयमुच्यते। उद्दिष्टमित्यर्थः। अभिपेदे प्राप्तवान्। पृ—२६) तरिं नावम्। क्षिप्यतेऽनयेति क्षेपणी। नौकादण्डः 'नौकादण्डःक्षेपणी स्यात्' 'स्त्रियां नौस्तरणिस्तरिः' इति चामरः। आहार्यशोभा कृत्रिमा वस्त्राभरणादिविशेषकृता कान्तिः। आकल्पैर्वस्त्राभरणादिभिः। अनाविष्टमनालीढं अङ्गं यस्यास्ताम्। तरितुमिच्छा तितीर्षा तया। पान्थैः पथिकैः। 'आतरस्तरपण्यं स्यात्' 'कैवर्तो दाशधीवरौ' इति चामरः। प्रभवभुवमुत्पत्तिस्थानभूताम्।

अष्टादशवर्षदेशीयां किंचिदूनाष्टादशवर्षाम् । शरव्यं लक्ष्यम् । निर्हारिणो दूरतोऽपि मनःकर्षकस्य 'समाकर्षी तु निर्हारी' इत्यमरः । योनिः कारणम् । मत्स्यान् हन्तीति मत्स्यघाती तस्य । तस्य सदा दुर्गन्धवत्त्वाद्वैषम्यप्रदर्शनार्थं तथोक्तिः । वाच्यतां निन्द्यत्वम् । महार्घाणि अतिमूल्यानि । प्रथयति प्रख्यापयति । प्रभुः स्वतन्त्रः । अपोद्यते निरस्यते । प्रकृतेः कारणवस्तुनः अपकर्षदोषो निकृष्टत्वम् । जनिकर्त्रा जायमानेन 'जनिकर्तुः प्रकृतिः' इति सूत्रे तथा व्याख्यातत्वात् । 'उपाधिस्तत्रायं जयति जनिकर्तुः प्रकृतिता' इति मुरारिश्च । छाया कान्तिः । चन्द्रशालासु प्रासादशिरोगृहेषु । नित्यं संप्रयोगमर्हति सांप्रयोगिकं तस्मिन् । छेदादित्वादार्हीयष्ठक् । कन्यारत्ने कन्याश्रेष्ठे 'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते' इति रत्नशब्दस्य श्रेष्ठयवाचकत्वम् । **योनीति** हीनजातित्वप्रयुक्तमनादरणं न कर्तव्यमित्यर्थः । **स्मरन्तीति** 'स्त्रीरत्नं दुष्कुलादपि' इति मनुः । **रत्नेति** रत्नहारी तु पार्थिवः । इत्युक्तेः । साधीयसीमतिशयेन साध्वीम् । शीघ्रायस्व शीघ्रमागच्छेत्यर्थः । भृशादित्वात्क्यङ् । **पुरेति** 'यावत्पुरानिपातयोर्लट्' इति भविष्यदर्थे लट् । निम्लोचति निम्लोचिष्यत्यस्तं गमिष्यतीत्यर्थः त्वमतिक्रान्तवया असि । तदविलम्बेन मामुद्वह । ततस्तव संतारकः पुत्रो भविष्यतीति ध्वनिः । (पृ—२७) उल्लिखिताकूता उत्प्रेक्षिततदभिप्राया । पोतवहः कर्णधारो दाशः । समुन्मिषितेन संजातेनेत्यर्थः । निकेतनं गृहम् । मन्दाक्षेण लज्जया मन्दान्यस्फुटान्यक्षराणि यस्मिंस्तथा । मत्स्यवत् मत्स्यस्येव 'तत्र तस्येव' इति वतिः । **आदिष्टेति** । अयं च स गन्धश्च इदंगन्धः आदिष्टः प्रतिनिधीकृतः इदंगन्धो यस्यां सा तथोक्ता । विपरिणमत इति कर्मकर्तरिप्रयोगः। 'न दुहस्नुनमां यक्चिणौ' इति यङ्निषेधः । रूपमेव रूपधेयम् । नामैव नामधेयम् । 'भागरूपनामभ्यो धेयः' इति स्वार्थिको धेयः। 'पक्कणः शबरालयः' इत्यमरः। आवसथे गृहे। विस्रम्भालापो विश्वासकारि संभाषणम् । शालीनतां कातरत्वम् । शालाप्रवेशमर्हतीत्यर्थे 'शालीनकौपीने अधृष्टाकार्ययोः' इत्यधृष्टे निपातः। अवस्रंसयत् शिथिलीकुर्वत् । अनवज्ञेयः

परिभवितुं अनर्हः प्रणयः प्रार्थना (अनुरागश्च) यस्य तम् । मिश्रः पूज्यः। सप्तभिः पदैरवाप्यत इति साप्तपदीनं ' साप्तपदीनं सख्य ' इति सूत्रम् । 'सख्यं साप्तपदीनं स्यात् ' इत्यमरः । व्यपोहयतु निवर्तयतु । उत्कण्ठामौत्सुक्यम् । जनपदस्य देशस्य । विदांकुरु जानीहि 'विदाकुर्वन्त्वित्यन्यतरस्यां ' इति निपातनादामादिकम् । शरीरजेन मन्मथेन । गन्धिता लिप्ताः । दर्पयति दर्पवन्तं गर्वितं करोति (पृ—२८)गान्धर्वेण विधिना गान्धर्वविवाहेन । शुद्धान्तेश्वरीमन्तःपुरनायिकाम् । इयमवस्था यस्य तेन । स एव दाश एव । लोकतन्त्रे लोकव्यवहारे निष्णातस्य कुशलस्य । किमन्यादिति । यदि ते मयीच्छा मत्पितृद्वारा गृहाणेत्यर्थः । उपरुध्यते विघ्निता भवति ।

महाकुले भवा महाकुलीना । न्यवेदि निवेदितः । **देवपादेति** पादशब्दः पूजावचनः। अल्पा कुटी कुटीरम् । कामं यद्यपि। नियोज्यपरमाणोरत्यन्तं निकृष्टस्य भृत्यस्य। साध्यं कार्यम् । **सामान्योऽपीति** 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति न्यायात् । उद्देशेनाभिप्रायेण। अपदेशो व्याजः । अभिजनतामुत्तमजातित्वम् । अनुयुक्तवन्तं पृष्टवन्तम् । विशां मनुष्याणां 'द्वौ विशौ वैश्यमनुजौ ' इत्यमरः । पिशुनेन सूचकेन ' पिशुनौ खलसूचकौ' इत्यमरः । **पृ—२९अनामयमिति** यद्यपि ' क्षत्त्रबन्धुमनामयं ' इत्युक्तेः क्षत्त्रियस्यैव तथा प्रश्नो न्याय्यस्तथापि दाशेनानेन संबन्धकाङ्क्षित्वेन स्वसमानत्वमारोपयितुमयं प्रश्न इत्यभिप्रायः । अनन्तराया निर्विघ्नाः । अपकृष्टं निकृष्टमिव । उपक्रोष्टुं निन्दितुम् । रत्नानां संभूत्या उद्भवेन संभाविताः पूजिताः **अध्यास्तामिति** 'अधिशीङ्स्थासां कर्म' इत्यासनमित्यस्य कर्मत्वम् । वर्या वरणार्हा कन्या । 'अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु' इत्यनिरोधे वर्येति निपातः । 'अथ स्वयंवरा । पतिंवरा च वर्या च' इत्यमरः। बहिरङ्गभूतो बाह्योपाधिप्रयुक्तः । अन्तरङ्गे मुख्यतमे । उपचारनिमित्तः क्लेश उपचारक्लेशस्तेन । क्लेश आयासः । वरस्य जामातुः ये गुणास्तैः संपन्नं युक्तम् ।

उच्छ्राय औन्नत्यम् । वीर्यं रेतः । वरिवस्या शुश्रूषा । (पृ—३०) वोढुं परिणेतुम् । प्रतिपादनीया देया । परामर्शो विचारः । समयेन संविदा । अभ्युपैत्यङ्गीकरोति । पाणिग्रहो विवाहः । निर्णेतास्महे निश्चयं करिष्यामः । मर्षयतु क्षमताम् । दुर्ग्रहं दुराग्रहम् । शुष्केण निष्फलेन ।

प्रत्याख्यातो निराकृतोऽस्मि । उपालम्भो निन्दा । लाघवस्य लघुत्वस्य आस्पदं कारणम् । अर्थिता याच्ञा । निष्किञ्चना दरिद्राः । देहीति पदं देहिपदं । देहिपदप्रयोगार्हाः देही देहवानिति पदप्रयोगस्य अर्हा योग्याः । नेतरे याचका इति ध्वनिः । सिद्धः प्राप्तः अर्थो याचितं वस्तु येन स तथाभूतोऽपि । सिद्धार्थः सर्षप एव । तद्वद्गणनार्ह इत्यर्थः । **मृतजीवितामिति** 'मृतं तु याचितं भैक्षं' इति याचितस्य मृतजीवनत्वेन स्मरणात् । अजगर्हन्निन्दितवन्तः । अर्हत्तमाः पूज्यतमा मन्वादयः । 'अर्हः प्रशंसायां' इति शतृप्रत्ययः । अर्हन् पूज्यः। अतिशयेनार्हन्नर्हत्तमः । अहो अत्यद्भुतम् (पृ—३१) ललनासर्गस्य स्त्रीसृष्टेः ललामभूतामलंकारभूताम् । क्षणदा रात्रयः । क्षणमुत्सवं ददतीति क्षणदाः । गुणैरुत्कृष्टः श्रेष्ठो गुणोत्कृष्टस्तम् । **अराजानमिति** 'नञस्तत्पुरुषात्' इति समासान्तनिषेधात् 'राजाहःसखिभ्यष्टच्' इति टज् न । गर्ते श्वभ्रे । कौलीनं लोकापवादः । क्षीयतां नश्यतु । मनसिजो मन्मथ आमय इव मनसिजामयः । आमयो व्याधिः । समिद्धेन ज्वलितेन कुकूलाग्निना तुषाग्निनेव 'तुषानलः कुकूलः स्यात्' इति त्रिकाण्डशेषः । दंदह्यमानो भृशं दह्यमानः । यङन्ताद्दहेः कर्मणि यक् । **प्रजागरतया** रात्रिषु निद्राऽभावेन । 'अभियुक्तं बलवता दुर्बलं हीनसाधनम् । आतुरं कामिनं चोरमाविशन्ति प्रजागराः' इति प्रजागरावस्थानिमित्तान्युक्तानि विदुरप्रजागरे । अत्र कामित्वं निमित्तम् । संवेशसुखं सुप्तिसुखम् । **अरतिरिति** 'स्वाभीष्टवस्त्वलाभेन चेतसो यानवस्थितिः । अरतिः सा' इत्यरतिलक्षणमुक्तं साहित्यदर्पणे । संदानितं बद्धम् 'बद्धे संदानितं मूतमुद्दितं संदितं सितं' इत्यमरः।

निदाघपल्वलेन ग्रीष्मकालस्थेनाल्पेन सरसेव 'वेशन्तः पल्वलं चाल्पसरः' इत्यमरः। कृशिमानं कार्श्यं । दृढादित्वादिमनिच् । 'र ऋतो हलादेर्लघोः' इति रः । हेमन्ते भवो हैमनः 'सर्वत्राण् च तलोपश्च' इत्यण् तलोपश्च ।

सा अवस्था यस्य स तदवस्थस्तम् । प्रणतं प्रह्वीभूतं सामन्तानां अन्येषां राज्ञां चक्रं समूहो यस्मिंस्तस्य । वशंवदाः स्वाधीनाः प्रकृतयः प्रजा यस्य तस्य **निरीतिकेति** निर्गता ईतयो यस्मात्तस्य "अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः। अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः।" इतीतय उक्ताः । (पृ—३२) विस्रम्भभङ्गो विश्वासापगमः । विश्वासपदस्य विश्वासशब्दस्य आश्वासपदं विश्रान्तिस्थानम् । दौर्भाग्यं दुष्कृतम् । व्याजृम्भोद्गिरतवानुक्तवानित्यर्थः । उन्नीय ऊहित्वा, तन्नियोगेन गुर्वाज्ञया । इतरे तु पित्रा नियुक्ता अपि ये नाचरन्ति ते तु, उच्चारप्राया विष्ठातुल्याः। चिकीर्षति कर्तुमिच्छति । प्रज्ञोन्मेष ऊहः । आदर्शे दर्पण इव । प्रतिफलति प्रतिबिम्बीभवति । सर्वस्वं हृद्गतं सर्वं नियतमस्मिन् प्रकाशयतीत्यर्थः । वैमनस्यं दुःखम् । अन्वयुङ्क्त पृष्टवान् । मतमभिप्रायं पुत्राय न निवेद्यमित्येवंरूपम्। बार्धकं वृद्धत्वम् । प्रलपितमनर्थकं वचः । तिरस्कुर्वन्निरस्यन् । स्फुरितार्थः प्रतिभाततद्वाक्यतात्पर्यः । (पृ—३३) गोप्तव्यतायाः अकथनीयत्वेन रक्षणीयत्वस्य । **प्रहेलिकयेति** 'व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनम् । यत्र बाह्यार्थसंबद्धं कथ्यते सा प्रहेलिका' इत्युक्तलक्षणया भङ्ग्या । तपस्वी शोच्यः । अन्तर्वेशिकोऽस्य परिचारकः 'अन्तः पुरे त्वधिकृतः स्यादन्तर्वेशिको जनः' इत्यमरः। चष्टे पश्यत्यनेनेति चक्षुस्तद्धृदयं मे तत्त्वदर्शनकरणं भविष्यतीत्यर्थः। आह्निकादिषु भोजनादिषु । 'आह्निकं दिननिर्वर्त्ये भोजने नित्यकर्मणि' इति विश्वः। विशेषोऽपूर्वः कोऽपि भेदः । गन्धवच्च तत् द्रव्यं च गन्धवद्द्रव्यं तस्मिन् । उन्मनायते उत्सुको भवति । विमनायते दुःखितो भवति । मनीषी सूक्ष्मबुद्धिः । मनस ईषी मनीषीति मनीषिशब्दो व्याख्यातो भाष्ये । पृषोदरादित्वात्साधुरित्युक्तं च कैयटेन । अवगतं ज्ञातम् । अपर्याप्तं न पुष्कलम् । अर्थोपादानाय कार्यं साधयितुम् । साधीयान् साधुतरः ।

वैवर्ण्यं विरुद्धवर्णवत्त्वं मालिन्यमिति यावत्। **मानुषानन्देति** 'युवा स्यात्साधुयुवाध्यायकः' इत्यादिश्रुतिसिद्धः। **अथेति** पक्षान्तरार्थः। प्रत्यवस्थानेन शत्रुभावेन। (पृ—३४) प्रसत्तुं प्रसादं कर्तुम्। 'हतको दग्धबन्धुवत्' इति त्रिकाण्डशेषः। धूर्तेन अमार्गे प्रवर्तकेन। धूर्ताः स्त्रीकामुकाः। उन्नतमतेरुदात्तबुद्धेः। अनिवेदनमभिप्रायस्याकथनम्। अन्यथानिवेदनं तत्त्वस्य वैपरीत्येन कथनम्। प्लवं नावं कृत्वा नैपुणेन सौक्ष्म्येण। अनुप्लवतेऽनुधावति। मनसिकृत्य निश्चित्य 'अनत्याधान उरसिमनसी' इति गतिसंज्ञा। **एकपुत्रं चेति**। 'अनपत्यं चैकपुत्रमित्याहुर्धर्मवेदिनः।' इति भारते। प्रष्ठोऽग्रगामी 'प्रष्ठोऽग्रगामिनि' इति निपातनात्साधुः। क्षिपसि निन्दसि। **अजाविकेति** अजश्च आविश्च अजाविकम्। 'गवाश्वप्रभृतिगणे तथा निपातनात्समाहारः। अनुपात्तस्योपादानं योगः, उपात्तस्य रक्षणं क्षेमः। योगविशिष्टः क्षेमो योगक्षेमः। अजाविकतुल्यतयेति तात्पर्यम्। वैरायान्ते वैरं कुर्वन्ति 'शब्दवैर' इत्यादिना क्यङ्। वीरमात्मानं मन्यन्त इति वीरमानिनस्तेषाम्। **वीरशय्येति** ते युद्धभूमावेव हता म्रियन्त इत्यर्थः। दुर्विधेन दुष्टप्रकारेण। अभद्रममङ्गलम्। म्रियेथा इत्यर्थः। उपरोधेन पीडया। आग्रह इच्छा।

**गालोडयमान इति** गालोडितं वाचा विमर्शस्तं करोति गालोडयते 'श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्च' इति इतलोपः। ततः शानचि गालोडयमान इति रूपम्। **कुशाग्रीयेति** कुशाग्रमिव कुशाग्रीया 'कुशाग्राच्छः' मतिर्यस्य स तथोक्तः। (पृ—३५) व्यज्यते प्रकाश्यते। प्रसङ्गं प्रस्तावम्। पर्युदासेन निराकरणेन। अनुतापो दुःखम्। अग्राम्यं चतुरम्। उपरिभवमुपरितनमूर्ध्वं कर्तव्यमित्यर्थः। संवेशनिवेशने शय्यागृहे। उपशायाध्यक्षं पर्यायशयनेऽधिकृतं रात्रौ राज्ञोऽन्तःपुररक्षकमित्यर्थः। 'व्युपयोः शेतेः पर्याये' इति घञ्। 'उपशायो विशायश्च पर्यायशयनार्थकौ' इत्यमरः। सुखायते सुखं वेदयते सुखितो भवतीत्यर्थः। कृच्छ्रायते कृच्छ्रं वेदयते दुःखितो भवतीत्यर्थः। 'सुखादिभ्यः

कर्तृवेदनायम्' इत्युभयत्र क्यङ् । यामं रक्षति यामिकः । कामयमानानां स्त्रीकामाविष्टानाम् । प्रायेण बाहुल्येन । कुतो भवं कुतस्त्यं । 'अव्ययात्त्यप्' इति त्यप् । 'अमेहक्वतसित्रेभ्य एव' इति तसावत्र वृत्तिः । **उत्स्वप्नायमान इति** स्वप्नवृत्तस्य जाग्रतीव स्फुटमुदीरणमुत्स्वप्नस्तं कुर्वन् । अर्शआद्यजन्तादुत्स्वप्नशब्दात् 'उपमानादाचारे' इति क्यङ् ।

तदुपादाने तस्या ग्रहणे । उपहरामि आनीय ददामि । वार्धकं वृद्धत्वम् ॥ विनिमयः परिवर्तनम् । अभिजनः कुलं जन्मभूमिर्वा 'अभिजनः कुले ख्यातौ जन्मभूम्यां कुलध्वजे' इति विश्वः । **एतदिति** एषा च सा समस्या च एतत्समस्या तस्याः कविः कवयिता विवक्षितांशपूरणचतुर इत्यर्थः । 'समस्या तु समासार्था' इत्यमरः । आकार्य आहूय ।(पृ—३६) 'आयुष्मन्निति सारथिः' इति सूतेन स्वामिनः संबोध्यत्वस्योक्तत्वात्तथा संबोधनम् । उपयमुनातटं यमुनातटसमीपे 'अव्ययं विभक्तिसमीप' । इत्यादिना समीपेऽव्ययीभावः । पक्कणावासः शबरावासभूमिः । योजनामभिव्याप्य आयोजनम् 'आङ्मर्यादाभिविध्योः' इत्यभिविधावव्ययीभावः । आयाति आगच्छति । शुल्कं कन्यापणम् ।

मण्डलेश्वरा राजानः । अर्हयन् पूजयन् । **हर्षेति** महानुभावानां तेषां स्वयमागमेन हर्षः । यदि विनिवेदितशुल्कप्रदानेन सत्यवतीप्रदानायामी निर्बध्नीयुस्तदा किमहं कुर्यामिति शोकः, किमु हठादेव बलाद्वालसौ देवव्रतः कन्यां हरेदिति भयं, एवमधीश्वरसमाजाकर्षकं स्वकन्याया रूपोदयं संस्मृत्य विस्मयस्तैः किलिकिञ्चितात्मा मिश्रीकृतबुद्धिः 'रोषाश्रुहर्षभीत्यादेः संकरः किलिकिञ्चितं' इति तल्लक्षणम् । वाग्गुम्भा उपन्यासाः । गुण एव भूषणं येषां तेषाम् । भूषायन्ते भूषावदाचरन्ति अलंकारा भवन्तीत्यर्थः । अभूष्यं भूषयितुमनर्हम् । वभूषयिषन्ति भूषयितुमिच्छन्ति । **अतः खल्विति** भूष्याभूष्यानियमं विना सर्वत्र विनियोगात्स्तुतीनामित्यर्थः । **श्रवणमात्रेति** यत्किंचित्तत्त्वमवलम्ब्य,तद्ग्राह्यगुणबाहुल्यवर्णनं ह्यतिशयोक्तिः तथा अभूतार्थवादे वयमकुशलाः । अतो यन्मयोच्यते तदखिलं पारमार्थिकमेवेत्यर्थः ।

भूतार्थवादे वास्तवार्थकथने पराणां तात्पर्यवताम्। यदर्थमिति यच्छब्दस्तदिदानीमिति तच्छब्देन संबध्यते। नेतारं नायकम्। अचकमन्त कामितवत्यः। कमेः स्वार्थे णिङि लुङि चङि सति सन्वद्भावादौ न सति रूपमचकमन्तेति। अचकलन्त कलितवत्यः कलयतेर्लुङ्। षष्ठांशभागिनमिति स्वलाभेषु षष्ठभागहरं राजानं कल्पितवत्य इत्यर्थः। अजगणन्त गणितवत्यः। संभावयामासुरित्यर्थः। निरपादि निष्पन्नम् संपूर्णमासीदित्यर्थः। कर्तरि प्रयोगोऽयम् 'चिण् ते पदः' इति चिणि तलोपः। एका मतिर्येषां ते एकमतयः, तद्भाव ऐकमत्यम्। विरुद्धा मतिर्येषां ते विमतयः तद्भावो वैमत्यं तेन। संपादयितुमिच्छा संपिपादयिषा, अवतारयितुमिच्छा अवतितारयिषा, । अधिक्रियते अधिकृतो भवति (पृ—३७) उत्तमर्ण ऋणस्य दाता। अधमर्ण ऋणस्य ग्रहीता 'उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात्' इत्यमरः। उपरुध्य निर्बध्य। बलिं राजग्राह्यं करं। भुञ्जानोऽश्नन्। न भुनक्ति न पालयति 'भुज पालनाभ्यवहारयोः' इति धातोः 'भुजोऽनवने' इति अनवने आत्मनेपदविधानात् अवने परस्मैपदम्। विषयवासिनां देशवासिनाम्। शोभनो राजा सुराजा तस्य भावः कर्म वा सौराज्यम्। उपसर्गः पीडा। वागुन्मेषो वाग्विलासः। असांप्रतमयुक्तं। कामं यद्यपि। गौरवं बहुमानम्। **लाघवं गमिता इति**। त्वद्गुणविशेषेण तद्गुणः सामान्य इव भातीत्यर्थः। अशिष्टाः शिष्टाः कृता इति ये असाधवस्ते स्वनीत्या सन्मार्गेऽवतारिता इति वास्तवार्थः। अशिष्टा एव शिष्टाः शेषतया कृता इति, असाधव एव साधुत्वेन निर्णीता इति च विरोधः शिष्टा एव शिष्टा इति असाधूनामेवाभावात् साधूनेव पर्यशेषय इत्यर्थः। किंच ये खलु साधवस्त एव साधुत्वेन निर्णीय मानिता इति चार्थः। अर्थिनां याचकानाम् दौर्गत्यदुःखं दारिद्र्यदुःखम्। **अर्थयितुरिति** तैर्दानेनार्थिनां दुःखमपाकृतं, त्वया तु दारिद्र्यदुःखमेव परिहृतमिति तेभ्यस्ते विशेष इति भावः। धन्या भाग्यवन्तः। वचनमिति ममेति शेषः। लघूकरणमिति युष्माकमिति शेषः। प्रशंसा

स्तुतिः । पिशुनं सूचकम् । औदासीन्यं तूष्णीमवस्थानं । औद्धत्यं गर्वः । संदेशवचनमाज्ञोक्तिः। धोरणी धाटी गाम्भीर्यमिति यावत् । ग्राम्योक्तिरगभीरं वचनम् । **प्राभवेति** आत्मनः प्रभुत्वप्रकाशकमित्यर्थः। नातिकोविदा अतीव निपुणा न भवाम इत्यर्थः । नगरसंबन्धिनो व्यवहाराः नागरव्यवहारास्तेषु । उपरराम तूष्णींबभूव 'विभाषाकर्मकात्' इति परस्मैपदम् ।

(पृ—१८) वाचोयुक्तिः वाग्मित्वं 'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु' इत्यलुक् । लक्ष्मीपतिभिः श्रीमद्भिः राजभिरित्यर्थः । खेलति क्रीडति । स्पर्शं दातुं 'स्पर्शनं प्रतिपादनं' । इत्यमरः । उपक्षिप्तं कृतावापम् । वरो जामाता । सानुबन्धस्य सवर्गस्य ।

कूटस्थः कुलस्यादिपुरुषः । राजा चन्द्रः । स्वयमुपतस्थुषी स्वयमेवागता । असति रूपविशेषे स्वयं नागच्छेदित्यर्थः । दिवि भवा दिव्या 'द्युप्राक्' इत्यादिना यत् । धुनी नदी गङ्गेति यावत् । प्रवचनीयाः प्रवचनकर्त्र्यः 'भव्यगेय' इत्यनेन कर्तर्यपि निपातनात् । बन्दिनः स्तुतिपाठकाः । स्थेया निश्चायकाः । सागरमेखला मही । गेया गानकर्त्री प्रवचनीयवत्प्रक्रिया । सपिण्डस्तुल्य इत्यर्थः । समानः पिण्डो यस्येति विग्रहे 'समानस्य च्छन्दस्यमूर्ध' इति सूत्रे समानस्येति योगविभागात्समानस्य सः 'सपिण्डास्तु सनाभयः' इत्यमरः कदर्यः कृपणः । तथा विधा प्रकारो येषां तेषु तथाविधेषु । (पृ—१९) **तादृशेत्यादि** ध्वनिना अस्त्यन्या शङ्केति भावः । सावशेषमसंपूर्णं वचनं यस्य तस्मिन् सावशेषवचने । शुल्केन कन्यापणेन । वेपथुः कम्पः । नाथमानं याचमानम्। विस्रम्भो विश्वासः।उद्वेगो भयम् । उपहृत्य प्रदाय । आप्रदानं प्रदानपर्यन्तं मर्यादायामव्ययीभावः । नियन्तुं निवारयितुम् । ईष्टे शक्नोति । पूर्णपात्रेणाभ्युदयार्थमुपप्राप्यवस्तुविशेषेण 'हर्षादुत्सवकाले यदलंकाराम्बरादिकम । आकृष्य गृह्यते पूर्णपात्रं पूर्णानकं च तत् ।' इति हारावली ।

एवमपराध्यति वक्ष्यमाणप्रकारेण मां व्यवहर्तुं प्रवर्तयतीत्यर्थः । क्रोद्धुं कोपं कर्तुम् । वैमात्रेयो विमातुः सपत्नीमातुरपत्यम् । शुभ्रादित्वाड्ढक् । 'वैमात्रेयो विमातृजः' इत्यमरः । सत्यवत्या अपत्यं पुमान् सात्यवतेयः 'स्त्रीभ्यो ढक्' अशक्यं प्रदानं यस्य सोऽशक्यप्रदानः । (पृ—४०) प्रतिशुश्राव प्रतिज्ञातवान् । पित्र्यं पितुरागतं पितृसंबन्धि वा । तत्र राज्ये । सदसि साधवः सदस्याः। विमृशसि चिन्तयसि । कन्यापिता दाशः । सांप्रतं समीचीनम् । रोहणगिरिर्मणीनामाकरभूतो रोहणाह्वयः पर्वतः । काचमणिर्मणिवद्भासमानो मृद्विकारः । अग्रतःसरस्येति 'पुरोऽग्रतोऽग्रेषु सर्तेः' इति सर्तेष्टः । अन्यथाग्रहो वैतथ्यशङ्का । दुहितुरपत्यं दौहित्रस्तस्य । विदादित्वादञ् । तरलीभवति चाञ्चल्यं भजति ।

निर्णीतं निश्चितम् । उपलालनमुपच्छन्दनमुपसान्त्वनमित्येकार्थानि पदानि । विपर्यासो वैपरीत्यम् । उपरुणद्धि नियमयति । (पृ—४१) एतेभ्यस्तव पुत्रेभ्यः । मनोजवसाः पितृतुल्याः 'मनोजवसः पितृसंनिभः' इत्यमरः । प्रथमे मुख्याः प्रथमं परिगणनीया वा 'प्रथमचरम' इत्यादिना जसः कार्यं प्रति पाक्षिकं सर्वनामत्वम् । नखरायुधात्सिंहात् । तैस्तव पुत्रैः । तपस्वी स्वयमशक्ततया शोचनीयः। **वरं चेति** । प्रथमं राजा भविष्यामीति मनोराज्यं कृत्वा, फलकाले ततो भ्रंशतस्तत्र प्रागेव नैराश्यं श्लाघ्यमिति भावः । प्रिप्रीणयिषेत् प्रीणयितुमिच्छेत् उपनतां प्राप्ताम् । अक्षतां परैरभुक्ताम् । प्रत्याचक्षीत निराकुर्यात् । अर्थतृष्णया धनाशया । समुह्यमानान् कृष्यमाणान् ।**जरद्रिति** जीर्णं तृणं यथा प्रवाहं निरोद्धुं न शक्नोति, तद्वदित्यर्थः ।

अन्यथा आत्मनो नैष्ठिकत्वग्रहणेन विना । अघटमानं निर्वर्तयितुमशक्यम् । संगिरते स्म प्रतिज्ञातवान् 'समः प्रतिज्ञाने' इति तङ् । स्थाने युक्तम् 'युक्ते द्वे सांप्रतं स्थाने' इत्यमरः स्थाने इत्यव्ययमेतत् स्वरादिषु पाठात् । संस्तवः प्रतिज्ञा

**वृत्तेति** 'द्यौर्भूमिरापो हृदयं चन्द्रार्काग्नियमानिलाः। रात्रिः संध्ये च धर्मश्च वृत्तज्ञाः सर्वदेहिनाम्' इति मनुः। परिणयनकृते विवाहार्थम्। यावज्जीवं यावत्कालमहं जीवामि तावत्कालम्। 'यावति विन्दजीवोः' इति णमुल्। **त्रिरिति** 'द्वित्रिचतुर्भ्यः सुच्' इति संख्याया क्रियाभ्यावृत्तिगणने सुच्। **अन्यथेति** भवतीति शेषः। दारसंग्रहे स्त्रीपरिग्रहम्। दारसंग्रहाभावेऽपि कदाचिदन्यक्षेत्रे प्रजोत्पत्तिः प्रसज्येत, ततश्च भेतव्यं स्यादित्याशङ्क्याह **प्रजोत्पादनं चेति** अन्यक्षेत्रेऽपीति शेषः। चेतिशब्दे निर्भयम् (पृ—४२) प्रयच्छतु ददातु 'दाण् दाने' इति भ्वादिकस्मात् 'पाघ्रा' इत्यादिना यच्छादेशः। संतत्यभावे कोऽभ्युपायस्ते परलोकायेत्याशङ्क्याह **ये खल्विति**। 'आ समाप्तेः शरीरस्य यस्तु शुश्रूषते गुरुम्। स गच्छत्यञ्जसा विप्रो ब्रह्मणः सद्म शाश्वतम्' इति नैष्ठिकब्रह्मचारिणो ब्रह्मलोकप्राप्तिः स्मर्यते। तत्र च संतत्यभावेऽपि न कापि मे श्रेयोहानिरित्यर्थः। आश्रुतवतः प्रतिज्ञातवतः [illegible] शब्दायमानेषु। अनुवदत्सु प्रतिध्वनिना पुनरुच्चारयत्सु। **दिशेति** दिक्शब्दवत् दिशाशब्दोऽप्यस्ति 'आपं चैव हलन्तानां यथा वाचा निशा दिशा' इत्युक्तेः। विस्मयेनाश्चर्येण स्तिमितेषु निर्व्यापारीभूतेषु। आघोषयन्तो मुखरयन्तः। निलिम्पा देवाः 'अनुपसर्गाल्लिम्पविन्द' इत्यादिसूत्रे 'गवि लिम्पेर्वाच्यः' इति शः। 'शोभा निलिम्पा द्युसदः स्वर्गिणश्च नभःसदः' इति त्रिकाण्डशेषः। अम्बरतलादाकाशप्रदेशात्। व्रतिनं नित्यव्रतं प्रशस्तव्रतं वा व्रतशब्दात् प्रशंसायां नित्ययोगे वा मत्वर्थीयः 'अत इनिठनौ' इति इनिः। बिभेत्यस्मादिति भीष्मं भयानकं 'भीमादयोऽपादाने' इति निपातनात्साधुः। भीमादिगणे पठितोऽयं भीष्मशब्दः। 'भियो हेतुभये षुक्' इति भियो मप्रत्ययसंनियोगेन षुगपि निपात्यते। 'दारुणं भीषणं भीष्मं' इत्यादि अमरः। व्रतस्य भीष्मत्वं च दुष्करत्वाद[illegible]। **भीष्मोऽसीति** 'ततोऽन्तरिक्षेऽप्सरसो देवाः सर्षिगणास्तदा। अभ्यवर्षन्त कुसुमैर्भीष्मोऽयमिति चाब्रुवन्' इत्यादिपर्वणि। प्रशंसन्ति स्म तुष्टुवुः।

ह्रिया लज्जया । कलिला कलुषा मिश्रा वा मतिर्यस्य स तथोक्तः । सगद्गदमस्पष्टाक्षरम् । उपस्थिता प्राप्ता । योषित्पिण्डेषु स्त्रीशरीरेषु । पारिप्लवं पुनः पुनश्चित्ताकर्षकम् । वयो यौवनम् । 'तरुणस्तरुणीरक्तः' इति यौवनस्य चित्तक्षोभकत्वात् । संधा प्रतिज्ञा । अखण्डितमनाहतम् । क्रीडार्थो मृगः क्रीडामृगो मर्कटादिः । स यथा यत्किंचित्तद्दत्तमश्नन्, तद्विनोदनैकजीवितो भवति, एवमयं लोकस्तुच्छस्य स्त्रीसुखस्य कृते तद्विनोदनैकफलकस्वायुष्कालो भवतीत्यर्थः । (पृ—४३) साधारणः सामान्यः । पिपीलिका हीराख्यकीटविशेषः 'पिपीलिका तु हीरा स्यात्' इति त्रिकाण्डशेषः । **आब्रह्मेति** ब्रह्मण आरभ्य पिपीलिकामवधीकृत्येत्यर्थः । अयं दोषः स्त्रीषु पारतन्त्र्यरूपो दोषः । ग्राम्यधर्मकथा स्त्रीपुंसयोर्नवसंगमव्यवहारः । मोह एवान्धकार इति रूपकम् । एवमुत्तरत्रापि । मोहो नाम वस्तुतत्त्वमविविच्य चारुत्वकल्पनम् । निरस्त आच्छादितः प्रज्ञा विवेक एव आलोकः प्रकाशो यस्य यस्मिन्वा, तस्मिंस्तथाभूते । पेचको दिवान्धः । 'उलूकस्तु वायसारातिपेचकौ । दिवान्धः कौशिको घूकः' इत्याद्यमरः । अरुंतुदो मर्मस्पृक् 'अरुंतुदस्तु मर्मस्पृक्' इत्यमरः । अरुन्तुदतीति विग्रहे 'विध्वरुषोस्तुदः' इति खश् 'अरुर्द्विषदजन्तस्य मुम्' इति मुम् । ततः संयोगान्तलोपे अरुंतुद इति रूपम् । अरुर्व्रणः' व्रणोऽस्त्रियामीर्ममरुः' इत्यमरः । धूर्ताः कामुकाः । क्रोष्टुवाशितं जम्बुकारवः । उल्कामुखो पिशाचिकाविशेषः । मनुस्तु प्रेताख्यभूतविशेषमाह' 'वान्ताश्युल्कामुखः प्रेतो विप्रो धर्मात्स्वकाच्च्युतः' इति । स्वधर्मच्युतो वान्ताशी च विप्र उल्कामुखाख्यप्रेतविशेषो भवतीत्यर्थः । अन्धं च तत्तमश्चान्धतमसम् । 'अवसमन्धेभ्यस्तमसः' इति समासान्तोऽच् । 'गाढेऽन्धतमसं तमः' इत्यमरः । पाटन ध्वंसने पटीयसा पटुतरेण 'पुरुषो मार्ताण्ड इव पुरुषमार्ताण्डः । पुरुष एव मार्ताण्ड इति रूपकं च । मार्ताण्डः सूर्यः । शश्याति समर्थो भविष्यति । दौर्जन्यं दुर्जनत्वं दुराग्रह इति यावत् ।

आचारोऽनुष्ठानम् । व्यवस्थां समयम् । आपातसुखलोभेन तात्कालिकसुखासक्त्या । सहसा विनैव परामर्शम् । विपरिवृत्तार्थः प्राप्तफलव्यत्यासः । सीदेत् विषीदेत् । प्रियाकरोति प्रीणयाति 'सुखप्रियादानुलोम्ये' इति डाच् । अनाकुलता अक्षुभितचित्तता । राज्ञः संबन्धीनि राजकार्याणि तैः 'राज्ञः क च' चाद्वृद्धाच्छः । इङ्गितज्ञैर्भावमस्य भावज्ञैः। वराङ्गीं वरवर्णिनीं सत्यवतीम् । (पृ—४४) 'विधिमर्हति विधिवत् 'तदर्हम् इति वतिः।अनाश्रमीत्येतत्स्मृतिवचनम् । अनाश्रमी यं केचिदप्याश्रममनवलम्ब्य तिष्ठेतेत्यार्षमात्मनेपदम् । प्रकाशनार्थं वा स्वात्मानं न प्रकाशयेदिति । प्रमाणपुरुषैर्लोकस्य प्रमाणस्थाने स्थितैः । अनुसंश्रत्तां अनुतिष्ठतु । गृहमेधीयान् गृहमेधिने हितान् । पादशब्दः पूजावचनः । कृताश्रवः कृतप्रतिज्ञः । समृद्धतरमतीव संपूर्णम् । विशिष्यते श्रेष्ठं भवति । महत्त्वं श्रेष्ठ्यम् ।

गाढं दृढं उपगूढवान् कृताश्लेषः सन् । साहसं सहसा मनोधैर्येण अनालोच्य वा कृतम् ।अखण्डितं यावज्जीवमविच्छिन्नम् । कामचर्यया स्त्रीप्रसङ्गेनैव विपरिवृत्तो विपरीततां गतः । परिणतो वृद्धः । तपस्वी नैष्ठिकब्रह्मचर्यव्रतधरः । कामकरण्डात्कामनिधानपात्रात् । अस्मात्पिण्डान्मच्छरीरात् । श्रूयत इति तत्रैव कहोलेनोक्तम्— 'यदहं नाशकं कर्तुं तत्सुतः कृतवान्मम । उताबलस्य बलवानुत बालस्य पण्डितः। उत चाविदुषो विद्वान् पुत्रो जनक जायते' इति वनपर्वणि । (पृ—४५) यत्सर्वेति 'स्त्रियं त्यक्त्वा जगत्त्यक्तं' इति स्मृतेस्त्यक्तस्त्रीकस्यापेक्षणीयाभावादित्यर्थः। छन्देनाभिप्रायेण । अनभिप्रेतमृत्यौ मृत्युमनभिलष्यति अप्रतिहतप्रसरोऽव्याहतगतिः । कुतस्तवेयं शक्तिस्तत्राह त्रिधातुरिति । उपयेमे परिणीतवान् 'उपाद्यमः स्वकरणे' इति तङ् । स्वकरणं विवाहः । इति द्वितीय उच्छ्वासः ॥

(पृ—४५) निर्वृतः सुखितः। कालधर्मेणायुज्यत ममारेत्यर्थः। उद्धतो गर्वितः। समानं नाम यस्य स सनामा तेन । 'ज्योतिर्जनपद' इत्यादिना समानस्य सः ।

।चित्राङ्गदनाम्नेत्यर्थः। दिवं गमित इति मारित इत्यर्थः। मतेन संमत्या। यौवनमापन्नो यौवनापन्नस्तस्मिन् 'द्वितीयाश्रितातीत' इत्यादिना समासः। आपन्नः प्राप्तः। तस्मिन् विचित्रवीर्ये।(पृ–४६)जागरामास अवहितो बभूवेत्यर्थः।'उषविदजागृभ्योऽन्यतरस्याम्'इति जागर्तेःपाक्षिक आमादिः।स विचित्रवीर्यः)एका गतिर्यस्य तत्तदेकगतिकं, तस्य भावस्तत्ता तया। पक्ष्मा अक्षिलोम 'पक्ष्माक्षिलोम्नि किञ्जल्के तन्त्वाद्यंशेऽप्यणीयसि।'इत्यमरः। विभावयन् विचिन्तयन्, समयं कालं विधाय निश्चित्य। राजन्येषु राजपुत्रेषु 'राजश्वशुराद्यत्' इति यत्। 'राज्ञो जाताविव' इति जातौ वृत्तिः। 'ये चाभावकर्मणोः' इत्यनः प्रकृत्या स्थितिः। **धनुरिति** धनुर्मात्रेण सहायवान् धनुर्मात्रसहायवान्। काशीं विशिनष्टि **या किलेति**। गौर्याः पार्वत्याः गुरोः पितुः। प्रेमास्पदभूता प्रीतिहेतुः। सर्वमङ्गलाकान्तस्य उमापतेः 'शर्वाणी सर्वमङ्गला' इत्यमरः। वितीर्णवतो दत्तवतः। **दिव्यभूमिरिति**। तथा च मार्कण्डेयपुराणे 'स गत्वा वसुधापालो दिव्यां वाराणसीं पुरीम्। नैषा मनुष्यभोग्येति शूलपाणेः परिग्रहः॥' इति॥ पञ्चतामात्रेण केवलेन मरणेन 'काश्यां तु मरणान्मुक्तिः' इति स्मृतेः। पाञ्चभौतिकं पञ्चभूतविकारभूतम्। शरीरं न गृह्णन्तीति पुनर्न जायन्त इत्यर्थः। सरभसं वेगेन हर्षेण वा सह 'रभसो वेगहर्षयोः' इत्यमरः।

तेजसा ब्रह्मचर्यवीर्यादिकृतेन। प्रधर्षिताः कातरतां नीताः। सवेशनिवेशिनः सामीप्यगताः। ग्रहा अङ्गारकादीनि ज्योतींषीव। (पृ—४७) मानो गर्वः। अभिमान आत्मनि वीरत्वसंभावना। टङ्कः पाषाणदारणः। टङ्कितं कीलितं तष्टं वा स्वान्तं मनो येषां तेषाम्। स्फुटं व्यक्तम्। अस्फुटितो बहिरनुदीर्णः आलापो येषां तेषाम्। भिन्नभिन्ना भिन्नप्रकाराः। संजल्पा असंबद्धा आलापाः। तत्प्रकारमाह **ननु भो** इत्यादिना। अनशनाय आहारत्यागाय। अभ्यवहारगोष्ठीं भोजनशालाम् प्रविविक्षति प्रवेष्टुमिच्छति। अथेति पक्षान्तरोपन्यासार्थः। वैमात्रेयस्य सपत्नीमातुः

गच्छन्त्याः पुत्र्याः । न संगच्छते युक्तं न भवति 'समो गम्यृच्छिभ्याम्' इति तङ् । असंगच्छमाना । **हृद्विरस्येति** मधुकरी भ्रमरीव । दारकर्मण्युद्वाहे । विलासिनीनां सखायो विलासिनीसखास्तेषां 'राजाहःसखिभ्यष्टच्' इति समासान्तष्टच् । विलासिनां शृङ्गारिणां यूनाम् । रतिरमणविहारो मन्मथविलासः । **भावेति** । 'रसाभिज्ञानयोग्यत्वं भाव इत्यभिधीयते । ईषद्दृष्टविकारः स्याद्भावो हावः प्रकीर्त्यते ।' इत्युक्तं भावहावयोर्लक्षणम् । आदिशब्देन हेलादीनां ग्रहणम् । तथा चोक्तं 'भावो हावश्च हेला च माधुर्यं धैर्यमित्यपि । लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम् । मोट्टायितं कुट्टमितं बिब्बोको ललितं तथा । कुतूहलं च चकितं विहृतं हास इत्यपि । एवं शृङ्गारचेष्टाः स्युरष्टादशविधा मताः ।'' इति ॥ सुभगंभावुकेन मनोज्ञतां गतेन 'कर्तरि भुवः खिष्णुच्खुकञौ' इति च्व्यर्थे खुकञ् । ततश्च असुभगो भवतीति सुभगंभावुकस्तेन । विघूर्णितमतिः किं मया प्रतिज्ञातमिति क्षुभितात्मा सन् । **कारणेत इति** किमपि कारणमपदिश्येत्यर्थः । अनिर्वाच्योद्धृत्य । अनुपित्सति अनुपतितुमिच्छति । 'तनिपति' इत्यादिना इटः पाक्षिकत्वेन तदभावे 'सनि मीमा' इत्यादिना पतेरच इस् । अभ्यासलोपश्च । **आरम्भेति** आरम्भ एव शूरता तया रथस्य निर्वहणे । वृथा निरर्थक आरभटा औद्धत्यस्य परिमा सामर्थ्यम् । अनतिक्रमणीयमनुल्लङ्घ्यम् । आज्ञा चक्रमिवाज्ञाचक्रं, सदा परिवर्तमानत्वाच्चक्रसाम्यमाज्ञायाः । जगच्चक्रमितिवत् । दीपिकायाः प्रकाशकर्त्र्याः । धर्मसंहिता स्मृतिस्तस्याः । **स्वात्मजामित्यादि** 'प्रायश्च कथा बृहदारण्यकोपनिषदि । **त्रयीमय इति** 'सैषा त्रय्येव विद्या तपति' 'वेदैरशून्यस्त्रिभिरेति सूर्यः' इत्यादिश्रुतिभ्यः सूर्यस्य त्रयीमयत्वम् । तरणिस्त्वष्टुः । तक्षणं त्वक्शरीरे उत्पादनयत्नाय शाणाप्रयोगमपि । अतिविशदं सुप्रकाशम् । **अहल्येति** 'अहल्यायै जार' इति श्रुतिः । आदिशब्देन चन्द्रस्य गुरुदारगमनमपि गृह्यते । स्वां

**दुहितरमित्यादि** एषा कथा भागवते दशमस्कन्धे पूर्वं कंसेन हिंसितानां षण्णां देवकीपुत्राणां तत्प्रार्थनया पुनराहरणसंदर्भे द्रष्टव्या । (पृ—४८) स्वपुत्रेभ्यो मरीच्यादिभ्यः। 'क्रुधद्रुह' इत्यादिना चतुर्थी । असूयामासेति 'असूञ् उपतापे' इति कण्ड्वादिरयं धातुः । अपदिशन् व्याजीकुर्वन् । **प्रवर्तते स्मेति** प्रसिद्धेयं कथा वृन्दोपाख्याने । तत्प्रकोपेन मन्मथविरोधेन । **पुंस्त्वस्येति** अर्धनारीश्वरत्वात् । अतः खलु अशक्यत्वादेव स्त्रीनिग्रहस्य।अन्यथा यौवने गार्हस्थ्यविधानाभावे।सध्रीचीनं सहभाविनं सहाञ्चतीति विग्रहे 'सहस्य सध्रिः' वैधे विधिविशिष्टे । निराबाधे निरुपद्रवे । अध्वनि गार्हस्थ्यप्रवेशरूपे मार्गे । अलोकसामान्येन लोकैरगतपूर्वेणेत्यर्थः । न्यायेन यावज्जीवव्रतधारणरूपेण ।सीदसि परिक्लिश्यसे । **घट्टकुट्यामेवेति** । ग्रामान्नगरं गच्छन् कश्चित्,तन्निकटे पदार्थानामायग्रहणाय राज्ञा स्थापितां घट्टकुटीमवेत्य, अप्रदायैव प्रदेयं, नगरं प्रवेक्ष्यामीति कृतमतिस्ततो व्यवहितेनान्येन पथा नगरं प्रविविक्षुः प्रयाति स्म । स ह्यारण्यकः पन्थाः। तेन च पथा गहनं विपिनं नीतस्तत्र सर्वरात्रं परिभ्रमणेन परिश्रान्तो विश्रान्तिमभिलष्यन् प्रभातसमये कथंचित्तामेव कुटीं प्रविवेश । तत्र देयं दत्त्वा, इदमाह 'गत्वा गत्वा घट्टकुट्यां प्रभातं' इति । अयमेव घट्टकुटीप्रभातन्यायः। एवं च यः स्वयमार्जवेन कर्तव्यमकृत्वा परिभ्रमन् , पुनस्तदेवातिप्रयासेन कर्तुमवतरति, तस्मिन्नयं न्यायो भवति । प्रकृते च यथाकालं दारानकृत्वा विषण्णः पुनस्तदर्थमागत एष इति । बीभत्सतां गर्हणीयत्वम् । पारं दृष्टवान् पारदृश्वा । तस्य 'दृशेः क्वनिप्' । अथेति पक्षान्तरोपन्यासार्थः । उद्धतप्रकृतिर्दृप्तस्वभावः। जिहीर्षति हर्तुमिच्छति । वाग्दोषेण अहं नैष्ठिको भवामीत्युक्तिदोषेण । षण्ढः क्लीबः । निगलं शृङ्खला । कर्मदोषेण हठात्करणदोषेण । शृङ्खलितो निबद्धः । अभङ्गुरमविच्छिन्नम् । जात्यश्व इव ब्रह्मचर्यमित्यनेन तुरगब्रह्मचर्यं धारयतीत्यर्थः । 'अभावात्स्त्रीपरित्यागस्तुरगब्रह्मचर्यकम् ।' इति दारा-

चर्ली । प्रलपितान्यनर्थकानि वचांसि । अनाकलय्य अविगणय्यैव । अवतस्थे स्थितवान् ।

(पृ—४९) त्रिवेणीसंभेदो गङ्गायमुनासरस्वतीनां संगमः 'संभेदः सिन्धुसंगमः । इत्यमरः । त्रेधा त्रिप्रकारेण 'एधाच्च' इति त्रेरेधाच् । समुह्यमानात्मानः समाकृष्यमाणमानसाः । भुजः परिघ इव भुजपरिघः, तस्य समीक्षया सम्यगवलोकनेन, एनश्चिह्नमात्मनो महावीरत्वख्यापनस्य । परिहन्यतेऽनेनेति परिघोऽयोमुसलम् । 'परौ घः' इति परावुपपदे हन्तेरप् घादेशश्च । अङ्गुलौ भवमङ्गुलीयम् । 'जिह्वामूलाङ्गुलेश्छः' अङ्गुलीयमेवाङ्गुलीयकम् । कलापः समूहः 'कलापो भूषणे बर्हे तूणीरे संहतावपि' इत्यमरः । संहतिः समूहः । प्रचुरा अधिका । अग्रेसरतामग्रगामित्वं श्रेष्ठत्वमिति यावत् । अग्रे सरतीत्यग्रेसरः 'पुरोऽग्रतोऽग्रेषु सर्तेः' इति सर्तेष्टः । अग्रशब्दस्य एदन्तत्वं च निपात्यते । अभिरूपं च तद्रूपं च अभिरूपरूपं तदस्यास्तीति अभिरूपरूपवान् तस्य भावस्तत्ता, ताम् 'प्राज्ञरूपुस्त्वरूपाभिरूपा बुधमनोज्ञयोः ।' इत्यमरः । यादृच्छिकं विनैवोद्देशेन प्रवृत्तम् । अध्यात्मादित्वाट्ठञ् । पक्षपातपिशुनं स्नेहसूचकमिव 'कामी स्वतां पश्यति । इति न्यायात् । प्रत्यूहभूतौ विघ्नभूताविव तद्दर्शनायेत्यर्थः । डोलायमानं चञ्चलमित्यर्थः । **प्रचलिता इवेति** 'स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः' इत्यस्य समानार्थकम् । दुष्टा अवस्था अवस्थानं स्थितिर्येषां ते दुरवस्थाः, तद्भावो दौरवस्थ्यम् । दुःखेनासिका दुःखासिका ताम् । आसिका आसनम् 'धात्वर्थनिर्देशे ण्वुल्वक्तव्यः' इति ण्वुल् । 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यं' इति भावेऽत्र कर्मसंज्ञा । आसिषत आसितवन्तः । पश्यतामित्यत्यनादरे षष्ठी पश्यतस्ताननादृत्येत्यर्थः । करिकलभो गजपोतः । शुण्डा गजहस्तः । प्रकाण्डं श्रेष्ठम् । चलाचलश्चञ्चलः । चलतीति पचाद्यचि 'चरिचलिपतिवदीनां वा द्वित्वमच्याक् चाभ्यासस्येति वक्तव्यम्' इति द्वित्वे आकि च रूपं चलाचल इति । त्रिकूटाचल कूटत्रयविशिष्टस्त्रिकूटनामको वा पर्वतः ।

अक्षममाणा असहमानाः । क्षमापतयो भूपाः । भुजाः स्तम्भा इव भुजस्तम्भास्तान् । असंभाव्य अगणयित्वा । भूर्तो । विटः । वीरचक्रं वीरसमूहः। आत्मनि स्वस्मिन् । संभावना जगदेकवीरोऽहमिति बहुमानः, तेन उपहृतः कृत्याकृत्यविवेकशून्य आत्मा बुद्धिर्यस्य सः । आहोपुरुषिकेति । अहो (अहं) पुरुष इत्यहंकारवानहोपुरुषः, तस्य भाव आहोपुरुषिका । मनोज्ञादित्वाद्वुञ् अहंकारवत्त्वमित्यर्थः। इत्युक्तं 'आहोपुरुषिकामात्रं भवानाह' इति भाष्यव्याख्याने कैयटेन । 'आहो इत्यहमित्यर्थे' इत्युक्तं नागेशभट्टेन । 'आहोपुरुषिका दर्पाद्या स्यात्संभावनात्मनि' इत्यमरश्च । लोहिताङ्गस्याङ्गारकस्य । एतादृशेषु एतत्प्रकारकेषु विवाहादिष्वित्यर्थः अभ्युदयमङ्गलमेषणाप्रयुक्तं शुभम्। (पृ—५०)त्यक्तैषणानामिति 'ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति' इतिश्रुत्या पुत्रादीनामेषणानां त्यागस्योक्तत्वात्ततो व्युत्थितानामित्यर्थः । पुत्रशब्देन दारा अपि गृहीता भवन्ति । परिव्राजकानां संन्यासिनां । स्पर्शसुखं स्त्रीसङ्गजं सौख्यम् । पुनः प्रसङ्गः प्रसक्तिः प्रवेश इति यावत् । निरपत्रपो निर्लज्जः । अभ्युदयस्य विवाहमङ्गलस्य भाण्डानि मूलधनानि प्रधानभूताः कन्या एवेत्यर्थः । अपदानेन पुण्यकर्मणा । ईप्सति आप्तुमिच्छति 'आप् ज्ञप्यृधामीत्' इति सनि ईत् अभ्यासलोपश्च । आतनूपातं शरीरपतनपर्यन्तम् । अनपवादेन निष्कलङ्कतया । वितथं व्यर्थम् । वटुरिति क्षेपार्थे 'चपलोऽयं वटुरिति वत्' आश्रव' प्रतिज्ञा । संस्था प्रतिज्ञा । अपलप्य निहुत्य । खलनिग्रहाय दुष्टशिक्षणाय । आकुलीभवेत् न्यायान्यायवैधुर्येण कलुषितं स्यात् । उदासिकया औदासीन्येन । उद्योजयन्तः प्रेरयन्तः। चोरंकारं चोरशब्दमुच्चार्य 'कर्मण्याक्रोशे कृञः खमुञ्' निर्भर्त्सयमाना गर्हयन्तः । भृत्यादायं भृत्येभ्यस्त्वरया आदाय 'अपादाने परीप्सायां' 'इति णमुल्' विधून्वन्तः कम्पयन्तः । समुत्तस्थुरिति 'अनूर्ध्वकर्मणि' इति ऊर्ध्वकर्मणि आत्मनेपदप्रतिषेधात्परस्मैपदम् ।

सिंहनादेन क्ष्वेडया गर्जितेनेत्यर्थः 'क्ष्वेडा तु सिंहनादः स्यात्' इत्यमरः। स्तम्भितप्रसरान्निरुद्धवेगान्। तच्छासनमाह **सास्त्वित्यादिना**। अष्टसु विवाहेषु ब्राह्मदैवार्षप्राजापत्यासुरगान्धर्वराक्षसपैशाचाख्येषु। तत्र विद्याचारसंपन्नं स्वयमप्रार्थयितारं च वरमाहूय सालंकारं कन्याप्रदानं ब्राह्मो विवाहः। यज्ञे ऋत्विजे अलंकृत्य दानं दैवः। गोद्वयं शुल्कत्वेन वरादादाय तस्मै दानमार्षः। युवां सह धर्मं चरतामिति पूर्वमाभाष्य यत्प्रदानं स प्राजापत्यः। कन्याबन्धुभ्यः कन्यायै चेप्सितं द्रविणं प्रदाय कन्याग्रहणमासुरः। कन्यावरयोः स्वेच्छया संगमो गान्धर्वः प्रसह्य कन्याहरणं राक्षसः। निद्राणायां विजने स्थितायां वा बलात्प्रवर्तनं पैशाचो विवाह इति भेदः। **द्वावेवेति** 'गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ' इति मनुः। द्वितीयो राक्षसः। **प्रशस्यतर इति** 'चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः। राक्षसं क्षत्त्रियस्यैकमासुरं वैश्यशूद्रयोः' इति मनुः। **निरवकाश इति** कन्यायाः प्रार्थकान्तराभावे सतीत्यर्थः। राक्षसापरपर्यायं राक्षसेति नामान्तरविशिष्टम्। **प्रसह्येत्यादि**। 'हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात्। प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते' इति राक्षसविवाहस्य लक्षणमुक्तं तत्रैव मनुना। वीरधुर्याणां वीरश्रेष्ठानामित्यर्थः। 'धुरो यड्ढकौ' अभ्यर्हितं पूजितमुत्तममिति यावत्। (पृ—५१) प्रधानशिष्टो मुख्यतया विहितः। अर्याणां वैश्यानामिव 'अर्यः स्वामिवैश्ययोः' इति 'ऋगतौ' इत्यतो यत्। **अर्थलाभ इति** प्रधानशिष्टो नेत्यनुषज्यते। सोऽर्थलाभश्च। एषां क्षत्रियाणाम् अन्वाचयशिष्ट आनुषङ्गिकत्वेन विहितः। तद्यथा भिक्षार्थमुद्यतं वटुं प्रति 'भिक्षामट, गां चानय' इति केनचिदुक्ते, तत्र भिक्षाटनं प्रधानतया शिष्टं गवानयनमन्वाचयतया। यदि भिक्षाटनावसरे तत्र गां पश्यसि, तर्हि तामप्यानय यदि तत्र न दृश्यते, तर्हि भिक्षाटनोपरोधेनापि गवानयनं न कर्तव्यमित्यर्थः। एवं

राज्ञां वीर्यप्रकटनं प्रधानभूतं, तदनुपरोधेन यद्यर्थलाभो भवति, तदा भवतु, न तु विक्रमोपरोधनार्थलाभाय यत्नः कार्य इत्यर्थः। अनु प्रधानमनुसृत्य तस्य पश्चाद्वा आचीयते बोध्यत इत्यन्वाचयः। अत्रैव राक्षसविवाह एव। निष्कृष्यते निर्धारितो भवति। काञ्चनगुणः स्वर्णस्य शुद्धिर्मलवत्त्वं वा। निकषोपले शाणाश्मनि, अन्तरेण सारातिरेकं अधिकबलाभावे 'अन्तरान्तरेणयुक्ते' इति द्वितीया 'अन्तरेणेत्यव्ययं 'पृथग्विनान्तरेणर्ते हिरुङ् नाना च वर्जने' इत्यव्ययवर्गेष्वमरः। आन्तरमन्तर्भवम्। कर्कशेन दृढेन साहसिकेन वा साध्ये साधयितुं योग्ये'कर्कशः परुषे क्रूरे कृपणे निर्दये दृढे। इक्षौ साहसिके कासमर्दकाम्पिल्लयोरपि' इति विश्वः। वीराशंसनेषु भयंकरेषु युद्धप्रदेशेषु 'सा वीराशंसनं युद्धभूमिर्याति भयप्रदा।' इत्यमरः। प्रथमान उत्कर्षं प्राप्नुवन्। वीर्यशुल्केन परिग्रहकरणेन। परिग्रहीत्रा परिणेत्रा। **वीरपत्नीति** वीरःपतिर्यस्याः सा वीरपत्नी'नित्यं सपत्न्यादिषु' इति पत्युर्नो ङीप् च। धर्म्येण धर्मादनपेतेन। **गुण्येनेति** 'रूपादाहतप्रशंसयोर्यप्' इति सूत्रे यप्प्रकरणेऽन्येभ्योऽपि दृश्यत' इति वार्तिकम्। तत्रोदाहृतं भाष्यकारेण'गुण्या ब्राह्मणाः'इति। तत इदं निष्पन्नं प्रशस्तो गुणोऽस्त्यस्येति गुण्यस्तेन उररीकृत्य अङ्गीकृत्य 'ऊर्याद्यन्तर्गत उररीशब्दः।नियोज्यसाध्ये भृत्यनिर्वर्त्ये। आश्चर्यमसाध्यमित्यर्थः वैनतेयो गरुडः। आमिषस्य भोग्यवस्तुनः। **अन्येनेति** 'उभयप्राप्तौ कर्मणि' इति सूत्रेण कर्मण्येव षष्ठीति नियमादामिषस्य षष्ठी अन्येनेति तृतीया च। कलापः समूहः। अभ्रेषो न्यायः 'अभ्रेषन्यायकल्पास्तु' इत्यमरः। विजिगीषूणां विजयेच्छूनाम्। 'सन् लिटोर्जेः' इति जयतेरभ्यासात्परस्य कुत्वम्। अभिषेणनं सेनयाभिगमनम् 'सत्यापपाश' इत्यादिना णिच्। 'उपसर्गात्सुनोतिसुवति' इत्यादिना सस्य षः।संपरायेषु युद्धेषु। मानिमानिनो मानिनं मानवन्तं आत्मानं मन्यमानाः। प्रवीरंमन्याः प्रवीरमात्मानं मन्यमानाः। 'आत्ममाने खश्च' इति चाणिनिः। इह यथाक्रमं वाक्यद्वयेऽपि णिनिः खश्च। सर्वाभिसारेण सर्वसंनाहेन 'सर्वाभिसारः

सन्नाहः सर्वसंनहनार्थकः' इत्यमरः। आशुगो बाणो वायुश्च 'आशुगौ वायुविशिखौ' इत्यमरः। विरमति शाम्यति। अथेति पक्षान्तरार्थः। यतरद्वयोरेतयोर्यदेकम्। आत्मने हितमात्मनीनम् 'आत्मन्विश्वजन' इत्यादिना खः। (पृ—५२) विष्फारयामास मुखरयामास 'विष्फारो धनुषः शब्दः' इत्यमरः। द्वितीयमपीत्यपिना कन्याहरणेनैव एकस्य शृङ्गस्य भग्नत्वं दर्शितम्। यथा वृषभादीनां शृङ्गिणां शृङ्गभङ्गो महान् परिभवस्तद्वदस्यः परिभवो जात इत्यर्थः। आध्मातः पूरितः। **जहि जहीति।** मुहुर्मुहुः पटहानघ्नन्नित्यर्थः। अत्रायं प्रयोगः। 'क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः' इति पौनःपुन्ये भृशार्थे वा लङो लोट् तत्र च परस्मैपदित्वेन हिः। 'क्रियासमभिहारे द्वे वाच्ये' इति द्वित्वम्। ततश्च जहिजहीत्येतत्। 'यथाविध्यनुप्रयोगः पूर्वस्मिन्' इति लोट्प्रकृतिभूतहन्तेरेवानुप्रयोगः। एवमुत्तरवाक्येष्वप्यवगन्तव्यम्। पटहो वाद्यविशेषः। पिपृहिपिपृहीत्यपिपरुर्मुहुर्मुहुर्भृशं वा पूरयामासुः। अपिपरुरिति 'पृ पालनपूरणयोः' इति जौहोत्यादिकधातोर्लङ् प्रथमपुरुषबहुवचनम्। धमतधमतेत्यधमन् 'मुहुर्मुहुर्भृशं वा शङ्खानाघोषयामासुरित्यर्थः' ध्मा शब्दाग्निसंयोगयोः' इति धातोः 'पाघ्रा' इत्यादिना धमादेशे लङ् अधमन्निति। धमतेत्यत्र तु पूर्वमुदाहृतसूत्रे 'वा च तध्वमोः इति तध्वमोर्विषये हिस्वयोः पाक्षिकत्वेन तदभावे रूपम्। सरतसरतेत्यसरन् तं लक्ष्यीकृत्य भृशमभिजग्मुरित्यर्थः। प्रक्रिया तूक्ता। परि तमित्यत्र 'लक्षणेत्थंभूताख्यान' इत्यादिना परेः कर्मप्रवचनीयता 'कर्मप्रवचनीययुक्ते द्वितीया' इति 'तं' इत्यस्य द्वितीया **किरतकिरतेति** पुनः पुनर्भृशं वा शरान् किरन्ति स्मेत्यर्थः। तनुत्रं कवचम्। शिरस्त्रं किरीटम्। वाहान् रथ्यानश्वान्। **क्षणुतेत्यादि**। अत्र क्षणुतेत्यादिकमविध्यन्नित्यन्तं सामान्यविशेषभावेनैकं वाक्यम्। तत्रानुप्रयोगार्थस्य 'अविध्यन्' इति सामान्यार्थस्य क्षणनतोदनादयो विशेषाः 'समुच्चये सामान्यवचनस्य' इति सामान्यार्थस्यैव धातोरनुप्रयोग-

विधानात् । ततश्च बाणशूलखड्गादिभिः क्षणनतोदनतर्हणपेषणभेदनच्छेदनरूपं निरुच्छ्वासतया वेधनमकुर्वन्निति निष्कृष्टार्थः । क्षणुतेति 'क्षणु हिंसायां' इति तानादिको धातुः । तृण्ढेति 'तृह हिंसायां' इति रौधादिकधातोर्लोण्मध्यमपुरुष-बहुवचनम्। पिण्ढेति पिषेः पूर्ववद्रूपम् ।शरासारैर्बाणसंपातैः। पर्जन्यपक्षे जलासारैः 'शरो दध्याद्यमसारे बाणे काण्डे तृणान्तरे। शरं तु नीरे' इति नानार्थरत्नमाला । ऊर्जस्वलं बलवत् । मिथ्यातापस वृथा व्रतधर ।

उपक्रान्ते प्रारब्धे । सुतुमुले सुतरां रोमहर्षणे अतीव भयानक इति यावत् । तुमुलं रोमहर्षणं' इत्यमरः । स्थगितं संवृतं व्याप्तमिति यावत् । 'ष्ठगे संवरणे' इति भौवादिको धातुः । तालध्वजो भीष्मः । सृजन्नुत्पादयन् । मण्डलाग्रान् खड्गान् । मुद्गरादय आयुधविशेषाः । निरस्यन् दूरं क्षिपन् । फलकानि चर्माणि' सादिनोऽश्वारोहहस्तिपकसारथीन् सादी तुरङ्गमातङ्गरथारोहेषु कथ्यते' इति विश्वः । रथ्यान् रथाश्वान् रथं वहतीत्यर्थे 'तद्वहति रथयुगप्रासङ्गं' इति यत् । केतनानि केतून् । (पृ—५२) दोष्मन्तो बाहुबलिन इत्यर्थः । लघुहस्ततया शीघ्रहस्तत्वेन । कृतहस्ततया अस्त्रविद्यायां शिक्षाविशेष-वत्त्वेनेति यावत् । ईर्ष्यन्तोऽक्षान्तिभृतः । नामग्राह नाम गृहीत्वा 'नाम्न्यादि-शिग्रहोः' इति णमुल् । आह्वयमाना इति 'स्पर्धायामाङः' इत्यात्मनेपदम् । संचितानि संपादितानि । वससीति भीष्मस्येति शेषः । शौण्डीरः साहसिकः । गृहीतं च संनद्धं च गृहीतसंनद्धं तस्मिन् । भार्गवस्य उपज्ञा भार्गवोपज्ञम् 'उपज्ञो-पक्रमं तदाद्याचिख्यासायां' इति तत्पुरुषे उपज्ञाशब्दस्य क्लीबत्वम्' उपज्ञायतेऽन-येत्युपज्ञा 'उपज्ञा ज्ञानमाद्यं स्यात्' इत्यमरः । विलूय छित्त्वा' अवलेपो गर्वः । प्रभ्रंश्य निपात्य ण्यन्ताद्भ्रंशेर्ल्यप् । आशंसनमिच्छा । दंशनं कवचम् । पारिप्लवा चञ्चला बुद्धिर्येषां तेषाम् । निरुपप्लवं निरुपद्रवम् । परापतन्तीमन्यान् पृष्ठतः

कृत्वा भीष्माभिमुखमागच्छन्तीम् । विकीर्णां खण्डशः क्षिप्ताम् । एकधाकारमनेकामेकधा कृत्वा 'नाधार्थप्रत्यये च्व्यर्थे' इति धाप्रत्ययान्ते उपपदे च्व्यर्थे कृञो णमुल्' **क्षतजेति** । क्षतजं रक्तमेव चन्दनं तस्य समालम्भे विलेपन इति विजयश्रीपक्षे, स्त्रीपक्षे तु क्षतजोपमं चन्दनमिति । 'समालम्भो विलेपनं' इत्यमरः । चन्द्रहासः खड्गः स एवादर्शबिम्बो मुकुरबिम्बः । स्त्रीपक्षे तु चन्द्रहासइवादर्शबिम्बः । परिवेत्तृतावचनीयं अयं परिवेत्तेति निन्दा 'यस्त्वग्निहोत्रदारादीन् कुरुते पूर्वजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः' इति मनुः । व्रतं ब्रह्मचर्यम् । मा भाङ्क्षीत् भग्नं न स्यात् । **असिधाराव्रतमिति** 'असिधारायां नियमेन वर्तनरूपं व्रतमिति वास्तवार्थः। 'युवा युवत्या सार्धं यन्मुग्धभर्तृवदाचरेत्' अन्तर्निवृत्तसङ्गः स्यादसिधाराव्रतं हि तत्' इत्युक्तं व्रतं चरामीति चार्थः । कोलाहलः कलकलरवस्तस्य च्छलं व्याजः । भुजाशिखरमंस एव पर्यङ्कः खट्वा ताम् । आरुरोह आरूढवती । अस्य भुज एव विजयलक्ष्मीः सुस्थिरा बभूवेति भावः ।

**अवरोहतीति** विरतसमरव्यवहारे सतीति समुदायार्थः । सांपरायिकाणां युद्धवीराणाम् । निदाघचण्डभानुर्ग्रीष्मकालसूर्यः । वीरः केसरीव वीरकेसरी । वीर्यशुल्काभिस्ताभिः कन्याभिरिति शेषः । **सौभेति**(१—५४) आयसं कामगं च किमपि विमानम् । तदस्य तदयं लब्धवानिति सौभपतिरुच्यते । पार्ष्णिग्राहः पृष्ठतस्तज्जयार्थमुद्यतः 'पार्ष्णिग्राहस्तु पृष्ठतः' इत्यमरः । सामुदायिकीं समुदाये संघे भवाम् । **वटुपाशेति** निन्द्याचार वटो 'याप्ये पाशप्' इति पाशप् । याप्यं निन्द्यम् । क्षिपन् गर्हयन् । अजनि जातम् । तयोर्भीष्मसाल्वयोः । जन्यं युद्धम् । मत्तवारणयोर्मदगजयोः । वासिता गजवधूः 'वासिता स्त्रीकरिण्योः' इत्यमरः । साल्वेनोपह्वन्यते सामीप्येन गम्यत इति साल्वोपघ्ना 'उपघ्न आश्रये' इति निपात-

नात्साधुः । प्रौढिरतिशक्तत्वम् । नातिप्रगाढं नातितीक्ष्णम् । आजमढो भीष्मः । ओजायमान ओजस्विवदाचरन् विक्रान्तो भवन्नित्यर्थः । 'कर्तुः क्यङ् सलोपश्च' इत्याचारे क्यङ् । ओजःशब्दो वृत्तिविषये तद्वति वर्तत इत्युक्तम् । जिते जये सति काशते दीप्यत इति जितकाशी । वर्षाम्बो भेकाः । स्तनति गर्जति सति । स्तनयित्नो मेघे । तिलान् वपतीति तिलवापी । कृषीवलः कर्षकः 'वले च' इति दीर्घः । वपन् मुष्णन्नित्यर्थः । इक्षुकाण्डमिव इक्षुकाण्डभञ्जम् 'उपमाने कर्मणि च' इति णमुल् । पशुमिव पशुमारम् । पूर्ववत्प्रक्रिया । धुर्या वाहाः । बर्हिसात्कृत्य कृत्स्नं बर्हि संपद्यमानं विधाय 'विभाषा साति कार्त्स्न्ये' इति सातिः । 'ऊर्यादिच्विडाचश्च' इति गतित्वम् । शताङ्गं रथम् ।

कण्ठीरवः सिंहः । गन्धहस्तिनीति 'यस्य गन्धमुपाघ्राय न तिष्ठन्ति प्रति-द्विपाः । स वै गन्धगजो नाम नृपतेर्विजयावहः' इत्युक्तलक्षणे गज इव । आत्तगन्धेऽ-भिभूते । विहस्ते व्याकुले च सति 'आत्तगन्धोऽभिभूतः स्यात्' इति 'विहस्तव्या-कुलौ समौ' इति चामरः । पारिप्लवाक्षेषु परिभ्रमल्लोचनेषु । तरला चञ्चला तारका अक्ष्णः कनीनिका यस्मिन् कर्मणि यथा तथा तरलतारकं । हरिणस्य मृगस्येव ईक्षणं यासां तासु अम्बादिषु कन्यकास्वित्यर्थः । तारस्वरेण गम्भीरेण ध्वनिना । अराति शत्रुं सात्वम् । नर्मतन्त्रेषु परिहासप्रधानेषु । कर्मतन्त्रेषु कर्मप्रधानेषु । कर्मशब्देन चेह वीर्यप्रधानो व्यापारो विवक्षितः । 'कर्मण उकञ्'इत्यत्रेव । संप्रहारो युद्धम् । प्रतिभानवान् नवनववाचोयुक्तिकुशल इत्यर्थः । (पृ—५५) समितिः समाजो युद्धं च 'अथ संगरे । सङ्गे सभायां समितिः' इत्यमरः । अकिंचित्करं' निष्प्रयोजनमित्यर्थः । क्रममाणोऽप्रतिबन्धेन व्याप्रियमाणः 'वृत्तिसर्गतायनेषु क्रमः' इत्यात्मनेपदम् । इह वृत्तौ । वृत्तिरप्रतिबन्धः । कर्मठः कर्मशूरः 'कर्मशूरस्तु कर्मठः'

इत्यमरः 'कर्मणि घटोऽठच्'। कमठाः कूर्माः। ते यथा विजने बहिरात्मानं प्रकाशयन्ति, अन्यदर्शने सति सपद्येवात्मानं संकोचयन्तर्निलीयन्ते, तद्वदित्यर्थः। वराकः तुच्छः। कदम्बं समूहः। निरसने दूरमपाकरणे क्षमश्चतुरोऽपि सन्। कलापः समूहः। उत्सर्गायते उत्सर्गवत्सामान्यविधिवदाचरति 'न च हन्यात्स्थलारूढं' इत्यारभ्य 'न निरायुधम्' इत्यादिना विशस्त्रवधस्य शास्त्रेण निन्दितत्वान्मुक्तोऽसीति भावः। सावज्ञमवमाननया सह। स्थास्नुः स्थिरतरः 'ग्लाजिस्थश्च ग्स्नुः'। प्रत्यवतिष्ठते प्रतिभटो वर्तते। संहत्य संघीभूय। कातरेष्वधीरेषु। नातिपटीयसा अत्यन्तं पटुतरत्वं तीक्ष्णत्वमदधानेन सामान्येनेति यावत्। विपाठेन शरेण। सोपोद्घातवर्णनं तत्प्राप्तेः पूर्वकथाकथनपूर्वकम्। जित्वरीतीति उक्तं चैतत् 'विड्राङ्ख्यः' इति सूत्रभाष्ये भगवता पतञ्जलिना तथथा 'यथा वणिजो वाराणसीं जित्वरीत्युपाचरन्ति' इति। व्याख्यातं च तत्रभवता कैयटेन 'वणिजश्च मङ्गलार्थी वाराणसीं जित्वरीति व्यवहरन्ति' इति। जित्वरी जयशीला लाभप्रदेति तेषां तथा व्यवहारकारणम्'इण्णशाजिसर्तिभ्यः क्वरप्' इति क्वरपि 'टिड्ढाणञ्' इत्यादिना ङीपि च रूपं जित्वरीति। सार्थः समूहः। सांकेतिकं संकेतेन निर्वृत्तम्। संकेतः संज्ञा। अन्वर्थतां यथार्थत्वम्। आपेदे प्रापत्।

निश्चितं च प्रचितं च निश्चप्रचम्। मयूरव्यंसकादित्वात्समासः। सभृतेषु सज्जीकृतेषु वैवाहिकेषु विवाहार्थेषु 'प्रयोजनं'इति ठञ्। संभारेषु सामग्रीषु। नानादेशीयेषु नानादेशभवेषु भिन्नप्रकारेषु वा गावो लोमानि दीयन्ते खण्डयन्तेऽत्रेति गोदानाख्यो विवाहात्पूर्वं कर्तव्योऽभ्युदयः।(पृ—५६प्रत्यासन्नतरे नेदीयसि। मौहूर्तिकेषु मुहूर्तज्ञेषु कार्तान्तिकेषु 'स्यान्मौहूर्तिकमाहूर्तज्ञानिकार्तान्तिका अपि'इति नामलिङ्गानुशासनोक्तेर्मुहूर्तशब्द उक्थादिगणे पठनीयः।ततश्चमुहूर्तं वेद मौहूर्तिकः। ठक्। इतरयोरम्बिकाम्बालिकयोः। मनसि निवसति, तस्मिन्नेव सक्तं मे मन इत्यर्थः। आन्तरो मानसः। व्यतिकरः

संबन्धः । वाहीकेन बहिर्भवेन 'बहिषष्टिलोपो यञ्च । ईकक् च' इति ईकक् टिलोपश्च । प्रथयितुं प्रख्यापयितुम् । अनाशयज्ञेन ममाशयमभिप्रायमजानता । तन्मयीं सात्वरूपाम् । अन्याय्यं अयुक्तमित्यर्थः । अन्तरात्मा मनः । बाह्य आत्मा शरीरम् ।

विरतेषु निर्व्यापारीकृतेषु । परिषदि साधवः पारिषदाः 'परिषदो ण्यः' इति सूत्रे 'परिषदः' इति योगविभागात् 'भक्ताण्णः' इति णः । वर्या वरणार्हाः। अद्यत्वे इदानीम् । प्रतिपत्तव्यम् कर्तव्यं । आशयमभिप्रायम् । उशन्ति इच्छन्ति मन्यन्त इत्यर्थः। भावज्ञास्तत्त्वदर्शिनः । (पृ—५७) अगोचरमविषयमनिश्चितामिति यावत् । गुरुतरं कथमप्यनतिलङ्घनीयमित्यर्थः । उपन्यस्याम उदाहरामः । सुसंश्लिष्टोऽतीव समीचीनो दीर्घकालं विश्लेषरहितो वा । उपरुन्धतो बलात्कुर्वतः । **सिकता इति** सिकतानिष्पीडनवन्नीरसता स्यादिति भावः । अन्यं कामयत इत्यन्यकामा । निरयार्णवे नरकसागरे । अवतरणं प्रवेशम् । प्रस्तुतं प्रकृतम् । **न खलु त्याज्यमिति** पुरोवर्तिनि त्याज्ये तस्मिन्नेव लग्ने नाभ्युदय आचरितव्यः, त्याज्येन मुक्ते त्वनुष्ठीयतामिति ज्योतिर्विदामुपदेशः । तद्वदिहापि त्याज्यामेनां कन्यामग्रे निधाय किमपि नाचरितव्यम् । तस्मादियमिदानीमेव निरस्यतामिति भावः । समुदाचारः संप्रदायः ।

अनुमोदमानोऽभिनन्दन् । साधूक्तं समीचीनमभिहितं । संवादी अनुकूलः। अपरक्तमप्रियम् । ईप्सितमाप्तुमिष्टं कामसुखमिति यावत् । **वरं चेति** 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति न्यायात् । प्रागेव हरणकाल एव । यद्यवेदयिष्यत विज्ञापितवती स्याच्चेत् । पर्यहरिष्याम परिहृतवन्तस्त्यक्तवन्तः स्याम । छिन्नं न व्याहतं न भवति । समयः प्राप्तोऽस्य सामयिकम् । 'समयस्तदस्य प्राप्तः' इति ठञ् । छन्दाविष्करणमभिप्रायप्रकाशनम् । प्रतिष्ठतां प्रयातु । गुप्त्यर्थं रक्षणार्थम् । आसा-

ल्वगृहद्वारं साल्वगृहद्वारपर्यन्तम् । चतुरन्तयानेन शिबिकया । प्रजिघाय प्राहिणोत् 'हि गतौ वृद्धौ च' इति सौत्रादिकधातोः 'हेरचङि' इत्यभ्यासात्परस्य कुत्वम् । अथ अम्बाप्रयापणानन्तरम् । इति तृतीय उच्छ्वासः ।

द्वारे नियुक्तो दौवारिको द्वारपालकः 'तत्र नियुक्तः' इति ठक् 'द्वारादीनां च' इत्यैच् । लब्धान्तरा प्राप्तावकाशा प्रवेशितेत्यर्थः । सप्रणयं सस्नेहम् । वार्ताहराणां वृत्तान्तनिवेदकानाम् 'हरतेरनुद्यमनेऽच्' । फलबन्धनकाले स्वयंवरसमय इत्यर्थः । मुषिता खण्डिता छिन्ना । दिष्टेन दैवेन । कुसुमितेति पुनर्भीष्मेण मुक्तत्वमिह कुसुमितत्वम् । देवत्रापि देवेष्वपि 'देवमनुष्य' इत्यादिना सप्तम्यन्तात्त्रा । अरोचकोऽप्रियः । कुरुकुमारो विचित्रवीर्यः । प्रस्तुत्य उदाहृत्य । उपस्थापितैर्गुप्त्यर्थं प्रापितैः । उपस्थायिका उपस्थातुं 'तुमुण्वुलौ क्रियायां क्रियार्थायां' इति ण्वुल् । मयि निवेष्टुं मां परिणेतुम् ।

(पृ. ५—९) निर्बीजं पुनरङ्कुरशक्तिर्यथा निःशेषं नाशिता स्यात्तथा । भर्जितः अग्निना पक्वः कृतः पूर्वं भूतो भूतपूर्वः 'भूतपूर्वे चरट्' इति निर्देशाद्भूतशब्दस्य परनिपातः । न भूतपूर्वोऽभूतपूर्वः । संयुगे (युद्धे) साधवः सांयुगीनास्तेषाम् । प्रतिजनादित्वात्खञ् । जलमानुषाद्भीष्मात् । तस्य गाङ्गेयत्वेन तथा क्षेपः । अपरेण अन्येन आक्रान्ते व्याप्ते गृहीते इति यावत् । आमिषे भोग्यवस्तुनि मांसे च । नखरायुधस्य सिंहस्येव । अस्मादृशस्यास्मत्प्रकारकस्य । पराक्रान्तस्य शूरस्य । स्पृहा इच्छा । अभिकं कामिनं 'अनुकाभिकाभीकः कमिता' इति निपातनात्साधुः । तमेव विचित्रवीर्यमेव । पर्यायस्यावसरस्य पाणिग्रहणोचितकालस्येति यावत् । पर्ययोऽतिक्रमः, तत्कृतस्तन्निमित्तः विपर्ययो व्यत्यासः कार्यहानिरिति यावत् । 'परावनुपात्यय इणः' इति पर्युपपदादिणोऽनुपात्यये घञि सति रूपं पर्याय इति । उपात्ययः कालातिपातः । तस्मिन्नर्थे तु 'एरच्' इत्यचि पर्यय इति रूपम् । पर्ययोऽ-

तिक्रमः। प्रत्यादिष्टेन निराकरणेन भावे क्तः। विश्लथेन विगलितबन्धेन। केशपाशेन कचसमूहेन 'पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे' इत्यमरः। मलीमसेन मलिनेन 'ज्योत्स्नातमिस्रा' इत्यादिना मलशब्दान्मत्वर्थे 'मलीमस' इतीमसजन्तो निपातः। धूसरेण धूम्रवर्णेन 'पतिरस्त्यस्या इति पतिवत्नी 'अन्तर्वत्पतिवतोर्नुक्' इति नुक्। नान्तत्वान्ङीप् च। तस्या यन्मङ्गलमञ्जनाक्तनेत्रत्वकङ्कणधारणादिकं। संसूच्यमानः पतिवत्नीमङ्गलस्यापगमो यस्याः सा। अतिभारेणाधिक्येन क्षारेण ऊषरमृद्विशेषेण। निर्णिक्ते शोधिते व्यपेतो रागो रञ्जनद्रव्यान्तरकृतो वर्णविशेषोऽनुरागश्च यस्मात्तस्मिन्। अनुनयः प्रार्थनैव रागो रञ्जनद्रव्यं तेन। आधातुकामा उत्पादयितुमिच्छन्ती 'तुं काममनसोरपि' इति तुमो मलोपः। 'अतो हलादेर्लघोः' इति सिचि वृद्धेः पाक्षिकत्वेन तदभावे रूपं 'अगदीत्' इति। प्रणयोऽनुरागः प्रार्थना च। अप्रत्याख्येयं खल्विति 'न कांचन परिहरेत्। तद्व्रतं' इत्यादिश्रुतिविद इति शेषः। भावितात्मनो निश्चितबुद्धेः। हातुं त्यक्तुम्।

अतिपातोऽतिक्रमः। निरस्ता त्यक्ता। पर्याकुलमतीव क्षुभितं यथा तथा। अचकलत् कलितवती चिन्तामापेत्यर्थः। अपि नामेति शङ्कापूर्वक आशंसने। प्रपन्नां शरणं प्राप्ताम्। साधुदृष्टया अनुग्रहबुद्ध्या(पृ—६०)उतेति पक्षान्तरशङ्कार्थः। प्रत्याचक्षीत निराकुर्यात्। परास्तायास्त्यक्तायाः। पारावारमन्तरेण समुद्रं वर्जयित्वा। गत्यन्तरमन्यद्गन्तव्यस्थानम् दक्षिणाक्षीति दक्षिणानामक्षिभुजोरूणां स्फुरणं स्त्रीणाममङ्गलसूचकमिति निमित्तशास्त्रम्। अदक्षिणान्यननुकूलानि। विषमविपाका विपरीतफलोदया। नियतिर्विधिः। तिरस्काराय प्रत्याख्यानाय। दुर्विदग्ध दुर्मते। निरनुक्रोशता निर्दयत्वम्। अनुरूपं उचितम्। स्वैरं स्वेच्छया। अभिजातजातामुत्तमकुलोत्पन्नाम्। अभिरूपरूपामतीव सौन्दर्यवतीम्। तारुण्ये यौवने। अक्षणोः हिंसितवानसि। 'क्षण् हिंसायां' इति तौवादिको धातुः। कान्तार्थिनी भर्तारमभि-

याचमाना । कुलं कुलमटतीति कुलटा स्वैरिणी सेव । अटाट्यते कुटिलं गच्छति 'अट गतौ' इति धातोः'सूचिसूत्रि' इत्यादिना यङ् 'दीर्घोऽकितः' इत्यभ्यासदीर्घः। 'नित्यं कौटिल्ये गतौ' इति गत्यर्थात्कौटिल्य एवेति नियमः । गतिकौटिल्यं चेह स्वयमेव कन्यायाः कान्तार्थं कुलं कुलं प्रति गमनम् । समयं संकेतम् । निराश्थं निराशं यथा तथा । निरास्थत निरासितवान् निरुपसृष्टादस्यतेर्लुङि ' अस्यतेस्थुक् ' इति थुक् । ' उपसर्गादस्यत्यूह्योर्वा वचनं' इत्यात्मनेपदम् । अत्राकर्मकाधिकारस्य निवृत्तत्वान्मामिति शेषः । नोदियाय न उदितासीत् । दौरात्म्यं दुर्बुद्धिः । प्रत्ययो विश्वासः । श्लक्ष्णाभिर्मनोज्ञाभिः प्रतीतं विश्वासभाजम् । **गोलाङ्गूलेति** । यथा हि मार्गात्प्रभ्रष्टो वने परिभ्राम्यन्नन्धः केनापि खलेन 'भोः साधो, अयं गौः संनिहितं ग्रामं गच्छति, अतीव दान्तश्च । अस्य लाङ्गूलं गृहीत्वा तेन दर्शितपथः स्वैरं याहि' इति श्लक्ष्णया गिरा प्रत्ययितो गृहीततल्लाङ्गूलश्च सन् , सपद्येव पाश्चात्यपादप्रहारपूर्वं प्रधावता तेन वृषभेण समाकृष्यमाणस्तद्वाक्ये प्रत्ययेन तदनुज्झंस्ततो बह्वनर्थभाक् स्यात्, एवं सान्त्ववचसि प्रत्ययेन हतास्मीति भावः । अयमेवान्धगोलाङ्गूलन्याय इत्युच्यते । जनुषान्धं जात्यन्धं 'पुंवानुजो जनुषान्ध इति च' इत्यलुक् । प्रतारयेद्वञ्चयेत् । वरं मनाक् प्रिये । यवागूरस उष्णिकारसः । चापलेन चपलकर्मणा असमीक्ष्यकारित्वेन । युवादित्वादण् ।

(पृ—६१) चापल्यकृतमसमीक्ष्यकारित्वेन संजातम् । युवादिवद्ब्राह्मणादिष्वपि पाठाच्चपलशब्दस्य, ततः ष्यञि चापल्यमिति रूपम् । औत्पत्तिकं उत्पत्तौ जन्मन्येव भवम् । अध्यात्मादित्वाट्ठञ् । मौग्ध्यं मौढ्यम् । यत्किंचनकारिता विनैव परामर्शं स्वेच्छया करणम् । नानुरज्यति अनुरागं न प्राप्नोति कर्मकर्तरिप्रयोगे 'कुषिरजोः प्राचां श्यन् परस्मैपदं च' इति श्यन् परस्मैपदं च । मन्तूयमानः कृतापराधः कण्ड्वादिरयं धातुः । ततः ' अकृत्सार्वधातुकयोर्दीर्घः'

इति दीर्घः । स्रवन्ती नदीप्रवाह इति यावत् । अनभ्यासमित्येति दूरतः परिहर्तव्येति 'इत्येऽनभ्यासस्य' इति मुम्' अभ्यासः सामीप्यं ततोऽन्योऽनभ्यासो दूरदेश इत्यर्थः। इत्या गन्तुमर्हा 'एतिस्तु' इत्यादिना इणः क्यपि तुकि च रूपं इत्य इति । अध्यवसायो निश्चयः । दूनाया उपतमाया दुःखिताया इति यावत् । उरसिकृत्याभिप्रेत्य 'अनत्याधान उरसिमनसी' इति गतिसंज्ञा । निरसिसिषुर्निरसितुमिच्छुः । विद्वेषकारणं विरोधस्य हेतुः । **संनियोगेति** । संनियोगशिष्टानां सह वा प्रवृत्तिः, सह वा निवृत्तिः'इति न्यायात् । नाथमानायां याचमानायाम् । विवोढा परिणेता । अभिनिविष्टमासक्तं चित्तं यस्य स तथाभूतः । (पृ—६२) सापत्न्यस्य सपत्नीत्वस्य करणं कृतिम् । निःसत्त्वा दुर्बलाः । अन्तरं भेदः । मोक्षन्ते मोक्तुमिच्छन्ति । 'मुचोऽकर्मकस्य गुणो वा' इति सनि गुणे अभ्यासलोपे च सति रूपम् ।

सोपपत्तिकं सयुक्तिकमिव । वृत्तो निर्वृत्तः। मेदुरं व्याप्तम्। मयि निविंशतु। मां परिणयतु । कुण्ठितो नष्ट इत्यर्थः। निराकरिष्णुर्निरस्यन् 'अलंकृञ्' इत्यादिना इष्णुच् । चाषः किकीदिव्यपरपर्यायः पक्षिविशेषः । जालं वागुरा । परामृष्टचरीं पूर्वं करेण स्पृष्टाम् 'भूतपूर्वे चरट्' इति चरटि 'टिड्ढाणञ्' इत्यादिना ङीप् । सहचरी भार्या । प्रत्युत्पन्नदशस्तत्कालप्रतिभानवत्यः । (पृ—६३) प्राणेश्वरी भार्या मृत्युप्रदा च । **हस्तग्राहमिति** हस्तेनेत्यर्थे 'हस्ते वर्तिग्रहोः'इति णमुल् । शिथिलोऽदृढः संग्राहो मुष्टिबन्धो यस्याः सा तथाभूता 'समि मुष्टौ' इति ग्रहेर्घञ् 'मुष्टिबन्धस्तु संग्राहः' इत्यमरः ।

संनद्धेन सज्जीकृतेन । अवातिष्ठत अवस्थिता बभूव । बहूनां पूरणो बहुतिथस्तस्मिन् । 'तस्य पूरणे डट्' इति डटि 'बहुपूगगणसंघस्य तिथुक्' क्षिप्यते स्म निरस्यते स्म । विप्रलम्भकः प्रतारकः । **उभयेति** या खलु गौः

शाद्वलभ्रमेण कूलद्वयेऽपि परिभ्राम्यति, न त्वर्थं लभते, सा उभयकूलपशुरित्युच्यते 'उभयकूलसमुत्थितशाद्वलभ्रमगतागतखिन्नगवीदशाम्' इति विदर्भराजश्च । परिभ्राम्यस्यनवस्थितं पर्यटसि । शमादित्वाद्दमेः श्यन्युपधादीर्घः । अपसार्य विद्राव्य । सीमान्तपालं स्वदेशसीमायां परराष्ट्रादभ्यागच्छतां विज्ञानायाधिकृतम् ।

(पृ—६४) **पूतिकूष्माण्डेति** यथा पूतिकूष्माण्डस्य 'मम मास्तु, मम मास्तु' इत्युभयत्र प्रत्याख्यानं भवति, एवं यस्य जनस्य उभाभ्यां निरसनं तत्रायं न्यायोऽवतरति । रूक्षं क्रूरम् । वैदग्धीनां चातुर्याणाम् । मनोभवः कामः । शाठ्यं वञ्चना । प्रमार्ज्यते स्म व्यपोहित इत्यर्थः । दयिता प्रणयिनी । प्रणयोऽनुरागः। सुस्फुटदोषत्वं चात्र सर्वसमक्षं परामृष्टत्वाद्भीष्मेण अलर्को भ्रान्तः श्वा 'अलर्कौ धवलार्के स्याद्रोगोन्मादितकुक्कुरे' इति विश्वः। समालीढा सम्यगास्वादिता । **बकवृत्तेरिति** यथा हि बको मत्स्यार्थी सन् प्रशान्तस्तपस्वीव सरस्तीरे लक्ष्यैकतानस्तिष्ठन् यदृच्छयोद्वर्तमानं मत्स्यं सहसा खादत्येवमयं ब्रह्मचारिवेषेण लोकं प्रत्याययन् समये त्वां धर्षितवानित्यर्थः । दुर्विपाको दौर्भाग्यम् । **अधोक्त इति** मिथ्यापवादकल्पनाश्रवणासहिष्णुतया तद्वाक्यविरामार्थमित्यर्थः । अभिशंससि मिथ्याकलङ्कमारोपयसि । पावकशिखा अग्निज्वाला उपमा यस्यास्तां तथाविधाम् । प्रतिभूलम्भिका साक्षिणीति यावत् । तद्भयेन भीष्मभयेन । न जिघृक्षति ग्रहीतुं नेच्छसि । असतोऽविद्यमानस्य दोषस्य आरोपणेन कल्पनेन । निरास निरासितवान् । सौशील्यमिति परिहासोक्तिः । प्रातिभाव्यं प्रतिभूत्वम् । **घृतकुम्भीकृत इति** यथाग्निशिखा संनिहिता सती घृतकुम्भं द्रवीकरोति, एवमयं तपस्वी भीष्मस्त्वया वितथव्रततया द्रवीकृतात्मा कृत इत्यर्थः।'तप्ताङ्गारसमा नारी घृतकुम्भसमः पुमान्। तस्माद्घृतं च वह्निं च नैकत्र स्थापयेद्बुधः ॥ इति स्मृतिः । वर्णी ब्रह्मचारी । निरर्थकेन निष्फलेन । परस्य परि-

भाषणेन सनिन्दितोपालम्भेन 'यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणं' इत्यमरः निष्कासयामास विद्रावयामास । (पृ—६५) अवधूना निरस्ता । आघ्नाना ताडयन्ती 'आङो यमहनः' इति सूत्रे 'स्वाङ्गकर्मकाच्च' इति वार्तिकम् । तेन मुखमुरश्चेति स्वाङ्गकर्मकत्वात् हन्तेरात्मनेपदम् । मुषिता खण्डितास्मि । धूर्तः कितवः प्रतारक इति यावत् । पतिं वृणीत इति पतिंवरा'सञायां भृतॄवृ' इत्यादिना खच् । विधूतवान्निराकृतवान् । जहिहि मुञ्च । अन्यं कामयत इत्यन्यकामा, ताम् । प्रेयसीं प्रियतराम् । प्रादुद्रुवत् प्रदुद्राव 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इति द्रवतेर्लुङि चङ् । चिररात्राय चिरम् । अव्ययमेतत् स्वरादिपाठात् 'चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः' इत्यव्ययवर्गेऽमरश्च । साक्रन्दं सरुदितम् । यद्वा । क इह त्रातेति त्रातृशब्दं पुरस्कृत्य 'आरावे रुदिते त्रातर्याक्रन्दः' इत्यमरः। न्यपप्तन्निपतितवती 'पतः पुम्' इति पतेर्लुङि, अङि पुम् ।

निशाम्य विलोक्य । निशम्य श्रुत्वा । समाजः समूहः। वर्षीयान् वृद्धतरः।सामाजिकान् सभ्यान् । इतिकर्तव्यता उपरि कर्तव्यम् । विश्राम्यति वर्तत इत्यर्थः। विविच्य पृथक्कृत्य । गहना दुरवगाह्या सुसूक्ष्मेति यावत् । अनिर्धार्यानिश्चित्य । यत्किंचित्स्वेच्छया ब्रुवाणेषु व्याचक्षाणेषु । संक्रमणमन्यात्र प्रसरणं संक्रमः, ततो भवः सांक्रामिकः । अवतरेदिति 'धर्मो विद्धस्त्वधर्मेण...विद्धास्तत्र सभासदः' इति 'अब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषी' इति 'पादोऽधर्मस्य कर्तारं पादः साक्षिणमृच्छति। पादः सभासदः सर्वान् पादो राजानमृच्छति' इत्यादिना अन्यायवादिनां सभासदामपि किल्बिषित्वस्य स्मरणात् । (पृ—६६) ननु तर्हि त्यज्यतामयं व्यवहार इत्याशङ्क्याह **शरणार्थिनीति करुणामिति** 'मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनं' इति दुःखिषु करुणार्पणस्यावश्यकत्वेनानिराकार्यत्वादिति भावः । तपस्या तपश्चरणम् ।

षयान्तात्तपसः 'अ प्रत्ययात्' इत्यकारप्रत्यये अदन्तत्वेन टापि च रूपम् । वैशाखो मन्थदण्डः विचार एव वैशाख इति रूपकम् 'वैशाखमन्थमन्थानमन्थानो मन्थदण्डके' इत्यमरः । उपाददीमङ्गीकुर्याम । तत्तुमपराद्धानपराद्धनिर्णयः ।

मानयित्वा पूजयित्वा । व्यवसाय उद्यमो निश्चयो वा । सामिकृते अर्धनिर्वृत्ते पाणिग्रहणवर्जे तत्पूर्वभाविनि अभ्युदयकलापे निर्वृत्ते सतीति यावत् । 'सामि' इति समासः । सामीत्यव्ययं अर्धे इत्यर्थे 'सामि त्वर्धे जुगुप्सिते' इत्यमरः । अञ्जसाकृतमार्जवेन कृतमुचितं स्यादित्यर्थः 'अञ्जस उपसंख्याने' इत्यलुक् । एवं भीष्मे दोषाभावमुदाहृत्य साल्वे तमाह **एतस्या इति** अभियुञ्जानो भीष्मेण सह युद्धमाचरन् । उपालम्भनीयो निन्द्यः । ननु पुनरागतां तां निरस्यन् साल्वः कथमदुष्टस्तत्राह **अन्येति** क्षत्रसमयं क्षत्रियधर्मम् । अनागसं निरपराधम् । गुरुजनस्य पित्रादेः संवेदनं विज्ञापनं । अन्तरेण विना । पित्रादिभ्योऽनिवेद्येत्यर्थः । आन्तरेण अन्तर्भवेण रहस्यप्रयुक्तेनेति यावत् । वेशजनेन धूर्तस्त्रीजनेन । प्रियोपदेशं उपदेशवाक्यश्रवणे कुतूहलविशिष्टमित्यर्थः। प्रलोभ्य साभिलाषं विधाय । अन्यस्य रामा स्त्री अन्यरामा । अन्यं रमयतीति वा अन्यरामा । आर्जवेन ऋजुभावेन । अभिभवंस्तिरस्कुर्वन् । शासनीयो शिक्षणीयः । विषमोऽसमीचीन इत्यर्थः । प्रतारयितुं वञ्चयितुं । एतदर्थमम्बानिमित्तम् (पृ— ६७) चारित्रशङ्कितः किमियं भीष्मेण नीता, तेन किमप्यकार्यं कृत्वा दूषिता स्यादिति संदेहवान् । प्रत्याचष्टे निराकरोति । यतो यस्मात्पुरुषविशेषात, अन्वेष्टव्य उत्पादयितव्य इत्यर्थः । मन्तुमानपराधी । व्यवसितं व्यापारः। कामक्रोधादीत्यादिपदेन मदादयो गृह्यन्ते । राज्ञां संबन्धी राजकीयः वृद्धाच्छे 'राज्ञः क च' इति तत्संनियोगेन कादेशो विधीयते । **अरिषड्वर्गेति** कामक्रोधलोभमोहमदमत्सराः षट् आन्तराः शत्रवः । तद्वर्गस्य निग्रहो जयः परो मुख्यो येषां ते तथोक्ताः । **शेषमस्येति**

अस्य एतद्व्यवहारस्य शेषमवशिष्टांशम्। प्रतिष्ठस्व प्रस्थानं यात्रां कुरु। इयमवस्था (दशा) यस्याः सा इदमवस्था। सकाशं सामीप्यम्। नियमान् व्रतानि विधानानि वा। तपस्यन्ती तपश्चरन्ती। अनर्थोऽस्त्वदभ्यर्थनानिमित्तः।

(पृ—६८) जायां माति मिमीते मिनोति वा जामाता 'जामाता दुहितुः पतिः' इत्यमरः। दुहितुः पुत्र्या अपत्यं स्त्री दौहित्री बिदादित्वादञ्। अङ्के उत्सङ्गे। करुणरसैकतानं दुःखभूयिष्ठमित्यर्थः 'एकतानोऽनन्यवृत्तिः' इत्यमरः। जाते वत्से। समेषु सौख्यकालेषु। विषमेषु विपत्कालेषु। परायणं गतिर्भवतीति शेषः। परीता परिवृता विशिष्टेति यावत्। दिदृक्षे द्रष्टुमिच्छामि 'ज्ञाश्रुस्मृदृशां सनः' इति तङ्। तदन्तरा तत्कार्यं वर्जयित्वा। शं शर्म। क्षमं योग्यम्। यतरो भीष्मसाल्वयोर्द्वयोरेको यः। अपराद्धो मद्विषये अपराधं कृतवान्। दण्डमपातयित्वा तमशिक्षयित्वेत्यर्थः। कथमुपशाम्येयमिति तथोपशमनस्य गर्हितत्वादित्यर्थः 'विभाषा कथमि लिङ् च' इति गर्हायां कथमि लिङ्।

तदन्तरे तन्मध्ये। अनुचरः शिष्यः। कृपणवत्सलो दीनेष्वभिमानवान् 'वत्सांसाभ्यां कामबले' इति लच्। साधु समीचीनमिति वादो वदनं साधुवादस्तेन। समुदिते सम्यगुदिते संघीभूते च सति। विवस्वान् सूर्यः। वैखानसास्तापसाः। प्रादुर्बभूवेत्यस्य जामदग्न्य इत्यनेन संबन्धः। निष्पन्नेन निर्वृत्तेन। ब्रह्मवर्चसेन ब्रह्मतेजसा 'ब्रह्महस्तिभ्यां वर्चसः' इति समासान्तोऽच् (पृ—६९)द्विजराजश्चन्द्रः, डामरं भयानकं च कडारं पिशङ्गवर्णं च डामरकडारं तेन। समिद्धा दीप्ता जिह्वेव जिह्वा यस्य स समिद्धजिह्वः। जिह्वाशब्देनेह ज्वालाभिधीयते। सप्तजिह्वोऽग्निः। 'काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा। स्फुलिङ्गिनी विश्वरूपी च देवी लेलायमाना इति सप्त जिह्वाः' इति श्रुत्या काल्यादीनामाग्निज्वालानां तज्जिह्वात्वेनोक्तत्वात्। 'पर्परीकहसनीमणिपीथाः सप्तजिह्वसामिधावसितार्चिः' इत्या-

दि त्रिकाण्डशेषः । तैक्ष्ण्यस्य क्रौर्यस्य । हर्ता संहारकः । **समन्तपञ्चकस्येति** पुरा हि जामदग्न्यः सर्वान् क्षत्रियान्निहत्य तद्रुधिरैः समन्ताद्ध्रदपञ्चकं विधाय, तत्र पितॄंस्तर्पयामास । ततस्तात्पितॄणां वरेण तत्समन्तपञ्चकाख्यं बभूव । तत्संनिहितो देशोऽपि समन्तपञ्चक इत्यभिधीयते । तथा च महाभारते ' स सर्वं क्षत्त्रमुत्साद्य स्ववीर्येणानलद्युतिः । समन्तपञ्चके पञ्च चकार रौधिरान् ह्रदान् । स तेषु रुधिराम्भःसु ह्रदेषु क्रोधमूर्छितः । पितॄन् संतर्पयामास रुधिरेणेति नः श्रुतम् । तेषां समीपे यो देशो ह्रदानां रुधिराम्भसाम् । समन्तपञ्चकमिति पुण्यं तत्परिकीर्तितम् " इति । आहर्ता विधाता । पारदृश्वा पारं दृष्टवान् । प्रपन्नानां शरणागतानाम् ।

यथोपवेशं उपवेशं स्थानमनतिक्रम्य । उच्चावचेषु नानाप्रकारेषु । लोकान् अभिरमयन्ति प्रीणयन्तीति लोकाभिरामास्तेषु । निदानमादिकारणम् । तद्दुःखेन तस्य राज्ञो दुःखेन, तस्याः कन्याया दुःखेन वा । दुःखितः संजातदुःखः तारकादित्वादितच् । कृतमित्यव्ययं अलमित्यर्थे । अवसितं समाप्तं दुष्कृतस्य पापस्य फलं यस्यास्तथाभूता । समा अवस्था ययोस्तौ समवस्थौ शकन्ध्वादित्वात्पररूपम् । तयोर्भावः समवस्थता । सुहृदो भावः सौहार्दं मैत्री 'हृद्भग ' इत्यादिना उभयपदवृद्धिः । विस्रब्धं प्रत्ययो यथा भवति तथा । अभिमतं इष्टम् । (पृ—७०) अतिवर्तेत उल्लङ्घेत । प्रियाकर्ता प्रियकारी 'सुखप्रियादानुलोम्ये' इति डाच् । जहि मारय । क्षत्रियाणी क्षत्रियजातौ समुत्पन्ना । नूनं ध्रुवम् । तज्जातिर्हि विपद्यपि रौक्ष्यं न जहाति 'अर्यक्षत्रियाभ्यां वा स्वार्थे ' इत्यानुङ्ङीष्च । रौक्ष्यं क्रौर्यम् । पूर्वः पक्षः प्रथम उद्देशः । पूर्वपक्षतया सिद्धान्तप्रतियोगितया व्यर्थतयेति यावत् । तवायं मनोरथो भीष्मवधः । आपृच्छ्य स्वदेशाय गमयित्वा ।

योजनशतादभिगमनमर्हति योजनशतिकः तस्य भावस्तया । ' योजनं गच्छति ' इति सूत्रे ' क्रोशशतयोजनशतादुपसंख्यानं' इत्युक्त्या ' ततोऽभिगमन-

मर्हतीति च वक्तव्यं' इति च वार्तिकात्त्रन्। आशिशासिषमाण आशासितुमिच्छन्। प्रतीक्ष्येषु पूज्येषु । चतस्रोऽश्रयो यस्याः सा चतुरश्रा अन्यूनातिरिक्तेत्यर्थः । सुप्रातसुश्व' इत्यादिना बहुव्रीहावजन्तो निपातः। चतुरश्रा बुद्धिर्यस्य स चतुरश्र-बुद्धिः । दूरेत्यः दूरे भवोऽत्यन्तदूरवर्तीत्यर्थः । 'दूरादेत्यः' इति वार्तिकम् । प्रमादः कर्तव्येष्वनवधानम् । अग्रणीरग्रगामी । अचरमो मुख्यः । यद्वृत्तं यस्य स यद्वृत्तः । पुरुषस्यायुः पुरुषायुषं 'अचतुर' इत्यादिना अजन्तो निपातः। तज्जीवतीति पुरुषायुषजीवी । जीया इति आशीर्लिङ् । (पृ—७१) हृदये परिवर्तिनी सदापि बम्भ्रम्यमाणा। आशंसा इच्छा । अस्खलन् भ्रंशमभजन्नेव । कदापि मम शीलवैकल्यं मा भूदिति नित्यं मम चिन्तेति भावः । सा आशंसा । उपचर्यत इति प्रश्रयोक्तिः । समीचीनं युक्तमिव । एकजातीयकमेकप्रकारकम् । उभयत्र त्वयि मयि च । सारूप्यं समानरूपवत्त्वम् । जन्यजनकयोः पितापुत्रयोः। वृत्तिर्व्यवहारः। प्राञ्जलेन ऋजुना। अनुयोक्तुं प्रष्टुम्। क्षेप्तुं निरसितुम्।अवसीयते निश्चीयते। बलीयसी बलवत्तरा। इतिकर्तव्यता कार्यम्। उद्देशमभिप्रायम् । अपदिश्य व्याजीकृत्य। सुदिनायते सुदिनं करोति 'सुदिनदुर्दिननीहारेभ्यश्च' इति करणे क्यङ्।

उपन्यस्तमुदाहृतम् । निपुणः सूक्ष्मबुद्धिः । आवश्यकमवश्यं कर्तव्यम् अध्यवसाय निश्चित्य । प्रथा ख्यातिः । आपूर्यमाणपक्षः शुक्लपक्षः। कलानाथश्चन्द्रः। (पृ—७२) प्रतायते विस्तारीक्रियते 'तनोतेर्यकि' इति पाक्षिक आकारः किंवदन्ती जनश्रुतिरपवादवचनमिति यावत् । व्याकर्तुं व्याख्यातुम्। खलानां दुष्टानां जिह्वा रसना। यथास्वं यथायथं यथास्वभावमित्यर्थः ।वीप्सायामव्ययीभावः। 'यथास्वं तु यथायथम्' इत्यमरः । विवरीतुं प्रकाशयितुम् । प्रथते समर्था भवतीत्यर्थः । प्रथमा विधातृशक्तिः 'सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्' इत्यादिश्रुत्या, 'यः कल्पः स कल्पपूर्वः' इति न्यायाच्चातीतकल्पवदेवाद्यापि यथास्वं

सृजति ब्रह्मा, न तु जलस्यौष्ण्यं, वह्नेर्वा शैत्यमिति वस्तुस्वभाववैपरीत्येनापि । चतुरा समर्था । चरमा जिह्मेत्यर्थः । दुर्मुखोऽसंबद्धं प्रलपन्नित्यर्थः । अन्तर्वत्नीं गर्भिणीम् । स्वजायां सीताम् । काकुत्स्थस्य रामस्य । प्रमृड्ढि परिहरेत्यर्थः । कौलीनं जनवादम् 'स्यात्कौलीनं लोकवादे युद्धे पश्वहिपक्षिणाम्' इत्यमरः । सर्वे च ते कर्णाश्च सर्वकर्णाः, सर्वेषां वा कर्णाः सर्वकर्णाः, तेषामधीनं तदधीनं, तस्य भावस्तत्ता ताम् । यावन्न सर्वत्र व्याप्रियते तावदित्यर्थः । अश्नुते व्याप्नोति ।

सव्यथं मनःपीडया सह । **प्रादुर्बभूवुरिति** यद्यपि 'परोक्षे लिट्' इति परोक्षविषय एव लिट् प्रयोज्यः, तथापि, तत्त्वमविचार्य स्वस्मिन्दोषारोपणकृतमात्मनो मनःकालुष्यं दर्शयितुं 'जुहवांबभूविम रघा' इत्यादाविव प्रयोग इत्यवगन्तव्यम् । जघन्यो विवेकशून्यः । अपरामृश्यानालोच्य । जानातेर्ज्ञाधातोः । अवरजाभ्यां भगिनीभ्याम् । माङ्गलिकाय विधये विवाहाय । कमितारं भर्तारम् । (पृ—७३) प्राहिणवं प्रहितवानस्मि । बाढमित्यव्ययमङ्गीकारे । अथेति प्रश्ने । प्रतिपत्तिरुपरितनी चिन्ता । समुद्विग्नो भीतः । परामर्शेन स्पर्शेन । शान्तमित्यव्ययं मास्त्वित्यर्थे । मुखतो भवं, मुखतीयं गहादिगणे 'मुखपार्श्वतसोर्लोपश्च' इति गणसूत्रम् । विजातीयं विरुद्धप्रकारकम् । अभिशंसितं मिथ्यादोषारोपणम् । अनभ्यन्तरो बाह्यस्तत्संबन्धविरहित इत्यर्थः । अभ्युपैष्यदङ्गीकृतवती स्यात् । मोपन्यस्यत् न वदतु । व्रतविलोपि ब्रह्मचर्यभञ्जकम् । आयत्ता अधीना । जनीजनस्य स्नुषायाः । तस्मिन्नेव रक्षकधर्मं प्राप्त एव । पृ—७४ अनाश्वासो विश्रान्त्यभावः कस्याचित्क्वचिदपि विश्वासो न भवेदित्यर्थः । दुष्यति दोषवती भवति । शकुन्ताः पक्षिणः । हस्तमनुहस्तो यस्यां क्रियायां सा हस्तानुहस्तिका **जननीति** जनन्या मातुर्गर्भाशयं गर्भस्थानम् । अनुशायिनो लोकान्तरे पुण्यक्षयानन्तरं शेषेण कर्मणा पुनः शरीरप्र-

हणाय पुनर्महीमवतीर्णो जीवोऽनुशयी, तस्य हि व्रीहियवतिलमाषादौ संश्लेषवतोऽपि तत्र स्वात्मनीव तद्गतगुणदोषसंसर्गो नास्ति । यदा तु मातुर्गर्भाशयं प्रविशति, ततः प्रभृति शरीरादिकं तद्गतसुखदुःखादिकं च भवति, यथैवं वर्याया अपि यदा कुत्रचिन्निष्ठा भवति, ततः परमेव गुणदोषव्यवहार इति भावः । पण्यवस्तुनः क्रयद्रव्यस्येव । नान्तरीयकं अविनाभूतं, न अन्तरं विनाभावो नान्तरं नशब्दस्य अन्तरशब्दस्य च सुप्सुपेति समासः । नान्तरे भवं नान्तरीयं 'वृद्धाच्छः' ततः स्वार्थे कः । **त्वदायत्तमिति** त्वत्तोऽपि प्रशस्तबलस्यान्यस्याभावादिति भावः । अवमत्य परिभूय । नाभिप्रैषि नेच्छसि । ज्ञातिजनः पित्रादिबन्धुजनः । तत्परिहाराय परामर्शदोषं प्रमार्ष्टुम् । वर्षासु भवा वार्षिकी 'वर्षाभ्यष्ठक्' गिरिनदी क्षुद्रा नदी, या वर्षास्वेव प्रवहति । कूलमुद्रुजतीति कूलमुद्रुजा कूलं भिन्दाना ततो बहिरुत्सर्पन्तीत्यर्थः 'उदि कूले रुजिवहोः' इति खश् । वाणीपक्षे तु उल्लङ्घितमर्यादेत्यर्थः । स्वाभाविकेन स्वभावोऽविद्या, तदुद्भूतेन । विपथेन दुर्मार्गेण । प्रविवृत्सन्तं प्रवर्तितुमिच्छन्तम् 'वृतु वर्तने' इति धातोः सनि 'वृद्भ्यः स्यसनोः' इति वा परस्मैपदम् 'न वृद्भ्यश्चतुर्भ्यः' इति तङानयोरभावे इट्प्रतिषेधे च सति रूपम् । **आचार्यो भवतीति** 'आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि । स्वयमाचरते यस्मात्तस्मादाचार्य उच्यते' इत्याचार्यशब्दनिर्वचनादित्यर्थः। आचार्यकं आचार्यत्वम्। योपधत्वाद्वुञ् । (पृ—७५) शैष्यकं शिष्यत्वम्। **प्रज्ञावादिन्निति** वादमात्रेण पण्डितवद्भासमानो न तु तत्त्वज्ञो यः स प्रज्ञावादीत्युच्यते । निभालयामि निश्चिनोमि । असंबद्धवादी अयुक्तवादी । पौर्वापर्यं पूर्वापरभावम् । प्रपञ्चो विस्तारः। संरब्धं सक्रोधं ससंभ्रमं वा । धनुर्धनुरिति संभ्रमार्था द्विरुक्तिः। आनीयतामिति शेषः। विभीषिका भयोत्पादनम् । अनुनिनीषति अनुनेतुमिच्छति । वर्षीयान् वृद्धतरः । शाम्यतु शान्तो भवतु भवानिति शेषः । सप्रहासं परिहासेन सह **एहि मन्य**

इत्यादि मन्यसे गुरुं विजेष्य इतीत्यर्थः 'प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च' इति मन्यधातूपपदकस्य धातोर्मध्यमपुरुषस्य, मन्यतेरुत्तमपुरुषस्य च विधानात् । संक्रान्तिः अवतरणं शिक्षेति यावत् ।

उच्चरमाणेष्विति 'उदश्चरः सकर्मकात्' इत्यात्मनेपदम् । (पृ—७६) आशंसिनोऽभिलाषिणः । प्रस्तुतप्रतीपं प्रकृतविरुद्धम् । आशंस इत्यदि 'आशंसावचने लिङ्' विजयी भविष्यामीत्यर्थः । असंवर्मितेन कवचरहितेन । भूमौ तिष्ठतीति भूमिष्ठस्तेन 'अम्बाम्बगोभूमि' इत्यादिना षः । यच्चप्रतियुध्येयेति 'यच्च यत्रयोः' 'गर्हायां च' इति लिङ् । सोपस्करः सोपकरणः 'उपस्करो रथाङ्गे' इति सुडन्तो निपातः। अभिवादकोऽभिवादयितुम् 'तुमुण्ण्वुलौ क्रियायां क्रियार्थायां' इति ण्वुल् । संग्रामाय युद्धाय प्रभवति सांग्रामिकं, प्रभवत्यर्थे सतापादित्वाट्ठञ् । क्षणस्य पश्चादनुक्षणम् 'अव्ययं विभक्ति' इत्यादिना अव्ययीभावः । प्रतिभानं बुद्धेर्नवनवोन्मेषः । विततीभवति व्याप्रियमाणे । समवायः संघः । अहं प्रथममहं प्रथममिति यस्यां क्रियायां सा अहंप्रथमिका । रामत इति । रामस्य पक्ष इत्यर्थः । तथा भीष्मतो भीष्मपक्षे 'पष्ठ्या व्याश्रये' इत्युभयत्र तसिः ।

अभ्यर्णं सामीप्यं 'अभेश्चाविदूर्ये' इति इण्निषेधः । 'रदाभ्यां' इत्यादिना निष्ठातो नः । (पृ—७७) प्रणाय्येन वैराग्यसंपन्नेन 'प्रणाय्योऽसंमतेऽपि स्याद-भिलाषविवर्जिते' इति मेदिनी । 'प्रणाय्योऽसंमतौ' इति निपातनात्साधुः । संमतिः प्रीतिविषयीभवनं भोगेष्वादरोऽपीत्युक्तम् । छात्रेण शिष्येण । कलहायसे कलहं करोषि 'शब्दवैरकलह' इत्यादिना करोत्यर्थे क्यङ् । अविधेयं वचस्यतिष्ठन्तम् तीर्थे आचार्ये स्नानार्थमवतरणघट्टे च । क्षोभयतुं आकुलयितुं विलोडयितुं च । वृथा दुर्जयत्वेन निरर्थकस्य अपवाद एव पङ्कं तस्य क्षेत्रीभवनादृते आस्पदीभवनं वर्जयित्वा । समीहितारं गन्तुं तं जेतुमित्यर्थः । उपढौकितान्युपायनीकृतानि उपकर-

णानि सामग्रीः । स्यन्दनायते स्यन्दनवद्रथवदाचरति । वादान्यकं वदान्यस्य दातुः कर्म, तस्य गुणस्तेन आवर्जिता वशीकृता काश्यपी भूमिः । वाहायन्ते वाहव- द्रथाश्ववदाचरन्ति । वेदमातरः सावित्र्याद्याः । तोकमर्भकम् । अस्युद्यतौ उद्धृतखड्गौ 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ' इति निष्ठायाः परनिपातः । फलानुप्रपातमिति णमुलन्तम् । फलं फलमनुप्रपत्य, फलमनुप्रपत्यानुप्रपत्येत्यर्थः 'विशपतपदस्कन्दां व्याप्यमानासेव्यमानयोः' इति णमुल् । फलं शराग्रम् । तपिस्तपनम् । मातरि अन्त- रिक्षे श्वयति गच्छतीति मातरिश्वा वायुः । अश्वचोदनया सारथ्येन 'जय्यं जेतुं शक्यम् 'क्षय्यजय्यौ शक्यार्थे ' इति निपातनात्साधुः । देशिको गुरुः ।

पुनरुक्तकौतुको द्विगुणितोत्साहः । उपपन्नं युक्तम् । युयुत्सा योद्धुमिच्छा । वरीयसा उरुतरेण बलवतेति यावत् । व्यायामो युद्धम् । प्रथीयसीं पृथुतराम् । ' र ऋतो हलादेर्लघोः' इति पृथोऋकारस्य र ईयसुनि । प्रथां ख्यातिम् । पृ—७८) प्रधनं युद्धम् । अवलेपो गर्वः । उज्झितुं त्यक्तुम् । वैधर्म्यवृत्त्या विरुद्धप्रकारेण । विरतोद्यमे परित्यक्तयुद्धव्यवसाये सति । राजन्यानां समूहो राजन्यकं ' गोत्रोक्ष ' इत्यादिना वुञ् । तेन जन्यं युद्धं, तेन कलिता उत्पादिता । प्रतिद्वंद्वीभवितुं योद्धुम् । मा पीड्येरन् पीडिता न स्युः।गुरुवद्गुरोरिव । तदपीडयैव वेदादीनामनुपद्र- वेणैव । मातुरागतं मातृकं पितुरागतं पैतृकम् । तत आगताधिकरणे उभयत्र'ऋतष्ठञ्' द्वितीयं ब्राह्मण्यम् । 'ब्राह्मणो न हन्तव्यः' इति श्रुतिरन्यविषयेत्याह तपस्वीत्या- दिना काण्डपृष्ठः शस्त्राजीवी ' शस्त्राजीवे काण्डपृष्ठायुधियायुधिकाः समाः'इत्यमरः। न पुनः कार्याकार्येति 'गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथ प्रतिपन्नस्य न्याय्यं भवति शासनम्' इति स्मृतेः । जह्यां त्यजेयम् । सर्गो निश्चयः ।

पतत्रिभिः पक्षिभिः । पत्त्रिभिर्बाणैः । हरिदन्तरेषु दिङ्मध्येषु । ओतप्रोत इव सर्वतः स्यूत इव । नीरन्ध्रीभवति निरवकाशीभूते । आस्तीर्यमाणे आच्छाद्यमाने शस्त्रैश्च शस्त्रैश्च प्रहृत्येदं युद्धं प्रवृत्तमिति शस्त्राशस्त्रि 'तत्र तेनेदमिति सरूपे' इति समासः 'इच्कर्मव्यतिहारे' इति समासान्त इच् । इचस्तिष्ठद्गुप्रभृतिगणे पाठादव्ययत्वम् । 'अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घश्च । ततः समुत्थेन समुद्भूतेन । (पृ—७९) द्यौश्च पृथिवी च द्यावापृथिव्यौ 'दिवसश्च पृथिव्यां' इति चाद्दिवो द्यावादेशः 'द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी' इत्यमरः । अग्नौ आग्नेयास्त्रभवे । एवमुत्तरत्रापि तद्देवताकास्त्रप्रयोगोऽवगन्तव्यः । दम्भोलौ वज्रे । **सूचिभेद्येनेति** सूचिभेद्यकुण्डोपवाह्यशब्दौ तमोविशेषणभूतौ तदाधिक्यं दर्शयतः । संतमसेन सर्वतो व्यापिना अन्धकारेण 'अवसमन्धेभ्यस्तमसः' इति समासान्तोऽच् । समाव्रियमाणे सम्यगाच्छाद्यमाने । विव्रियमाणे विशेषेण प्रकाश्यमाने । कलहकुतूहलिनि कलहप्रिये । देवर्षौ नारदे । अवहारकालो युद्धसंकोचनसमयः । अधिकविंशेषु विंशतेरधिकेषु एकविंशतौ । अधिका विंशतेरिति समासे 'संख्ययाव्ययासन्न' इत्यादिना बहुव्रीहिः । 'बहुव्रीहौ संख्येये डजबहुगणात्' इति डच् । 'ति विंशतेर्डिति' इति तिशब्दस्य लोपः । तत इदं रूपं 'अधिकविंशेषु' इति । **द्वाविंश इति** द्व्यधिका विंशतिर्द्वाविंशतिः 'द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः' इत्यात् । द्वाविंशतेः पूरणो द्वाविंशः 'विंशत्यादिभ्यस्तमडन्यतरस्यां' इति तमुडोऽभावे 'तस्य पूरणे डट्' इति डटि 'ति विंशतेर्डिति' इति तिलोपः । तालद्वयसं तालप्रमाणं 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' इति द्वयसच् । उत्तालं भयानकं दर्शनं यस्य तत्तथाभूतं 'उत्तालमुत्कटे श्रेष्ठे विकराले प्लवंगमे' इति मेदिनी । लस्तके धनुर्मध्ये 'लस्तकस्तु धनुर्मध्ये' इत्यमरः । गृहीतं गृहीतमिति वीप्सायां द्विरुक्तिः । यद्यदृश्यते

तत्सर्वमित्यर्थः प्रागेव ज्यासंयोगात् मौर्वीसंगमनात्पूर्वमेव। विरुज्य भङ्क्त्वा। तद्गौरवेणेव गुरौ बहुमानेनेव। ज्यायाः भुवः संयोगेन संश्लेषेण अनपेतं अविरहितं युक्तमित्यर्थः। 'ज्या मौर्वीमातृभूमिषु' इति विश्वः। विदधे कृतवान्। सूदयता घ्नता। निसृष्टा मुक्ता। उद्वलितेनोत्थितेन। उक्षिते सिक्ते। तस्मिन् भीष्मे। विष्टब्धेषु निर्व्यापारीभूतेषु। विष्टपेश्वरेषु लोकपालेषु। काश्यां भवा काश्या अम्बा। यद्यपि वृद्धाच्छे काशीयेति भाव्यं, तथापि 'काश्ये, न कामं गृह्णामि' इति, भारतप्रयोगानुरोधेन दिगादित्वं कल्प्यम् 'काश्यश्च परमेष्वासः' इति भगवद्गीतासु च (१—८०) तं भीष्मम्। भुवं स्पृशतीति भूस्पृक्, न भूस्पृक् अभूस्पृक् तम्। मन्दाकिनी गङ्गा। स्तनं धयति पिबतीति स्तनंधयः पुत्रः 'नासिकास्तनयोर्ध्माधेटोः' इति खश् मुम् च। प्रहरणं शस्त्रम्। शंतमेन अतीव मङ्गलेन। अव्रणं वीतक्षतरुजं। आदाय चरतीत्यादायचरस्तेन 'भिक्षासेनादायेषु च' इति चरेष्टः। मुष्टिं धयतीति मुष्टिंधयस्तेन शीकरसंचारिणेत्यर्थः। मुष्टिंधयो बालश्च। शीकरवर्धितो मुष्टिंधयः शीकरमुष्टिंधयस्तेन अतीव बालेनेति यावत्। 'शिशुकः क्षीरकण्ठकः। बाले मुष्टिंधयश्च' इति त्रिकाण्डशेषः। गन्धवहेन वायुना। 'उल्लाघो निर्गतो रोगात्' इत्यमरः। रश्मिन् जग्राहेति सारथेर्हतत्वात्स्वयं सारथ्यं कर्तुं प्रवृत्तेत्यर्थः। रश्मयः प्रग्रहाः 'किरणप्रग्रहौ रश्मी' इत्यमरः। साचिव्योपकारेण। मिथ्यागौरवं अभूतं बहुमानम्। सांप्रतं युक्तम्। वाजवतो बाणान्। जिह्मगप्रतिमेन सर्पतुल्येन। अजिह्मगेन बाणेन। भुजान्तरे वक्षसि। कश्मलं मूर्छा। औत्पातिकानि उत्पातसूचकानि। प्रहर्तारं भीष्मम्। कण्टकः शत्रुः। दुःश्रवाः कर्णकठोरा इत्यर्थः। भयं किं मुनिर्मृतः स्यादिति, करुणरसस्तन्मूर्छादर्शनेन। बीभत्सरसो दुःश्रवकिंवदन्तीनिमित्तम्। अपेतमोहे व्यपगतमूर्छे। क्षत्रबन्धो

क्षत्त्रियाधम, बन्धुशब्दोऽधिक्षेपवाची ब्रह्मबन्धुरितिवत्। समुद्भूतं सांराविणं बहुभिः क्रियमाणः शब्दो यस्मिंस्तस्मिंस्तथाभूते सति। संरावशब्दात् 'अभिविधौ भाव इनुण्' 'अणिनुणः' इत्यण् 'इनण्यनपत्ये' इति इनः प्रकृत्यावस्थितिः, न तु 'नस्तद्धिते' इति टिलोपः। 'संरावो बहुभिः कृतः' इत्यमरः। (पृ—८१) जगच्चक्षुः सूर्यः।

तस्मिन्नेव क्षणान्त एव। धूमायमानेषु धूमवत्सु भवत्सु धूमशब्दाद्भवत्यर्थे क्यङ्। दुःखादयो वृत्तिविषये तद्वति वर्तन्त इत्युक्तम्। ऊष्म उद्वमत्सु ऊष्मायमाणेषु 'बाष्पोष्मभ्यामुद्वमने' इति क्यङ्। धिष्ण्येषु स्थानेषु गृहेषु वा। निष्पच्यमाने क्वथ्यमाने। अत्याहितं महाभीतिः। कान्दिशीकेषु भयद्रुतेषु। 'कांदिशीको भयद्रुतः' इत्यमरः। विमानेन चरन्ति वैमानिका देवाः तेषु। संहर उपसंहर मा मुञ्चेत्यर्थः, अभिमन्त्र्यमाणे प्रयोगार्थं मन्त्रमावर्तयति सति। ते नारादादयः। तदन्तरे तयोर्युध्यमानयोर्मध्ये। विनीतसंरम्भं गतक्रोधम्। चरणौ पीडयन् वन्दमान इत्यर्थः। प्रत्यक्षयितुं प्रत्यक्षं कर्तुं 'तत्करोति' इति णिच्। मनाक् ईषदपि। अक्षान्तिकारणं क्रोधहेतुः। (पृ—८२) अन्विच्छ विचिन्तयेत्यर्थः। साधीयः साधुतरम्। स्थूणानिखननेति भुवि निखन्यमाना स्थूणा पुनः पुनश्चलनेन यथा स्थैर्यमापाद्यते तद्वदित्यर्थः। दढिमानं दृढत्वम्। स्थेम्ना स्थैर्येण 'प्रियस्थिर' इत्यादिना इमनिचि स्थिरस्य स्थादेशे रूपम्। इति चतुर्थ उच्छ्वासः।

(पृ—८१) युवतिर्जरती युवजरती 'युवा खलतिपलितवलिनजरतीभिः' इति सूत्रेण लिङ्गविशिष्टपरिभाषया ज्ञापितत्वात्समासः 'या युवतिरेव जरतीधर्मेण युक्ता सा युवजरती' प्रकृते बाल्य एव तपसे प्रवृत्तत्वात्तथात्वम्। जुहवामास हुतवती अग्निप्रवेशं कृतवतीत्यर्थः। 'भीह्रीभृहुवां श्लुवच्च' इति चादामादि

'श्लुवद्भावेन द्वित्वम् । प्रसादेन परिवर्तनोपलब्धपुंस्त्वेन । पौंस्नं पुंस्त्वं 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' इति भावे स्नञ् । प्रवाहरूपेण यथा प्रवाहोऽनुस्यूततया प्रवहति तद्वदित्यर्थः । पारयितुं पूर्णं कर्तुम् । ऐतिह्यं अम्बायाः शिखण्डित्वेन जननं, तस्य च प्राक् स्त्रीत्वेन जन्म च । प्रत्यश्रृणोत् प्रतिज्ञातवान् । स्त्रीपूर्वेण पूर्वं स्त्रीभूतेन ।

अहश्च रात्रिश्चाहोरात्रः । द्वंद्वसमासः 'रात्राह्नाहाः पुंसि' इति पुंस्त्वम् । क्षेत्रियेण अप्रतिकार्येणेत्यर्थः 'क्षेत्रियच्परक्षेत्रे चिकित्स्यः' इति सूत्रम् । 'परक्षेत्राद्वा तत्र चिकित्स्यः' इत्येतस्मिन्नर्थे परलोपो घश्च प्रत्ययः' इति भाष्यम् । परक्षेत्रे जन्मान्तरशरीरे चिकित्स्यो व्याधिरसाध्यत्वात्क्षेत्रियः, तथा परक्षेत्रे धान्यार्थे क्षेत्रे यानि तृणानि जातानि विनाश्यानि तानि क्षेत्रियाणि, तथा परदारेभ्यो निग्राह्यः क्षेत्रियः । तथा परशरीरेषु संक्रमय्य यद्विषं चिकित्स्यते, तत्क्षेत्रियम्' इति व्याख्यातं कैयटेन । 'क्षेत्रियं क्षेत्रजतृणपरदेहाचिकित्स्ययोः। परदाररतासाध्यरोगयोः क्षेत्रियः पुमान्' इति मेदिनी । प्रकृते असाध्येनेत्यर्थः यक्ष्मणा क्षयरोगेण । क्षेत्रीकृतो गृहीत इत्यर्थः ।

(पृ—८३) पुरुषेण कृता पौरुषेयी 'सर्वपुरुषाभ्यां णढञौ' इति सूत्रे 'पुरुषाद्वधविकारसमूहतेनकृतेष्विति वक्तव्य' इति तेनकृतार्थे ढञ् 'टिड्ढाणञ्' इत्यादिना ङीप् च । न पौरुषेयी अपौरुषेयी वेदवागित्यर्थः। सुप्रणीतया सुष्ठु सुनिपुणं वा विरचितयापि । पौरुषेय्या पुरुषकृतया वृत्त्या प्रवृत्त्या व्याख्यानेन च । प्रसाद्यते वशीक्रियते सम्यग्विवृतार्थतां नीयते च । प्रसीदति पुरुषवृत्त्यनुकूला भवति स्फुटार्था भवति च । कुल्या क्षुद्रनदीव 'कुल्याऽल्पा कृत्रिमा सरित्' इत्यमरः । आत्मन्यपि महत्त्वमारोपयति स्वबलेन साधितार्थत्वं मन्यते । स्वयमपि सागर-

गामित्वाभिमानवती भवति च । बाहुल्यमाधिक्यं, तेन 'एकपुत्रं चापुत्रमित्येव व्यपदिशन्ति' इति तेनैवोक्तत्वादिति भावः । उदवहत्परिणीतवान् । समूलकाषं कषिते समूलं कषिते नाशिते सति 'निमूलसमूलयोः कषः' इति णमुल् कषादिष्वाद्यथाविधि पूर्वस्यानुप्रयोगश्च । विश्रस्ता विधवा । उदास्से निर्व्यापारा वर्तसे । **उद्यमो हीति** यथा वत्सेन धेनोः क्षीरं गृह्णन्ति, एवमुद्यमवन्त एव दैवानुकूल्यं प्राप्य कार्यं साधयन्तीत्यर्थः। तेऽवरजस्य विचित्रवीर्यस्य । अपतनीयां पौत्रोत्पादनेन स्वर्गे निवासरूपाम् ।

ममायं मामकीनस्तं 'युष्मदस्मदोरन्यतरस्यां खञ्च' इति खञि 'तवकमम॰ कावेकवचने' इति प्रकृतेर्ममकादेशः (पृ—८४) नियोगेनानुमत्या यावज्जीवं यावज्जीवति, तावत् । अलमेवमभिप्रेत्य ईदृशोऽभिप्रायो न कर्तव्य इत्यर्थः । 'अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा'

प्रत्याचचक्षे प्रत्युक्तवती निराकृतवती वा । लोपो नाशः। प्रतिपद्यस्व गृहीत्य॰ र्थः। समर्थं समञ्जसम् । निगदता स्वकण्ठेनैव व्यक्तं वदता, निरयार्णवे नरकसमुद्रे । क्षमे समर्थे । शपमानेष्वाक्रोशत्सु । विपरिवर्तते व्यत्यस्ता भवति । विषमस्थेना॰ पद्गतेन । तदा आपत्काले । वृत्तिर्व्यवहारः । जीविका आजीवः । पृ—८५) धर्मायते धर्मवदाचरति । विघाताय व्याहन्तुम् । अनुरोधेन अनुसरणेन । आरिराधयिषसि आराधयितुमिच्छसि ।

अनुपेक्षणीयं उपेक्षितुमनर्हम्। वैषम्यं भेदः। अनुज्ञायतेऽनुमता भवति । नायं नियम आवश्यको न भवति । अग्रजन्मा विप्रः । आचार आचरणम् । निबर्हितेषु नाशितेषु । विनिपाताधोगतये। हानिर्नाशः ।

(पृ—८६) तद्भावनं कुलशुद्धम् । न्यासीक्रियते निधीयते गोप्यतया रोच्यत इत्यर्थः । अपह्नूयतेऽपलप्यते । विस्रब्धं विश्वासविशिष्टं यथा तथा ।

असूयितुं दुष्टतया ग्रहीतुम् ' 'असूञ् उपतापे ' इति कण्ड्वादिरयं धातुः। समापत्त्या यदृच्छया समागतेन आगतेन संगमं कृतवता वा। उदपादि उत्पद्यते स्म कर्तरि लुङि 'चिण् ते पदः' इति चिणि 'चिणो लुक्' इति तलोपः। पराशरेणेति निमित्ते तृतीया। पराशरं निमित्तीकृत्येति । उदपादीति ण्यन्तात्कर्मणि लुङ् च पराशरेणोत्पाद्यते स्मेति। यौवनप्राप्तेनेति 'द्वितीया श्रितातीत' इत्यादिना समासः। कानीनः कन्यकापुत्रः 'कन्यायाः कनीन च' इति चाद्ण्। तत्संनियोगेन प्रकृतेः कनीनादेशश्च। प्रत्यपादि प्रतिपादितो दत्तः 'विश्राणनं वितरणं स्पर्शनं प्रतिपादनं' इत्यमरः। विदांकुरु विद्धि 'विदांकुर्वन्त्वित्यन्यतरस्यां' इति निपातनाल्लोट्याम्प्रत्ययादिकम्। तत्प्रसङ्गे व्यासोत्पत्तिप्रस्तावे आनुषङ्गिकं संसृष्टम्। प्रयोजयामि स्नुषयोः संतानकरणाय प्रवर्तयामि।

ऊर्ध्वरेता ब्रह्मचारी। विग्रहवान् कृतशरीरः। भागधेयेन भाग्येन। पावितं पवित्रीकृतम्। व्यवहितसंबन्धेन यत्किंचित्संबन्धवता। उरसा निर्वृत्त औरसः पुत्रः, तेन 'उरसोऽण्च' सर्वान् वेदानधीते सर्ववेदः 'सर्वादेः सादेश्च लुग्वक्तव्यः' इति वार्तिकेन 'तदधीते तद्वेद' इति विहितस्याणो लुक्। (पृ—४७) पराशरस्यापत्यं पुमान् पाराशर्यस्तेन गर्गादित्वाद्यञ्। उद्देशमभिप्रायमनतिक्रम्य यथोद्देशम्।

क्षेत्रे पत्न्योः। आहरमाणः कुर्वन्। अर्हत्तमं पूज्यतमं प्रथमपूजार्हमिति यावत्। संभावया गौरवेण। चोदयसि पृच्छसि। तीर्थोपपादिता महापूरुषे विनियुक्ता पुण्यक्षेत्रे सत्पात्रे वा दत्ता च। गौर्वाक् धेनुश्च। प्रतिपादकं स्तोतारं दातारं च। सभाजय पूजय। मातुलेयं मातुलस्य वसुदेवस्य पुत्रम्। तिष्ठत्वभ्यधिकेति 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः' इति भगवन्तं प्रत्यर्जुनवचनात्।

पुरुषेषूत्तमः पुरुषोत्तमः, यद्वा उत्तमश्चासौ पुरुषश्च पुरुषोत्तमः कृष्णः, तस्य 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः। यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः' इति भगवद्वचनात्। (पृ—८८) **केनापीति** अनिर्ज्ञातत्वं अप्रकाश्यत्वं वा द्योतयितुं तथोक्तिः। मानयन् पूजयन्। संभावयन् संभावनीयं सर्वैः पूज्यं कुर्वन्। संचयो राशिः। अनुग्रहकाम्यया अनुग्रहेच्छया। इह अनुग्रहशब्देन लक्षणया अनुग्रहकर्तृत्वमर्थः। विमर्शः पर्यालोचनम्। अक्षान्तिरीर्ष्या। गुणेषु दोषाविष्करणमसूया। पाशाद्विमोचितो विपाशितः। निर्मन्थितो निर्लोडितो नाशित इति यावत्। गोत्रभिदिन्द्रः। वेदगर्भो ब्रह्मा 'कंजः प्राणश्च वेदीशवेदगर्भपुराणगाः' इत्यादि त्रिकाण्डशेषः। प्रशस्तिः ख्यातिः स्तुतिर्वा। चक्रं समूहो राज्यं वा। संख्यायन्ते संहता एकीभूता भवन्ति **कलासंख्येति** चतुःषष्ठ्या दिनैरधीतचतुःषष्टिकल इत्यर्थः। अधीती अधीतवान् इष्टादित्वादिनिः 'क्तस्येन्विषयस्य कर्मण्युपसंख्यानं' इति विद्यासु कलासु चेत्यत्र सप्तमी। ब्रह्मकल्पा ब्रह्मतुल्याः। परमर्षयः शास्त्रार्थप्रवचनसंप्रदायकर्तार ऋषयः। उत्सुकायेत अनुत्सुक उत्सुकः स्यात् भृशादित्वात्क्यङ्। अनुमापकमनुमितिकारकम्। विभूत्या ऐश्वर्येण। अनुहरते अनुकरोति 'हरतेर्गतताच्छील्ये' इति तङ्। (पृ—८९) ग्रामस्य तक्षा ग्रामतक्षः 'ग्रामकौटाभ्यां च तक्ष्णः' इति टच्। देवशिल्पी विश्वकर्मा। स्वापतेयां स्वपतये साधुभूतां 'पथ्यतिथिवसतिस्वपतेर्ढञ्' अन्योऽन्याभिमुखशालाचतुष्कविशिष्टं साधारणजनैरवस्थातुं योग्यं स्थानं संजवनं तद्वद्विधाय संजवनीकृत्य 'संजवनं त्विदम्। चतुःशालं' इत्यमरः। प्रतीक्षते समयं प्रतिपालयति। धनदः कुबेरः। भूतिं श्रियम्। उपदीकृत्य उपायनेत्वनार्पयित्वा। न खलु न विदितं सम्यग्ज्ञातमेव। सात्वतर्षभस्य

यादवश्रेष्ठस्य । उदरं बिभर्तीत्युदरंभरिः 'फलेग्रहिरात्मंभरिश्च' इति 'चान्द्रास्तु आत्मोदरकुक्षिष्विति फठः, ज्योत्स्नाकरम्भमुदरंभरयश्चकोरा इति मुरारिः' इत्युदाहृतं कौमुद्याम् । ब्रह्मवादिनो वेदविदो ब्राह्मणाः । दयिता स्त्री । पात्रे अर्हे । सजातीयतया समानजातित्वेन । अनुसंधेया अनुसंधातुं गमनादिना अनुकर्तुमर्हाः । भूतद्रुहः प्राणिहिंसकाः । महाक्रतुः राजसूययागः । अचाक्षुषीं चक्षुषा ग्रहीतुमशक्याम् । त्रैविद्यवृद्धास्त्रयीकुशलाः त्रिविधा विद्या त्रिविद्या तामधीयते विदन्ति वा त्रैविद्याः । उपस्थानीयायो स्वयमुपस्थानकर्त्र्यो साक्षादुपस्थातुमर्हायो वा 'भव्यगेय' इत्युभयत्र निपातनात्। साकल्यं संपूर्णता । स्मरणमात्रेण यस्येति 'प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वा । यानि तेषामशेषाणां कृष्णानुस्मरणं परम्' इति तन्नामस्मरणस्य सर्वप्रायश्चित्ततया स्मरणात् । (पृ—९०) निष्क्रियते कृतप्रायश्चित्ततां नीयते साद्गुण्यं सम्यगनुष्ठितत्वम् । सुगृहीतनामधेये प्रातःकाले स्मरणीयमङ्गलनामनि 'अथ यः प्रातः स्मर्यते शुभकाम्यया । स सुगृहीतनामा स्यात्' इति त्रिकाण्डशेषः। धन्यधन्योऽतीव भाग्यवान् । सर्वभूमेरीश्वरः सार्वभौमः श्रेष्ठः । सर्वभूमिपृथिवीभ्यामित्यनुवर्तमाने 'तस्येश्वरः' इत्यण् । मन्द्रस्वरेण गम्भीरध्वनिना । आमन्त्र्य संबोध्य । सभास्तारा: सभासदः। न्याय्येन न्यायादनपेतेन ।

धर्म्यं धर्मादनपेतम् । अर्थ्यमर्थादनपेतं 'धर्मपथ्यर्थन्यायादनपेते' इति यत्। अवतंसितं शेखरीकृतं उत्तमाङ्गं यैस्तेषु । आलोको जयशब्दः । वृन्दारकवृन्देषु देवसमूहेषु । याज्ञसेन्या द्रौपद्या । अवनेजनतीर्थेन अर्घ्यजलेन । सस्नौ अवभृथस्नानं कृतवान् ।

ऋद्धिमैश्वर्यम् । अक्षान्तेन ईर्ष्यावता । पार्श्वकेति 'पार्श्वेनान्विच्छति' इति कनि पार्श्वकः,पार्श्वमनृजुरुपाय इत्युक्तम् 'य ऋजुनोपायेनान्वेष्टव्यानर्थाननृजुनोपायेनान्वि-

च्छति, स उच्यते पार्श्वकः' इत्युक्तं तत्रैव भाष्ये। 'कुसृत्या विभवान्वेषी पार्श्वकः संधिजीवकः' इति त्रिकाण्डशेषश्च। तस्य वृत्तिर्व्यापारस्तेन। धूर्तेनाक्षिकेन।(पृ ९१) महीपतेः सभा महीपतिसभं, तस्मिन्, 'सभा राजामनुष्यपूर्वा' इति नपुंसकत्वम्। केशग्राहं केशेषु गृहीत्वा 'सप्तम्यां च' इत्यनुवर्तमाने 'समासत्तौ' इति णमुल्। समासत्तिः संनिकर्षः। कृपणवत्सला दीनेषु कृपावन्तः। चेतनावस्कन्दि प्रज्ञापहारकं 'उत्कट-कोटिकमतीव दुःसहमित्यर्थः। **आततायिन इति** 'अग्निदो गरदश्चैव शस्त्रपाणि-र्धनापहः। क्षेत्रदारहरश्चैव षडेते ह्याततायिनः' इत्युक्तस्य। शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः, तस्य भावस्तत्ता, ताम् 'शीर्षच्छेदाद्यच्च' इति यत्संनियोगेन शिरसः शीर्षादेशः 'आततायिनमायान्तं हन्यादेवाविचारयन्' इति स्मृतेः। मूकस्य स्वप्नो मूकस्वप्नः, तद्वदाचरिते बहिरप्रकाश्यत्वेन स्थित इत्यर्थः। प्रत्यवस्थायिनां प्रति-भटत्वेनोपस्थितां। पर्यवस्थाने तत्प्रतिद्वन्द्वीभवने। विविदिवान् ज्ञातवान्, विदेः क्वसौ रूपम्। एतदुपोद्घाततां एषः (द्यूतव्यवहार एव) उपोद्घातः पूर्वपीठिका यस्य स एतदुपोद्घातस्तस्य भावस्तत्ता ताम्। तदुद्घातस्य तस्य (भूभारहरणस्य) उद्घातः (आरम्भः) तदुद्घातस्तस्य 'ददृश्वान् दृष्टवान् दृशेः क्वसौ इडभावे रूपम्। दैव्या संपदा 'अभयं सत्त्वसंशुद्धिः' इत्याद्युक्तया। आसुरसंपदा 'दम्भो दर्पोऽतिमानश्च' इत्याद्युक्तया। अभिभूतस्य नष्टप्रज्ञस्येत्यर्थः। प्रख्यापनायां प्रकाशने। पणनादिषु ग्लहकरणादिषु। मोमुह्यते अतीव मुह्यति अपरिच्छेदकलुषा निश्चयाभावेन व्याकुला। अयं युधिष्ठिरः। (पृ—९२) अनध्यवसायकृता निश्चयाभावनिमित्तः। विपर्यासो वैपरीत्यम्। धर्ममयाः धर्मरूपः। प्रमाणयितव्यं प्रमाणं कर्तव्यम्। वैमनस्यकारि दुःखकृत्। श्वःश्रेयसं भद्रं 'श्वसो वसीयःश्रेयसः' इति समासान्तोऽच्। नाप्नुवीत न प्राप्नुयात्।

दुष्टा मेधा यस्य स दुर्मेधाः नञ्दुःसुभ्य इत्यनुवर्तमाने 'नित्यमसिच्प्रजामेधयोः' इत्यसिच्। अन्तरीभूयावकाशवान् भूत्वा देवित्वेत्यर्थः।सम्राड्युधिष्ठिरः।स्ववर्गे भवाः स्ववर्गीयास्तैः 'अशब्दे यत्खावन्यतरस्यां' इति पूर्वेण छः। द्वादशवार्षिकं द्वादशवर्षभृतं 'तमधीष्टो भृतो भूतो भावी' इति ठञ्। प्रणिधयो गूढमन्त्रिणो यान् स्पशा इत्याचक्षते। जीवनाशं नष्टान् जीवो यथा नश्यति तथा नष्टान्। 'कर्त्रोर्जीवपुरुषयोर्नशिवहोः' इति णमुल्। कषादित्वादनुप्रयोगश्च। आचार्ये द्रोणे। सत्त्वं स्थितिं किं पाण्डवा जीवन्त्युत नेति ब्रूहीत्यर्थः। **अवस्थानमिति** यदि जीवन्ति ते, तर्हि कुत्र वसन्तीति द्वितीयः प्रश्नः। निश्चिचीषुणा निश्चेतुमिच्छुना। 'विभाषा चेः' इति सनि अभ्यासात्परस्य कुत्वाभावपक्षे रूपम्। न परिहीयते न्यूनो न भवति। अनुकम्पनीया दयनीयाः। संधिच्छेदकता रन्ध्रप्रदायित्वमित्यर्थः। यश्चोरः परस्य गृहे चौर्याय भित्तौ शस्त्रेण छिद्रं करोति स संधिच्छेदकस्तद्वदित्यर्थः। आस्थीयेताङ्गीक्रियेत। अभिभूयन्ते अभिभूता भवन्ति न म्रियन्त इत्यर्थः (पृ—९३) **आढ्यंभावुकमिति** अनाढ्य आढ्यो भवतीत्यर्थे 'आढ्यसुभग' इत्याद्यनुवर्तमाने 'कर्तरि भुवः खिष्णुच्खुकञौ' इति खुकञ्। आढ्यः पुष्कलः। अभिषेणयद्भिः सेनयाभियुञ्जानैः 'सत्यापपाश' इत्यादिना णिच् 'उपसर्गात्सुनोतिसुवति' इत्यादिना षत्वम्। काल्यमानासु अपह्रियमाणासु। तस्य गावस्तद्गव्यस्तासु 'गोरतद्धितलुकि' इति समासान्तष्टच् टित्वान्ङीप् च। कपिध्वजे अर्जुने। अधिकपञ्चाः पञ्चभ्योऽधिकाः 'अधिकविंशाः' इत्यत्रेव प्रक्रिया। विनेयः शिष्यः। लिप्सेरन् लब्धुमिच्छेयुः। लभेः सनि अभ्यासलोपः। अनभ्युपगच्छति अनङ्गीकुर्वति। अनग्नो नग्नः क्रियतेऽनयेति नग्नंकरणी 'आढ्यसुभग' इत्यादिना कृञः करणे ख्युन 'नञ्स्नञीकक्ख्युन्' इत्यादिना ङीप्। प्रतीघातो निवारणम्।

संग्रहः संग्रहणम् । उभयेषु पाण्डवेषु धार्तराष्ट्रेषु च । आस्थितवतोऽङ्गीकृतवतः । संध्यर्थं समाधानाय । अवधीर्य निरस्य । विग्रहो युद्धम् । पृ—९४) हतको दुर्जनः 'हतको बन्धुदग्धवत्' इति त्रिकाण्डशेषः । दुराग्रहो दुष्टोऽभिनिवेशः स एव ग्रहो भूतविशेषः तेन ग्रस्तमास्वादितं दुराग्रहविशिष्टामित्यर्थः' विभाषा ग्रहः' इति णः, अच भवतः । तत्रेयं व्यवस्था जलचरे णः, ज्योतिष्यच् , ततश्च ग्राहो नक्रः, ग्रहो ज्योतिर्विशेषः 'ग्रहोऽनुग्रहनिर्बन्धग्रहणेषु रणोद्यमे । सूर्यादौ पूतनादौ च सैंहिकेयोपरागयोः' इति विश्वमेदिन्यौ । अत्ययो नाशः स आसन्नोऽस्यात्ययिकः अत्यय एव वा आत्ययिको विनयादित्वाट्ठञ् । विनिपातादधोगतेः । निर्वृता सुखिता । शोभनश्चासौ भ्राता च सुभ्राता, तस्य भावः कर्म वा सौभ्रात्रं युवादित्वादण् । शोभनो भ्राता यस्येति बहुव्रीहिपक्षेऽपि 'वन्दिते भ्रातुः' इति कपो निषेधात् सुभ्रातेत्येव रूपम् । सौभ्रात्रेण वित्ताः ख्याता सौभ्रात्रवित्ताः । सगर्भ्यान् ज्ञातीन् । छलेन वञ्चनया । क्षिपसि निराकरोषि । अपि नामेत्याशंसायाम् । प्रत्याशा भाविनो मङ्गलस्य प्रतीक्षा । क्षौमाणि दुकूलानि । वसीय आच्छादयेयम् । पितुर्भ्राता पितृव्यः । आत्मंभरिरुदरं बिभ्रत् सन् 'फलेग्रहिरात्मंभरिश्च' इति निपातनात्साधुः (पृ–९५) चतसृणां पूरणी चतुर्थी प्रभूत्साद्गुमन्त्राख्यास्तिस्रः शक्तयः। तदपेक्षया भ्रातुश्चतुर्थत्वम् । पञ्चम इति सामदानभेददण्डाख्याश्चत्वार उपायाः । भ्राता तु तत्र पञ्चम इत्यर्थः । व्यतिपाते व्यत्यस्तौ भवतः 'कर्तरि कर्मव्यतिहारे' इति अस्तेस्तङ् 'श्नसोरल्लोपः' इत्यल्लोपः । 'उपसर्गप्रादुर्भ्यामस्तिर्यच्परः' इति सस्य षः । व्यतिहारः परस्परस्य करणमिति तु प्रायिकम् । अत एव 'साध्यसाधनभावे यो व्यत्यासः, स क्रियाव्यतिहारः, परस्परंकरणमपि क्वाचित्क्रियाव्यतिहारः । यथा राजानः संप्रहरन्ते' इत्युक्तं कैयटेन ।

परात् शत्रुतः पराभवोऽवज्ञा । रिरक्षिषया रक्षितुमिच्छया । निदर्शनं दृष्टान्तः । गन्धर्वराजेन चित्रसेनेन । अवरोधवधूजनेष्वन्तःपुरस्त्रीजनेषु । पात्रेसमित इति भोगकालेष्वासन्नो भवन्यः कार्यकालेऽपसरति स पात्रेसमित उच्यते । 'पात्रेसमितादयश्च' इति समासः । सूतपुत्रे कर्णे । कांदिशीके भयद्रुते । पाशकैरक्षैः काशते दीप्यत इति पाशककाशी, तस्मिन्, सौबलपाशे निन्द्ये शकुनौ 'याप्ये पाशप्' कुले भवः कुल्यः 'अपूर्वपदादन्यतरस्यां यड्ढकञौ' इति यत् । स्वस्य कुल्यः स्वकुल्य इति समासः ।

तद्वर्जं पाण्डवान् शिखण्डिनं च वर्जयित्वा 'द्वितीयायां च' इति वर्जयतेर्णमुल् । (पृ—९६) खद्योतो ज्योतिरिङ्गणः सूर्यश्च । साधर्म्येण साम्येन । गर्वायमाणो गर्वितो भवान्नित्यर्थः । तमोऽपहस्य सूर्यस्य 'अपे क्लेशतमसोः' इति हन्तेर्डः । साहायकं सहायकर्म 'सहायाद्वा' इति वुञ् । अक्षौहिणीनां सेनानाम् । इति पञ्चम उच्छ्वासः ।

(पृ—९६) विन्यस्यमानासु व्यूह्यमानासु । प्रहण्यमानेषु ताड्यमानेषु 'हन्तेरत्पूर्वस्य' इति णत्वम् । पेपीयमानेषु भृशं मुहुर्मुहुर्वा पीयमानेषु यङन्तात्यक्' वीरपाणेषु युद्धारम्भकाले उत्साहजननाय क्रियमाणेषु मद्यादिपानेषु 'वीरपानं तु यत्पानं वृत्ते भाविनि वा रणे' इत्यमरः । 'वा भावकर्मणोः' इति णत्वम् । द्वंद्वोन्मुखेषु युद्धाय सन्नीभूतेषु 'द्वंद्वं रहस्ये कलहे तथा मिथुनयुग्मयोः' इति मेदिनी । अवमुच्य शरीरादवरोप्य । न्यासं उपनिधिं निक्षेपमिति यावत् 'पुमानुपनिधिर्न्यासः' इत्यमरः । यता वाग्यस्य स वाग्यतस्तम् । आहिताग्न्यादेराकृतिगणत्वाद्रूपसिद्धिः 'वाग्यतस्य निरवर्तयन् क्रियाः' इति रघुवंशे । अध्यवसायो निश्चयः । तदागमार्थं तस्य युधिष्ठिरस्य आगमनकार्यम् । आगमार्थं वेदार्थमिव । अनागमज्ञाः संप्रदाया-

नभिज्ञाः । तत्त्वगृह्याभिर्यथार्थबहिर्भूताभिः 'पदास्वैरि ' इत्यादिना 'बाह्या ' इत्यर्थं क्यप् । उपपत्तिभिर्युक्तिभिः । कटुकोक्तिभिस्तीक्ष्णैर्वचोभिः ।

(पृ—९७) आरटितानि जल्पितानि । उन्मत्तानां भ्रान्तानां प्रलपितान्यनर्थकवचांसीव । शताङ्गं रथम् । सितातपश्चन्द्रः । संवनिताभ्यां वशीकृताभ्याम् । अमन्दतया अनल्पतया 'मन्दोऽतीक्ष्णे च मूर्खे च स्वैरे चाभाग्यरोगिणोः । अल्पे च त्रिषु पुंसि स्याद्धस्तिजात्यन्तरे शनौ ' इति मेदिनी । प्रसमरेण व्याप्रियमाणेन 'उघस्यदः कमरच्' अश्मसारमयेनायसेन । उरश्छदेन कवचेन । अत्तुमिच्छा जिघत्सा ' लुङ्सनोर्घस्लृ ' इत्यदेर्घस्लादेशः। व्यात्तं विदारितं आननं येन तस्मिन् 'अच उपसर्गात्तः' इति ददातेरचस्ते सति रूपं व्यात्त इति । दण्डपाणौ मृत्याविव । अतिप्रचण्डेऽतीव भयानके । प्रक्ष्वेडनान् बाणान् । धीरोदात्तमिति 'महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः । स्थिरो निगूढाहंकारो धीरोदात्तो दृढव्रतः' इत्युक्तलक्षणम् ।

समीहितं काङ्क्षितम् । व्यायामकाले युद्धकाले कृच्छ्रसमये वा । प्रत्यनीकवृत्त्या प्रतिपक्षतया । प्रत्यवस्थितेषु योद्धुमुद्यतेषु । नाहासीनं त्यक्तवानसि । तत्कृते अर्थकामानपायार्थम् । (पृ—९८) ताभ्यामर्थकामाभ्याम् । वृणानयोः प्रार्थयमानयोः। प्रतिपन्थितायां विघ्नकारितायाम् । न केवलं नेश्महे शक्ता न भवाम इत्येव न । प्रत्युत अपितु । अकृतनिष्कृतिकं प्रत्युपकारमकृतवन्तम् । आनृण्येन वितीर्णऋणत्वेन शुचि शुद्धम् 'ऋणे शुचि' इति न्यायात् । पुरुपुण्यं बहुविधसुकृतवन्तमपि ऋणिनमनिर्यातितर्णम् । प्रसिता सक्ता बद्धा वा ।

प्रमथ्य बलात्कृत्य । आगमयस्व प्रतीक्षस्व 'आगमेः क्षमायां' इत्यात्मनेपदम् । संशृण्वानस्य सम्यक् शृण्वत एव 'समो गम्यृच्छिभ्यां' इति सूत्रे 'अर्तिश्रुदृशिभ्यश्च'

इति वार्तिकेनाकर्मकाधिकारे आत्मनेपदम् । धार्तराष्ट्रस्येत्यनादरे षष्ठी (पृ—९९) प्रत्यासत्त्या संनिहितत्वेन । अक्षान्तिधनोऽतीवेर्ष्यावानित्यर्थः । निभेन व्याजेन । अपालापीदपलपितवान् निह्नुतवान् ।

संचेतव्यं संपादनीयम् । ज्ञातेयं बन्धुत्वं 'कपिज्ञात्योर्ढक्' उपाधिर्हेतुः । उपहितात्मसु प्रासतबुद्धिषु । संप्रहरमाणेष्विति कर्मव्यतिहारे तङ् । **उभयेति** क्वचिदपि द्वेषादेरभावादित्यर्थः। **अव्याप्येति** व्याप्यत्वे हि व्यापकानुरोधेन प्रवृत्तिः स्यात्तदपि नास्तीत्यर्थः । प्रधनाय युद्धाय । खञ्जयन् खञ्जं विकलगतिकं कुर्वन् । शातयन् नाशयन् 'शदेरगतौ तः' इति णौ शदेर्दस्य तः। श्वेतशङ्खौ विराटपुत्रौ । प्रमन्थति स्म विलोडितान् हिंसितवान्वा । मन्थानशैलो मन्दरगिरिः ।

बलं न सहन्ते बलूलास्तेषु 'बलादूलः' इति वार्तिकम् । क्लैब्यं क्लीबत्वम् । विक्लवे अधीरे । गाण्डीवं धनुर्यस्य स गाण्डीवधन्वा अर्जुनः तस्मिन् 'धनुषश्च' इत्यनङ् । कालयमानं विद्राव्यमाणमिव । शलभायमानं शलभवदाचरत् । गजत्राता नक्रमुखप्रविष्टस्य गजस्य रक्षकः । अपास्यंस्त्यजन् । अङ्गुलेः सङ्गोऽङ्गुलिषङ्गः 'समासेऽङ्गुलेः सङ्गः' इति सस्य षः । तेन बन्धुरान् शोभनान् 'बन्धुरः शोभने नम्रे' इति मेदिनी । अभीषून् प्रग्रहान् 'अभीषुः प्रग्रहे रश्मौ' इत्यमरः । (पृ—१००) आर्तिहरः पीडानिवर्तकः । रथाङ्गकर्षं रथाङ्गं चक्रं त्वरया कर्षन् 'द्वितीयायां च' इति णमुल् ।

विद्युत्पुञ्जवत् पिञ्जरेण पीतवर्णेन 'पिञ्जरं कनके वाजिभेदे पीते च पिञ्जरः' इति विश्वः । बलशासनशरासनेनेन्द्रधनुषेव । संवलितेन संवृतेन । भीष्म एव कलापी बर्ही भीष्मकलापी । मण्डलीकृतः शरावापो धनुरेव कलापो बर्हो यस्य स तथोक्तः 'शरावापो धनुः स्त्री स्यात्तृणता त्रिणतापि च' इति त्रिकाण्डशेषः ।

'कलापो भूषणे बर्हे तूणीरे संहतावपि' इत्यमरः। षड्जवद्गभीरेण षड्जगभीरेण । षड्भ्यः (स्थानेभ्यः) जायत इति षड्जो मयूरस्वरः 'नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संस्पृशन् । षड्भ्यः संजायते यस्मात्तस्मात्षड्ज इति स्मृतः' इति षड्जलक्षणम् । **बिभिम इति** 'भियोऽन्यतरस्यां' इति हलादौ क्ङिति सार्वधातुके ईकारस्य इकारो वा । अप्रतिहतप्रसरा अव्याहतव्याप्तिः । पटीयसी पटुतरा । आस्था प्रीतिः । आगमापायिषु नश्वरेष्वित्यर्थः । भौतिकपिण्डेषु भूतविकारेषु शरीरेषु **बिभीमस्त्विति** 'भियोऽन्यतरस्यां' इति इकाराभावपक्षे रूपम् । मृषोद्यताया अनृतवादात् । 'राजसूयसूर्यमृषोद्य' इत्यादिना मृषोद्यशब्दो निपात्यते । एतदर्थो मृषोद्यतापरिहारार्थः । सत्यापितः सत्यः कृतः । सत्यापपाश ' इत्यादिना णिच् । स चासावर्थश्च तदर्थः। तस्मै हितस्तदर्थीयः 'तस्मै हितं ' इति छः । सत्यंकारः शपथकरणम् 'कारे सत्यागदस्य च ' इति मुम् । संधां प्रतिज्ञाम् । जीर्णं प्रत्युपकारानुत्पादकम् । (पृ—१०१) लोहितायति लोहितवर्णं भवति अस्तोन्मुखे सतीत्यर्थः । लोहितादिडाज्भ्यः क्यष् ' इति भवत्यर्थे क्यष् ' वा क्यषः' इति पाक्षिकं परस्मैपदम् । मिहिरमण्डले सूर्यबिम्बे ।

पृष्ठमांसादनवृत्तिना पिशुनेनेत्यर्थः । 'पृष्ठमांसादनं तत्स्यात्परोक्षे दोषकीर्तनम्' इति हेमचन्द्रः। संदष्टकर्णस्य उपजापितस्येत्यर्थः। समुत्तेजितः प्रकोपितः। आघारवान् आज्यवान् । वीतिहोत्रोऽग्निः । अशनिर्वज्रम् । हस्तिनां गजानां समूहो हास्तिकं 'हास्तिकं गजता वृन्दे' इत्यमरः।'अचित्तहस्तिधेनोष्ठक् ' आश्वमश्वानां समूहं । 'केशाश्वाभ्यां यञ्छावन्यतरस्यां'इति पक्षेऽण् । रथानां समूहो रथकड्या ताम्'खलगोरथात्, इनित्रकड्यचश्च'इति कड्यच्('वृन्दे त्वश्वीयमाश्ववत्'इति 'रथकड्या रथव्रजे' इति चामरः। वीरवेदं यं यं वीरं वेद विन्दते विन्ते वा तं सर्वमित्यर्थः। दृष्टदर्शं यं यं

दृतं (गावंतं) पश्यति तं सर्वम् 'कर्मणि दृशिविदोः साकल्ये ' इत्युभयत्र णमुल् । संवर्तकः प्रलयकारी। प्रवर्तयामासेत्यस्य आपगाः कर्म । रुधिरझराणां रक्तमयनिर्झराणां आसारेण संपातेन संपूर्यमाणाः पूर्णा भवन्तीः । तरङ्गिताः संजाततरङ्गाः, तारकादित्वादितच् । आवर्तोऽम्भसां भ्रमः । कबन्धाश्छिन्नमूर्धानः क्रियावन्तश्च ये गजाश्वादयस्त एव यादांसि जलजन्तवः'कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेवरं'। इति 'यादांसि जलजन्तवः' इति चामरः । भयानका भीषणाः । शोणितमयी रक्तरूपाः। आपगा नदीः। अक्षौहिणीसंख्यायाः अर्वाक् न्यूनमेव । सायं सायंकाले। संख्यं युद्धम् । शस्त्रसंख्या शस्त्रविद्या'संख्यं समिति संख्या स्यादेकद्व्यादिविचारयोः' इति विश्वमेदिन्यौ । विचारः शास्त्रमिति च नार्थान्तरम् ।

समुद्विग्नो भीतः। जिघत्सोरत्तुमिच्छोर्युद्ध्यमानस्येति यावत् । कल्यवर्ताय प्रातराशाय क्षणंप्रहारायेति यावत् । 'कल्यवर्तः प्रातराशः' इति हारावली-त्रिकाण्डशेषौ । उपाय एव औपयिकं विनयादित्वात्स्वार्थे ठक् 'उपायो ह्रस्वत्वं च' इति गणसूत्रम् । (पृ—१०२) शिविरं निवेशम् । जीवातवे जीविताय 'जीवातुरस्त्रियां भक्ते जीविते जीवनौषधे ' इति मेदिनी । सभया । दीनस्वरया बाष्पायमाणो बाष्पमुद्वमन्। उपतापितः पीडित इत्यर्थः। तपस्वी तापसः शोच्यश्च। ललाटं तपतीति ललाटंतपस्तेन 'असूर्यललाटयोर्दृशितपोः' इति खश् । आशंसोरभिलष्यतः 'सनाशंसभिक्ष उः' इत्युः । विषमस्थो दुःखितः । विजातीयो भिन्नप्रकारो जात्यन्तरभवो वा । धर्मं चरतीति धार्मिकः। धर्मवित्तानां धर्मपराणामित्यर्थः। शोभनं कृतवान् सुकृत् तेन 'सुकर्मपापमन्त्रपुण्येषु कृञः' इति भूते क्विप् । पित्तुक् च । देहन्यासेन शरीरत्यागेन । श्रेवसीयसं भद्रम् । 'श्वसो वसीयःश्रेयसः' इत्यच् । विजयो जयोऽर्जुनश्च ।

परान् तापयतीति परंतपः 'द्विषत्परयोस्तापेः' इति खच् । अभियोक्तुं प्रतियोद्धुम् । ग्लास्नून् स्वशस्त्रप्रहारेण ताम्यतः 'ग्लाजिस्थश्च ग्स्नुः' (पृ—१०३) कन्याशत्रुं भीष्मम् । पृष्ठं गोपायत इति पृष्ठगोपौ 'कर्मण्यण्' सौभद्रोऽभिमन्युः 'अष्टद्राभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः' इत्यण् । राक्षसो घटोत्कचः । पञ्चजने भवं पाञ्चजन्यं तत्र भवाधिकरणे गम्भीराञ्ञ्य इति सूत्रे 'पञ्चजनादुपसंख्यानं' इति ञ्यः ।

पुरुषमात्मानं मन्यत इति पुरुषंमन्या । इयं दुष्टकन्येति शिखण्डिनः क्षेपः। कन्यानटोऽर्जुनः विराटनगरेऽज्ञातवासे तथाचरणात् । षण्डो नपुंसकः, तदा बृहन्नलारूपत्वात् । पार्षतस्य शिखण्डिनः । आभिकर्षणं पुरः कर्षणं, अपकर्षणं पश्चात्कर्षणम् । रणरणकेन औत्सुक्येन । सुतुमुलः सुतरां रोमहर्षणः । संप्रमर्दो युद्धम् । उच्चलति प्रवर्तमाने । अभ्यामर्दे युद्धे । अपरं अह्नोऽपराह्णस्तस्य समये 'पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे' इत्येकदेशिसमासे 'अह्नोऽह्न एतेभ्यः' इत्यह्नोऽह्नादेशे 'अह्नोऽदन्तात्' इति णत्वम् । उत्कलिकोत्कण्ठा । दिक्पालानामुपज्ञा दिक्पालोपज्ञानि 'उपज्ञोपक्रमं तदाद्याचिख्यासायां' इति क्लीवत्वम् । उपज्ञा आद्यज्ञानम् । ध्वाङ्क्षवत्काकैस्तुल्यम् । विक्षिप्यमाणेषु विद्राव्यमाणेषु । घण्टापथः संसरणं तद्वदाचरति घण्टापथायमाने अनिरोधेन गन्तुं शक्य इत्यर्थः । द्रौपदः शिखण्डी ।

विडम्बनमनुकरणम् । (पृ—१०४) भारतीं वाणीम् । आदेशिकेन आदेशेन निर्वृत्तेन । अलभ्यमानं लोपमप्राप्नुवत् स्थानिनः स्त्रीत्वस्य चिह्नं लिङ्गम् । वाग्विग्लापनं वाचा कथनश्रमः 'ग्लास्नावनुवमां च' इत्यनुपसर्गादेव मित्त्वविधानात्सोपसर्गस्य ह्रस्वाभावः। प्रकृत्या जन्मना सिद्धो धर्मः प्रकृतिधर्मः स्त्रीत्वमिति यावत् । कोणो वीणावादनदण्डः । स्त्री च पुमांश्च स्त्रीपुंसौ 'अचतुर' इत्यादिना

निपातनात्साधुः। समानो धर्मो यस्य सधर्मा क्लीबस्य सधर्मा क्लीबसधर्मा तत्समान इत्यर्थः। मिषेण व्याजेन। दत्तहस्तः कृतसाहाय्य इत्यर्थः। भार्गवसंगरस्येति 'अधीगर्थ' इत्यादिना कर्मणि षष्ठी। संगरो युद्धम्। नुन्नेन प्रेरितेन। निरनुक्रोशो निर्दयः। अशरारुषु पीडामकुर्वत्सु 'शॄवन्द्योरारुः' सह योधितवान् सहयुध्वा, तस्य संबोधनं सहयुध्वन्निति 'सहे च' इति क्वनिप्। तदवस्थे न्यस्तशस्त्रे। विशिखं बाणम्।

(पृ—१०५) पुरुषप्रकाण्डे पुरुषश्रेष्ठे। उपरक्तं राहुगृहीतम्। पौरुषगाम्भीर्ये वीर्यौन्नत्यम्। शौर्यस्य शृङ्गमिव शृङ्गम्। वैनतेयायेत गरुडवदाचरेत्। सर्वोऽप्यात्मानं शूरमिव प्रथयेदित्यर्थः। साम्राज्यं सम्राट्कर्म। अन्तराले मध्यकाले।

वाचिकं संदेशवचनं 'वाचो व्याहृतार्थायां' इति ठक्। जुगुप्सा गर्हणा। मुमूर्षुर्मर्तुमिच्छुः। (पृ—१०६) **धूममार्गेणेति** 'धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्। तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते।' इति **उत्तरायण इति** 'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्। तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः' इति च स्मृतेः **विद्वदविद्वद्विषयाविति**। 'अतश्चायनेऽपि दक्षिणे' इति सूत्रेण 'दक्षिणायनेऽपि म्रियमाणो विद्वान् प्राप्नोत्येव विद्याफलम्' इति तथा 'उत्तरायणप्राशस्त्यप्रसिद्धिरविद्वद्विषया। भीष्मस्य तूत्तरायणप्रतिपालनमाचारपरिपालनार्थं, पितृप्रसादलब्धस्वच्छन्दमृत्युताख्यापनार्थं च' इति भाष्याच्च निश्चिताविति भावः। व्याख्यातं च तत्रैव भाष्ये वाचस्पतिमिश्रेण 'अविदुषो मरणं प्रशस्तमुत्तरायणे। विदुषस्तूभयत्राप्यविशेषो विद्यासामर्थ्यात्' इति। उत्तरायते उत्तरवत् उत्तरायणवदाचरति। **लोकन्यायानुसरणेति** 'यद्यदाचरति श्रेष्ठः' इत्यादिना अविद्वदुपकारतया। प्रख्यापयितुमिच्छुः प्रचिख्यापयिषुः। व्यतिरेको भेदः। आतनूपातं शरीरपतनपर्यन्तम्। तावद्यावदुत्तरायणागमनम्। उपधानमुपबर्हः। (पृ—१०७) करणग्राम इन्द्रियसमूहः। कार्यं शरीरम्। करणानीन्द्रियाणि, तेभ्यो विलक्षणं तद्रहितमित्यर्थः 'न तस्य कार्यं करणं च विद्यते' इति श्रुतेः। अपास्ता निरस्ताः। समस्ताः शरीरेन्द्रियप्राणमनो-

शुद्धिसंबन्धिनः सर्वे च दोषा येन तं 'अस्नाविरं शुद्धमपापाविद्धं' 'न कर्मणा वर्धते नो कनीयान्' 'अप्राणो ह्यमनाः शुभ्रः' तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवति' इति श्रुतिभ्यः । प्रातिलोम्येनाञ्चतीति प्रत्यङ् तम् । निदध्यौ निध्यातवान् कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ' इति श्रुतेः ॥
इति षष्ठ उच्छ्वासः ।

(पृ—१०७) पुरस्काराय पूजार्थम् । स्फटिकस्य विकारः स्फाटिकम् । कलशार्णवे क्षीरसमुद्र इव । अवदाते शुभ्रे । करम्बितः खचितः 'करम्बितं च खचितं रूषितं गुरुगुण्ठितं' इति त्रिकाण्डशेषः । दन्तावलो गजः । कुन्दकुसुमस्य माध्यपुष्पस्य निकुरम्बं समूहं विडम्बयत्यनुकरोतीति तस्मिन् । समाना छाया कान्तिर्यस्य तत्सच्छायं मरकतस्य सच्छायं तुल्यमित्यर्थः । तेन । कलेवरस्य देहस्य छाया कलेवरच्छायं तेन 'विभाषा सेनासुरा' इति क्लीबत्वम् 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः' इति विश्वः । 'शाद्वलः शादहरिते' इत्यमरः । उन्मिषिताभ्यां विकसिताभ्याम् । प्रबोधावस्था जाग्रदवस्था ।

आभिगामिकोऽभिगमनप्रयोजनकः । अभिगमशब्दात् 'प्रयोजनं' इति ठञि अनुशतिकादित्वादुभयपदवृद्धिः । अनुद्धतप्रकृतौ अदृप्तस्वभावे । उदासीनवदुपेक्षावतीव । (पृ—१०८) सुखशयनं पृच्छति सौखशायनिकः सुस्नातादित्वात् ठक् । व्यग्रो व्याकुलः । अधोक्षज कृष्ण । अभिध्यायसि चिन्तयसि । अवगन्तुं ज्ञातुम् । प्रतिलब्धवृत्तिः पुनर्मनोव्यापारं प्राप्तवानिव । मञ्चपर्यङ्कात् । तुच्छीकृतं निरस्तम् । शुष्मं प्रतापम् । ऊष्म उद्गमद्ध्मायमाणम् । विजातीयेन भिन्नप्रकारेण प्रत्ययेन मनोव्यापारेण वृत्त्या वा अनन्तरितेन अव्यवहितेन । एकजातीयकेन एकप्रकारकेण हृदयपुण्डरीके हृत्पद्मे । सत्त्ववतां बलवताम् । सात्वतानां भगवद्भक्तानाम् । सभाजयितव्यो मानयितव्यः ।

(पृ—१०९) अहनि च निशायां च अहर्निशम् 'विप्रतिषिद्धं चानधिकरणवाचि' इति समासः । निरिन्धनं निर्दग्धकाष्ठम् । शमीगर्भसंभवोऽग्निः । 'शमीगर्भादग्निं मन्थति' इति श्रुतेः । देदीप्यमानमतिशयेन दीप्यमानं दीपयदन्तस्येदं रूपम् । वह्निर्भवो

बाहीकः। कल्लोलितं तरङ्गवन्तमिव। विजितो निगृहीतः श्वासस्य उच्छ्वासनिःश्वासरूपस्य प्राणवायोः प्रचारो गतिर्येन कुम्भकाख्यं प्राणायामं कुर्वन्तमित्यर्थः। प्रत्याहृतो विषयेभ्यो व्यावर्तितः। यादवेन्द्रः कृष्णः। पौरवेन्द्रो युधिष्ठिरः। तिरोहिते अन्तर्धानं गते। अकस्माद्भवमाकस्मिकं अकस्मादित्यव्ययं कारणं विनेत्यर्थे। अवध्वंसनं तिरोधानम्। कदम्बैः समूहैः। अनवगाह्य विषयीकर्तुमनर्हम्। विरुद्धा प्रतिपत्तिर्विप्रतिपत्तिः। प्रतिपत्तिर्ग्रहणम्। घन इव श्यामो घनश्यामस्तं 'उपमानानि सामान्यवचनैः' इति समासः। अगदंकारश्चिकित्सकः 'कारे सत्यागदस्य च' इति मुम्। (पृ—११०) निर्भातं सम्यक् प्रकाशीभूतं तत्त्वं यस्य तस्मिन्। विद्यमानं दुःखितं। कालुष्यं कलुषत्वमाकुलत्वं दुःखमिति यावत्। कृतकिल्बिषतया त्वयि प्रहरणात्कृतापराधत्वम्। जिहासुना हातुमिच्छुना। रिक्थ धनम्। दायादेभ्यः पुत्रपौत्रादिभ्यः। शास्त्रस्य योनिः कर्ता तस्य संबुद्धिः'शास्त्रयोने' इति 'अस्य महतो भूतस्य निःश्वसितमेतत्, यदृग्वेदो यजुर्वेदः सामवेदः' इत्यादिश्रुतेः। 'शास्त्रयोनित्वात्' इति न्यायाच्च। विष्णुपदी गङ्गा। प्रचयः प्रकाशनं विस्तारो वा। अस्माकमयं आस्माकीनः 'युष्मदस्मदोरन्यतरस्यां खञ् च' इति खञ्। प्रवचनीयस्य व्याख्येयस्य। प्रवचनीयो व्याख्याता। 'भव्यगेय' इति सूत्रेण कृत्ये कर्तरि च निपातनात्। त्रयीवपुषि वेदरूपे 'सैषा त्रय्येव विद्या तपति' 'एषा एव त्रयी विद्या' इति श्रुतिभ्यः। ज्योतिषि सूर्ये।

अन्येद्युरन्यस्मिन्नहनि। जिज्ञासून् ज्ञातुमिच्छून्। (पृ—१११) विनेयः शिष्यः। समवयन्ति स्म मिलिता बभूवुः। प्रष्ठेऽग्रगामिनि। कलयांशेनापि। नालं बभूव शक्ता नासीत्। नमस्यन् नमस्कुर्वन् 'नमोवरिवश्चित्रङः क्यच्' इति क्यचि शतृप्रत्ययः।

न परिहीयते न वियुज्यते। इह भवं ऐहिकं, अमुष्मिन् परलोके भवं आमुष्मिकम्। उभयत्राध्यात्मादित्वाट्ठञ्। तदभावे प्रजापालनाभावे। मोघो व्यर्थः प्रयासो यस्य तन्मोघप्रयासकम्। गर्भाय हितं गर्भीयं तेन। भावयति वर्धयति। अन्तर्वत्नी गर्भिणी। उभयत्र प्रसवे प्रकृतौ च। तुलैव तौल्यम्। हस्तिपको

गजारोहः । (पृ—११२) अन्तरवर्ती मध्यस्थः । शाधि पालय । अलसस्य तन्द्रालोः । लसति प्रकाशते । सदने गृहे । अर्थेषु कार्येषु । उत्तानस्वभावं परामर्शरहितमित्यर्थः। पेशलकलैः चारुप्रायैः चतुरप्रायैर्वा 'चारौ दक्षे च पेशलः' इत्यमरः। **गृध्रसृगालन्यायेनेति** । कस्यचिद्विप्रस्यात्मजं मृतं श्मशाने नीत्वा तं परिवार्य स्थित्वा बान्धवा रुदन्ति स्म । तत्र कोऽपि गृध्रोऽस्तमितेऽहस्करे स्वयमत्तुमक्षमतया, प्रत्यासन्नतया च प्रदोषस्य, ततः प्रागेव तान्निरस्य स्वार्थसाधनाय प्रोचतः श्मशाने चिरानस्थानस्यानर्थावहत्वमुपपादयन् तान् कथमपि ततो निवर्तयामास । तथा तत्रैव वसन्, अस्तमिते सूर्ये स्वयं तत्पिशितं सामस्त्येन जक्षितुकामः कोऽपि सृगालः तावत्कालहरणाय तान् विलम्बयिष्यन् 'प्रतीक्ष्यतां कोऽप्यवसरः । कदाचिदयं जीवेत्' इति प्रत्याशाजननेन तान्निवर्तयामास। ततश्च स्वार्थसाधनपरौ तौ द्वावपि 'मृतो न कथमपि जीवेत्' इति 'बहवः पुनर्जीवितभाजः' इति चोत्तरोत्तरमुपपत्तिभिस्तान् पुनः पुनर्निवृत्तप्रत्यावृत्तान् वितेनतुरिति महाभारते शान्तिपर्वणि त्रिपञ्चाशदुत्तरे शततमेऽध्याये । तद्विस्तरः तत्रैव द्रष्टव्यः । उत्तिष्ठेरन् प्रवर्तेरन् 'उदोऽनूर्ध्वकर्मणि' इत्यनूर्ध्वकर्मत्वात्तङ् । **वाचोयुक्तीति** 'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु' इत्यलुक् । 'वाचोयुक्तिपटुर्वाग्मी' इत्यमरः । शारिका शुकजातीयः पक्षिविशेषः । अननुशासितार अनुपदिशन्तम् । संगृह्णीयुरादद्दीरन् । वाचनिकात् केवलवचने भवमपेक्ष्य । आनुष्ठानिकं अनुष्ठाने भवम् । देवानांप्रियो मूढोऽपि 'देवानांप्रिय इति च मूर्खे' इत्यर्थविशेषेऽलुक् 'स्याद्देवानांप्रियः छागे' इति त्रिकाण्डशेषः । **यश्चैवमेव इति** 'आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन । सुखं वा यदि वा दुःखं स योगी परमो मतः' इति 'आत्मवत्सर्वभूतानि यः पश्यति स पश्यति' इति 'न तत्परस्य कुर्वीत आत्मनः स्याद्यदप्रियं' इत्यादिस्मृतिभ्यः । अतिक्षुद्रस्वभावोऽत्यन्तमलप्रकृतिः । प्रत्यया अन्तःकरणव्यापाराः । **अन्यथा दृष्टमित्यादि** 'योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चोरेणात्मापहारिणा'। इति स्मृतेः । आत्मापहारित्वं नामान्यथा स्थितस्य यथा नयनमेव। पृ— **मा प्रसाद्भ्रंशादिति** धर्मोपदेशमध्ये अनृतं न वक्तव्य-

मिति अनुशासनं धर्मान्तरलोपेऽपि सत्यलोपो मा भूदिति तत्र प्रयत्नाभिशयदर्शनार्थम्। स्वैरेषु स्वच्छन्दवादेषु परिहासवचनेष्वपीति यावत्। अस्तेयं चौर्याभावः। प्रच्युतिर्भ्रंशः। वासव इन्द्रस्तदधीनत्वाद्वृष्टेः। अपकर्षो न्यूनता। सोपप्लवः सोपद्रवः। पापभूयिष्ठत्वात्पापिष्ठत्वं। मनसिकृत्य निश्चित्य 'अनत्याधान उरसिमनसी' इति गतित्वम्। एधि भव। मा चेत्यादि ज्ञातिवधेन मा विषीदेत्यर्थः। अस्मदीयः क्षात्रः। प्रत्यवस्थितेन प्रतिभटत्वेनोत्थितेन। एवं राजधर्मं समाप्य, आपद्धर्मं व्याचिख्यासुराह परं चेति। समुच्छ्वसितुमपि नालमिति लोकोक्तिरियम्। अर्थेन विना ईषदपि कार्यं कर्तुमशक्यमित्यर्थः। जघन्या निन्द्या। मुखं-पचता अर्थित्वम्। 'आततायी वधोद्यतः' इत्यमरः।

(पृ—११४) समीक्षया पर्यालोचनया। देहे जायमानेऽपीत्यादि 'न जायते म्रियते वा विपश्चित्' इत्यादिश्रुतेः। देहवधेऽपीति 'न हन्यते हन्यमाने शरीरे' इति श्रुतेः। अविनाशिनामित्यादि 'अविनाशी वा अरे अयमात्मा, अनुच्छित्तिधर्मा' इति श्रुतेः। अविनाशित्वं स्वतो नाशरहितत्वं अनुच्छित्तिधर्मत्वं परैरविनाश्यत्वम्। कथं संगच्छते संगता न भवत्येवेत्यर्थः 'समो गम्यृच्छिभ्यां' इति तङ्। अपरिहार्यो हीति 'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च। तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि' इति स्मृतेः। प्राक्तनेन प्राग्जन्मनि भवेन। इतरास्त्वति य इदानीं सुखप्रदवद्दुःखप्रदश्च व्यपदिश्यते, स तु। भिषज्यमानश्चिकित्स्यमानः। पर्जन्यधर्मा राजधर्मेत्युभयत्र च 'धर्मादनिच्केवलात्' इत्यनिच्। यथाबीजं बीजशक्त्यनुरूपमेव। कर्मकरान् भृत्यान्। साधुकारिण्यर्थे तृन्नन्तोऽयं 'प्रदातेति'। तेन 'न लोकाव्यय' इत्यादिना षष्ठीप्रतिषेधात् फलमिति द्वितीया। (पृ—११५) शास्त्रीयं शास्त्रसंबद्धं शौचिकेऽर्थे 'शुद्धाच्छः' क्रमान्मुक्त इति पापक्षयेण चित्तशुद्धिं प्राप्य ज्ञानेन मुक्तो भवतीत्यर्थः। तन्नियतपूर्ववर्तीति ततः शरीरात् नियतं यथा तथा पूर्वं वर्तत इति तन्नियतपूर्ववर्ति। करणं शरीरम्। आक्षिप्यते अर्थादभिधीयते। अयं जीवः, शरीरी देहवान् सन्। अनुमातुमूहितुम्। विपद्यमानेषु नश्यत्सु। वासोग्रहणन्यायेनेति 'वासांसि

जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि। तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही' इति स्मृत्युक्तेन। कष्टा कृच्छ्रा दुःसहतरेत्यर्थः। तदेवोपपादयति **अत्यन्तमित्यादिना** गर्भाशये मातृकुक्षौ। शेत इति शिशुः, तस्य भावः शैशवं तस्मिन्। अकल्यस्य असमर्थस्य। अविदिते आन्तरवेदनाया अन्तर्गतपीडायाः निदानं कारणं यैस्तैः। परिक्लिश्यमानस्य उपतप्यमानस्य। शैशवयौवनयोरन्तरालावस्था कौमारं तस्मिन्। समवायेन बहूनामेकीभावेन। वार्धके वृद्धभावे च। वैकल्यं अपाटवम्। कफवातादयो धातवः। (पृ—११६) आमयो व्याधिः। उज्जृम्भणेन वर्धनेन। पापच्यमानस्य भृशं पच्यमानस्य पचेर्यङन्तात्कर्मणि यक्। कुम्भीपाको नरकविशेषः। आदिशब्देन असिपत्रवनरौरव-महारौरवादिकं गृह्यते। यातनाप्रायत्वं तीव्रवेदनामयत्वम्। तिर्यक् पापकर्मफलोपभोगाय। ऊर्ध्वं पुण्यकर्मोपभोगाय। अधः पुण्यक्षये शेषकर्मणा पुनर्मर्त्यलोकं, यद्वा अत्युत्कटपापोपभोगाय मनुष्यलोकादधोलोकं वा गन्तुं। घटीयन्त्रवत् कूपाज्जलाहरणयन्त्रं घटीयन्त्रं तद्यथा ऊर्ध्वमधश्च परिभ्राम्यति तद्वदित्यर्थः। कुलालचक्रवत् यथा कुलालचक्रं तिर्यग्भ्रमति तद्वदित्यर्थः। राग. सुखानुकूलतयावगते वस्तुनि इच्छा, द्वेषस्तद्विघातुकेऽप्रीतिः। 'काम एष क्रोध एष रजोगुणसमुद्भवः। महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्' इत्युक्तत्वात् तत्प्रहाणमावश्यकं श्रेयस्कामस्येति भावः। रागद्वेषौ कामक्रोधौ च पर्यायशब्दौ। अपास्य मुक्त्वा। फलाभिसंधिवर्जं मपथ्येव फलोद्देशं विहाय। मृदितकषाया निर्मृष्टरागादिदोषाः। **अनधिकृतेनेति** सामस्त्येन साधनचतुष्टयमलब्धवतेत्यर्थः। अधिकृतेन शमादिसंपन्नेनापि। **लोकसंग्रहार्थमिति** 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' इति न्यायेन यत्प्रधानपुरुषेणानुष्ठीयते, तदेवाप्रधानेनाप्यनुष्ठीयते। यदि कृतकृत्यतयात्मनः फलाभावेन कर्माणि नानुतिष्ठन्ति मुनयः, तदा, अकृतकृत्य इतरोऽपि कर्म जह्यात्। ततश्च स पतितो भवेत्। तथा मा भूदिति कर्म कर्तव्यं विदुषापीति भावः। अत एव 'लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि' इत्युक्तं भगवता। **तदाचरन्मुच्यत इति** 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति

मानवः' इति स्मृतेः । समीश्वरम् । अन्यथा स्वधर्मत्यागे, परधर्मस्वीकारे वा । **पततीति** 'अकुर्वन्विहितं कर्म निन्दितं च समाचरन् । प्रसजंश्चेन्द्रियार्थेषु नरः पतनमृच्छति' इति मनुः। प्रत्यवायी दोषवान्। **परेश्वर इत्यादि**'तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतं 'न मद्भक्तः प्रणश्यति' इति च स्मृतेः। इति सप्तम उच्छ्वासः ।

पृ—११७ गणरात्रान्ते बह्वीषु निशासु व्यतीतासु 'गणरात्रं निशा बह्वयः' इत्यमरः 'अहःसर्वैकदेश' इति सूत्रे संख्याव्ययादेरित्यनुवृत्तेः 'बहुगणवतुडति संख्या' इति गणशब्दस्य संख्यात्वादच् 'संख्यापूर्वं रात्रं क्लीबं' इति क्लीबत्वम् । माघी पौर्णिमास्यस्मिन्निति माघः । 'सास्मिन् पौर्णिमासीति' इत्यण् । इदमवस्थस्य एवं शरतल्पस्थस्य । नीडमिव नीडं शरीरम् । जिहासुं हातुमिच्छुम् । प्रयाणान्ते प्राणोत्क्रमणकाले दर्शनम् । **भाविन** इति 'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरं' इत्यादि स्मृतेः। उशन्ति इच्छन्ति। भावयन्ति ध्यायन्ति। **भावनाचतुरा** इति 'प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव । भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम्' इत्युक्तप्रकारेण ध्यातुं समर्थाः। उत्क्रामामि प्राणेन्द्रियादिकलापमुपसंहृत्योर्ध्वं गच्छामि। आधाय विन्यस्य । स्वान्ते निधाय सम्यगवस्थाप्य । निदिध्यासनं निर्विकल्पकध्यानेच्छा समाधानमिति यावत् । सहस्रं धुर्या वाहा यस्य तेन सहस्रधुर्येण । वैमानिकेषु देवेषु । उच्चक्रमिषुरुत्क्रमितुमिच्छुः (पृ—११८)स्तवराजेन प्रशस्यतमेन स्तोत्रेण । **अपरिमितेति** अपरिमितोऽपरिच्छिन्नः । अचिन्तनीयः चिन्तयितुमशक्यः यः स्वकीयशक्तेर्विलासो विहारो विस्तारो वा तस्य लेशविकासोऽत्यल्पभागस्याविर्भावः, तेन विभासितः प्रकाशितः बहुविधो बहुप्रकारकः अण्डपिण्डचराचरजीवनिकायः समष्टिव्यष्ट्यात्मकः स्थावरजंगमात्मकश्च प्राणिसमूहः, तस्य निकाय्य आवासभूतःस्वोदरकोणस्य स्वकुक्षेरंशस्य एकदेशप्रदेशो भागो यस्य तस्य संबुद्धिः । **धनबलेति** धनबलयोर्मदेन मत्ताः, विशृङ्खलवृत्ताः स्वैरचेष्टाः, क्षत्रलक्षाः क्षत्रियव्याजभाजश्च येऽसुराः, तेषामक्षौहिणी सेना, तस्याः क्षोभ आक्रमणं तेन क्षुभितायाः व्याकुलितायाः

क्षोण्या भूमेः भरस्य क्षपणकृतेऽपनयनाय । **नवनवेति** नवनवेन नूतनप्रकारेण नवनवचनेन स्तुतिवाक्येन मुखरं शब्दायमानं मुखकमलं येषां ते तथाभूताः कमलभवपुरमथनशतमखा मुखे येषां ते तथोक्ताः ये मखभुजो देवाः तेषामनुनयः प्रार्थना तेन परिकलितं मनुजभुवने विहरणकौतुकं येन स तथाभूतः। **भोजराजेति** भोजराजेन कंसेन नियोजितस्य प्रेरितस्य बकासुरादिनिशाचरकुलस्य बालघातिकुलस्यैव तूलजालस्य कालानलायितं बाललीलायितं बालक्रीडा यस्य स तथाभूतः । बकी पूतना । कालीयः सर्पविशेषः । समुदयः समूहः । महामृगो गजः । पद्मिन्य उत्तमाश्रयः। पद्मिनीबन्धुः सूर्यः । जीवानां जीवनौषधभूत । पलालो गृहीतफलः शालिस्तम्बः; । धूमकेतुरग्निः । प्रपन्नाः शरणागताः । विश्वंभराभारो भूभारभूतो दुर्जनवर्गः । वाक्च मनश्च वाङ्मनसे तयोर्गोचरो न भवतीत्यवाङ्मनसगोचरम् ।

(पृ—११९) पाहि स्थापय 'नित्यवीप्सयोः' इत्याभीक्ष्ण्ये द्विरुक्तिः । 'नित्य-शब्दः कूटस्थेष्वविचालिषु वर्तते । आभीक्ष्ण्ये च । तत्र आभीक्ष्ण्ये वर्तते, तस्येह ग्रहणं' इत्युक्तं भाष्ये । रथ्यानां रथाश्वानां खुरपुटेभ्यः पुटाकारेभ्यः शफेभ्यः । उत्थिताभिर्धूलिभिः पांसुभिः धूसरितं मलिनीकृतम्। परागेण पुष्परजसा रूषितानां लिप्तानां लोलम्बकदम्बकानां भ्रमरसमूहानां विडम्बके अनुकारिणि निटिलतटे फालप्रदेशे अवलम्बिनां लम्बमानानां तथा विलुलितानां व्याकीर्णानां, च अलकानां केशाग्रभागानां आवल्या समूहेन चुम्ब्यमानं अलिकं ललाटाग्रभागो यस्य तम् । मदभियोगाय मत्प्रहाराय । **मम हृदयाब्ज इति** 'युधि तुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलङ्कृतास्ये । मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा' इति भागवते प्रथमस्कन्धे भीष्मकृतकृष्णस्तवे च । ब्रह्मरन्ध्रेण सुषुम्नाख्यया नाड्या । चकासामास दीप्यते स्म । **जयतीति** साधुगम्या सज्जनैर्गन्तुमर्हा पद्धतिरिति संबन्धः । यद्वा पद्धतिः साधु निराबाधं यथा तथा गम्या जयतु । सारस्वतश्रीः कवित्वसंपत् ।

इत्यष्टम उल्लासः ॥

# ERRATA FOR NOTES.

| Page. | Line. | For. | Read. |
|---|---|---|---|
| 1 | 2 | Means' | means |
| " | 4 | earnt | earned |
| " | 4 | Hair | heir |
| 2 | 18 | them | it |
| 3 | 7 | pleasent | pleasant |
| " | 25—26 | time. | time. कौमारविहारकुतूहलिनी + इव (when it goes with राजलक्ष्मी)=as if desirous of enjoying the sports of a youthful husband |
| 7 | 20 | beautiful | lustful |
| " | 22 | Euphamic | euphan |
| 8 | 5 | observor | observer |
| " | " | celchacy | celibacy |
| " | 8 | Sensual | sexual |
| " | 9 | Brahmacharin's | Brahmacharins |
| " | 26 | Sedetaness | Sedateness |
| 33 | 3 | is recognised | is not recognised |
| 35 | 4 | was of | was |
| " | 14 | worthy | worthy king |
| 36 | 5 | pleasent | pleasant |
| 39 | 3 | delightful | delightfulness |
| " | 22 | inaspicious | inauspicious |
| 40 | 2 | cleird | desiderative |

# NOTES.

श्रीभीष्मस्य विजयमधिकृत्य कृतं काव्यं. The word भीष्म lit. Means " The Terrible "- a name which he earnt from his deeds such as his vow of celibacy, voluntary resignation of his Hairship to the throne &c. भीष्मविजयम्.=The life of Bhishma. Being a meritorious life it is spoken of as विजय e. g. शंकरविजय, यादवाभ्युदय. This work presents to the reader in a succinct and continuous manner the story of the life and doings of Bhishma which are strewn in the several Parvas of Mahabharata. But it is not, as may be supposed, a mere prose rendering of what is found in verse in that great work. Though the author is wholly indebted to it for his materials, the description of important situations, the dialogues among the several characters and the delineation of the workings of their minds are all his own and are most beautifully and psychologically worked out. The chasteness of language and grandeur of thought are simply admirable.

The work as is usual in Sanskrit literature, opens with a salutation. The opening stanza has two meanings, one referring to Siva and the other to Bhishma, and thus forms an example of the Figure of Speech called श्लेष. It is so composed in accordance with another custom among Sanskrit authors

of giving in the opening stanza some hints regarding the subject of the story that follows. Thus this sloka as explained below briefly and suggestively refers to the principal events in the life of Bhishma.

First in its reference to Siva, काम means मन्मथ. This alludes to the famous incident of कामदहन by Siva in the Himalaya forests. काल "the God of Death." The allusion here is to the story of Markandeya who set aside मृत्यु with the help of Mahadeva. निगृहीतौ=defeated. ईष्टे सर्वलोकानां, कर्मणि षष्ठी. The lord of all the world, hence the name ईश्वर to Mahadeva. नौमि—नु 2nd conj. pres. 1st per. राजशेखरं, राजा here means 'The Moon', शेखर a garland of flowers worn on the head. राजा शेखरः यस्य तम्—इन्दुमौलिं. *2nd Meaning* refers to Bhishma. Here कामनिग्रह alludes to his vow of celibacy. कालनिग्रह refers to the story that Death himself was unable to approach him without first obtaining his consent. निग्रह here means checking. ईष्टे सर्वलोकानां. Bhishma had access to all the words whenever he liked them. राजशेखरं. Here शेखर means the best of the class. राज्ञां शेखरः Bhishma was never the king himself but greater still, the maker and director of kings. In the days of the "Great war" Bhishma 'the Grand-sire" as he was called, was equally loved and respected by both the parties. He was born to the throne and of his own free-will gave up his right, as will be seen, for his father's happiness.

राजा आसीदिति संबन्धः अन्ववाय—Lineage. वंशोऽन्ववाय इत्यमरः. सुधासार.........कृतः Here the king is compared to the Moon and hence this ephithet is common to both. When it refers to the king it means (lit)—adorned with qualities shining like beams of light and shedding the essence of Ambrosia, *i. e.* whose virtuous qualities are well-known and admired as pleasent. When applied to Moon the epithet means-decked with rays of light having the property of shedding nectar. सकृत्=once ; विस्रसा=old age ; शं=happiness ; तनोति=produces. शतनु=one who produces happiness. अन्वर्थ= true to the sense. *i. e.* He was Santanu in the true sense of the word, vide Tippani. भाव=substance. अनुभावविशेषः=peculiar greatness. In line 8, खत्वा is a misprint for खल्वा. आत्मनः refers to राजलक्ष्मी. समुपलंभन= enjoyment. कृतावसर=waiting for the occasion. देवापि was the elder brother of Santanu and hence the nearer heir to the throne. He was set aside by the people as he was suffering from leprosy; and his younger brother, Santanu, though a boy, was installed in his place. स्वयमुदासीने=this was the case as he was only a boy. कौमारविहारकुतूहलिनीव. Here the Padacheda should be done in two ways. कौमारविहारकुतूहलिनि+इव when it qualifies कुमार. It means, as if anxious to enjoy a maiden for the first time. In both the senses the word इव indicates उत्प्रेक्षा, "as if". उपनाहिता=conveyed. गुणगृह्याहि &c., the figure is अर्थान्तरन्यास

*i. e.* a general statement follows a particular. विदूर here means long distance and the mountain विदूर where the precious stone वैदूर्य is supposed to be found. हस्ताव-चेयमिव—as if at an arm's length. समुपादित्सन्ते desiderative of दा with सम् and उप. Note the change of अ to इ and the loss of the reduplicative syllable.

Page 2 :—अपराग: displeasure. कमनीयतमे= Most beautiful. अखण्डितोपभोग इव—as if pleased to divert her by affording uninterrupted enjoyment. Here the word खण्डिता which means a woman whose husband or lover has been guilty of infidelity and who is therefore angry with him, suggests that Santanu remained, for some time, without marriage as if to remove all chance of राजलक्ष्मी becoming a खण्डिता. वैजयन्ती=flag. विजयवैजयन्ती=flag showing victory. सविधं=near. हैमवती= Ganga ; एकान्त=Solitude or=as a rule. प्रतिपत्तिः=respect.

Page 3. विशेषं &. I have given every thing in general terms, please tell me in particular. सामान्यज्ञानेन=knowledge of the general. अनेहस्=(lit) that which is not liable to be destroyed. Here it means Time. अनीश्वरः=powerless. त्वदवष्टंभेन=with your support. विष्टंभयति=arrests. अवष्टम्भं=courage, steadiness of mind. अपथेष्वकृतपदा &c. cf. असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः। Sak. Act II. भारतव्यपदेशिनः=those of the Bharata family. विषय=country. प्रणप्ता=The great grandson. ऐतिह्य=tradition. प्रसन्न (i) Correct (ii)

kindly disposed. भाव=mind. ओंकार—This particle is used when a solemn affirmation and respectful assent are made as the word "Amen" cf. Sisupalavadha ओमित्युक्तवतोऽथ शार्ङ्गिणः । ओंकारे वाक्यप्रश्नइव ओं is again a sacred syllable used in the commencement and end of prayers, reading of Vedas &c. If uttered without this syllable every thing is supposed to become inefficacious cf. सर्वत्यनोंकृतं मन्त्रम् । अविश्रान्तं=endlessly. उपमन्त्र=coax. उपच्छन्द्, उपवद् all mean the same thing.

पुरूरवस्, The son of Budha and Ila and founder of the Lunar race of kings. He saw the nymph Urvasi while descending upon earth owing to the curse of Mitra and Varuna and fell in love with her. Urvasi, too, was enamoured of the king who was as renowed for personal beauty as for truthfulness, devotion and generosity, and became his wife. They lived happily together for many days and after she had borne him a son, she returned to the Heaven. The king heavily mourned her loss and she was pleased to repeat her visits five successive times and bore him five sons. But the king, who wanted her life long company, was not evidently satisfied with this; and he obtained his desired object after he had offered oblations as directed by the Gandharvas. The story told in Vikramorvasiya differs in many respects; so does the account given

in the Satapatha Brahmana, based on a passage in the Rigveda, where it is said that Urvasi agreed to live with Pururavas on two conditions:—namely that her two rams which she loved as children must be kept near her bed-side and never suffered to be carried away, and that he must take care never to be seen by her undressed. The Gandharvas, however, carried away the rams, and so Urvasi disappeared.

Page 4. कुलव्यपदेश=Family fame. सलिलवेणी=Stream of water. उच्चैः, नीचैः both are indic!inables. शूककीट=a kind of worm covered with bristles. मोघसंकल्प=with baffled intentions. संकल्पः कर्ममानसं । रम् when preceded by वि, आ, and परि takes Parasmaipada terminations. भविता 1st future 3rd singular of भू. वन्ध्य=fruitless. गृहेषु अस्वतन्त्राः कृता गृह्याः । तद् stands for पुमांसः विमानयन्तीति.

Page 5. त्रिवर्ग—the three aims of man's life. अधिरोहणी =Ladder. Here Heaven is spoken of as an upper story and wife is the ladder leading him on to it. पुन्नाम is the name of a hell intended for the sonless. Hence the derivation पुन्नाम्नो नरकात्त्रायत इति पुत्रः. निश्रेयस well-fare *i. e.* The heaven. जङ्घालः जङ्घा वेगवती अस्त्यस्य लच्. Running swiftly. वीतमानं=without any prejudice. ह्रद=a pond, कान्ताह्रद fig. रूपक. जनिस्थान=the place of birth. cf. आत्मा वै पुत्रनामासि, The husband is considered to enter his wife's body in spirit and to be born again

in the form of the son. Hence wife is here spoken as आत्मजनिस्थान. नियमं=restriction. नियमयति=Orders.

Page 6.पर्यनुयोक्तास्महे-युज् with परि and अनु 1st future 1st per. plural. विशल्यकरणी=a herb which heals wounds. उपवदमान=coaxing. दोहदचिह्न=Signs of pregnancy. पुनरुक्तशोभा=She was already beautiful and now was doubly so. कैवल्य lit means perfect isolation or soleness; thence detachment of the soul from matter and identification with the supreme spirit, hence freedom from sorrow and the enjoyment of perfect happiness. कैवल्यभूमि: Region of perfect bliss. उपर्युपरि दश्यवस्तूनि-Surpassing all beautiful objects. प्रत्यासन्न=near at hand. संमद=happiness.

Page 7. पश्यतः अनादरे षष्ठी—तत्संविद्=her agreement. अवहित्था=concealment of the signs of an internal feeling. भयगौरवलज्जोदहर्षाद्याकारगुप्तिरवहित्था. पिशुन=revealing or showing. घनरस means water in the case of कादम्बिनी and great affection when it refers to the queen. अनन्यरस=of very great pleasure. रतिपण्डिता=one skilled in giving beautiful enjoyment.

Page 8. अनेडमूक=deaf and dumb अत्याहित=extreme fear. निधां गमयन्त्यां is Euphamuistic for killing. तोक=child. निपुणं (ind) skilfully; goes with निरूपयन्। शुभोदर्के=good in future. विपरिणंस्यते नम् with विandपरि 3rd per. sing. 2nd future. middle voice. पर्यनुयोग=Inquiring. माध्यस्थ्यं =a sort of indifference.

Page 9. यातयाम=गतरस *i.e.*, becoming insipid. वैजनन= the time of delivery. संभावनीय. this unforeseen and spontaneous out—growth of वैराग्य is here depicted as a suitable precursor of the birth of Bhishma, the terrible observor of the vow of celebacy. प्रसमरेण= spreading. आसेचनक=charming. संभावनीय=which can be inferred. धर्मपादप. It is usual to speak धर्म as a tree. सांयुगिना.=warriors ग्राम्यसुख=sensual pleasures उपकुर्वक Brahmacharin's are divided into two classes (1)उपकुर्वक or one who wishes to enter married life (2) नैष्ठिक one who has determined to be a Brahmacharin for life. महसार=Important or valuable household things.

Page 10. कदर्य=wicked. दिवान्ध=owl. पावकि=God Subramania; the son of पावक or fire; so called because Siva's तेजस् was entrusted to him. ओजस्=Bodily strength, energy; but when it refers to सुकविवचस् it means an elaborate form of style full of componnds considered by Dandin to be the "soul of prose" ओजः समासभूयस्त्वमेतद्गद्यस्य जीवितम्. This ideal of the Sanskrit poets has been the main cause of the absence of simple Sanskrit prose works and the existence of the verbosity very often found in Dandakas and Churnikas. An example of such a style may be found at the end of the Text in the long चरमस्तोत्र of Bhishma. प्रसाद=Sedeteness; when applied to कविवचस् it means clearness of style; one of the gunas according to

Mammata. शुष्केन्धनाग्निवत् स्वच्छजलवत् सहसैव यः । व्याप्नोत्यन्यत्प्रसादो ऽसौ सर्वत्र विहितस्थितिः। परायणं=the chief abode. सर्वंकषा=All—destroying. cf. सर्वंकषा भगवती भवितव्यतैव । प्रतिप्रसव=at every birth, also, a counter-exception. न स्त्री स्वातन्त्र्यमर्हति is the general rule. Independence in her case is the exception. Restraining her at the end is the counter-exception. करीर=A shoot of a bamboo, a shoot in general; here, an off-spring. ववतृणलोभेन &c. The reference is to the story of a goat falling into an old well in its attempt to get at a mouthful of grass growing on the inside wall of the well.

Page 11. के नु नाम श्वमेत&c cf. The Tamil proverb[குடம் பால் கறந்தாலும் கூரையைப்பிடுங்குகிற மாடு ஆகுமா ?] कुण्डोध्नी-कुण्ड=a bowl. ऊधस्= udder, a Bahuvrihi compound meaning a cow with a full udder. The word ऊधस् at the end of Bahu. compounds is changed to ऊधन् to which the feminine termination ई is appended. ["ऊधसो:नङ्" and "बहुव्रीहेरूधसोङीष् " ] कुण्ड्यते रक्ष्यते जलं वह्निर्वा अत्रेति कुण्डं. कुण्डमिव ऊधः यस्यास्सा कुण्डोध्नी; वरिवस्या=obedient service. क्रियासमभिहारेण repeatedly.

Page 12. रत्नसानु=The mountain Mahameru. आसनमध्यासीनः आस् with अधि always governs an accusative. काष्ठा =cardinal points. Note how the various abstract qualities,and time &c. are personified and made the attendants of the Creator. यम, नियम. The Two of the eight angas or means of attaining yoga. The other angas are आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान and समाधिः. यम and

नियम are thus distinguished ; शरीरसाधनापेक्षं नित्यं यत्कर्म तद्यमः , नियमस्तु स यत्कर्म नित्यमागन्तुसाधनम् ॥ thus यम compulsory and नियम optional. Yamas and Niyamas are each in turn considered to be ten in number. नित्यसुरयः=the permanent residents of Heaven as opposed to those who obtain it by their deeds.

Page 13. अज्ञासिषं 1st Per. aorist of ज्ञा to know. ऋतु= a period of 16 days after menstruation, which is supposed to be favourable for conception. ऋतुगामिन्=one having sexual intercourse with his wife only during that period (ऋतु). ऋतुगमन is looked upon as a virtue and the neglect of it, a sin cf. "धर्मलोपभयाद्राज्ञीमृतुस्नातामिमांस्मरन्" Raghuvamsa. Again धर्मव्याध in Mahabharata says "ऋतुगामी सदाप्यहम्".

Page 14. कषाय= attachment to wordly habits. करण=the senses. विशिष्यते &c. This over estimating of the life in this world is to form a sort of consolation to the fallen महाभिष. प्रतीक्ष्यः=पूज्यः. सर्वोपकारि=a source of help to the other three stages of life viz., Brahmacharya, Vanaprastha, and Sanyasa, by affording them food, learning &c. cf. Manu, यथामातरमाश्रित्यसर्वेजीवन्तिजन्तवः । वर्तन्तेगृहिणस्तद्वदाश्रित्येतर आश्रमाः ॥ हव्य=oblation to devas. कव्य= offerings to the manes or pitris. अष्टौवसवः, धरो ध्रुवश्च सोमश्च अहश्चैवानिलोऽनलः प्रत्यूषश्चप्रभासश्च वसवोऽष्टावितिस्मृताः । a class of deities. उपस्थानीया who ought to be worshipped ; कटक= mountain side. चरन्ती=grazing.

Page 15. तपस्विनी here simply means pitiable. अजर्यं. This word, with the word संगतं expressed or understood, means friendship. आम्नाय=veda. वात्या (वातानांसमूहः यत्) stormy wind. वराक=Low-born, vile. लुण्टाककर्म=stealing.

Page 16. असांप्रतं=अयुक्तं. पोत=a boat, or some contrivance to go over water, here simply=means. पोत=child अनुक्रोश=mercy, उपक्रोश=censure.

Page 17. आपृच्छे=I take leave संभावनार्थमिव=as if to honour her. It refers to the custom of accompanying a short distance, those who take leave of us. cf. Sak. ओदकान्तात्स्निग्ध-जनोनुगन्तव्यः । चेतनायां Loc. absolute. आर्तरूपः=very much afflicted. Note the use of frequentatives दोदूयमान &c. to express intense feeling विपरिवर्तमानः=alternating ; संज्ञा=conscious state ; मूर्च्छा=unconscious state; delirium,. The state of consciousness is compared to the day-time and the unconscious condition, to the night as they come alternately and for the reason that only during day-time objects are clearly visible and living beings are active. निर्वेद=complete indifference to wordly objects. निदाघातपात् &c. the mental state of descrimination and true knowledge, coming after a perfect stage of ignorance, and delusion is compared to the occurrence of a heavy rain after the excessive summer heat. The point of comparison seems to lie only in the glaring dissimilarity of the concomitant events in both the cases (the Upamana and the Upameya). विमर्श=deliberation.

Page 18. अतिजघन्येन=very mean. स्त्रीमय्या=in the form of a woman. उच्चैःपदात् *i.e.* From Brahmaloka. अनीशता =absence of self reliance. पूतिगन्धि=Foul smelling (पूयगन्धि) स्वादुंकारं=mistaking to be sweet, something not really so. कोनुनामभुञ्जीत=न कोपीत्यर्थः; चर्वितचर्वण=(lit) Chewing the chewed. *i. e.*, useless repetition of any act. अनाघ्रेयम् =आघ्रातुं अयोग्यम्; स्त्रीपिण्डं=the body of a woman used contemptuously. पदे पदे=very often. हृणीयमानः=feeling ashamed of, cf. Bhattikavya. द्विवेपित्रत्र्यायुधभूषणाया हृणीयतेर्वार्यवतीनभूमि:। सतिसान्निध्ये=while in the presence. निम्न=deep. निम्नंगभीरंगंभीरं उत्तानंतद्विपर्यये इत्यमरः. The ready yielding of the mind to the temptation of the objects of senses is here appropriately compared to the sudden and rapid rush of water from a higher to a lower level when the bund is broken. एतन्निम्नहान्त &c. cf. विकारहेतौसति विक्रियन्ते येषां न चेतांसि त एवधीराः,; कदम्ब=multitude; संपिण्डितोविषयः—well established truth; आसन=a particular posture or mode of sitting practised by yogins; for the names of the several modes, see Tippani. स्वार्थैकपरत्वं=selfishness. निवृत्तिधर्म; Duties are of two kinds प्रवृत्तिधर्म and निवृत्तिधर्म. The first are those that result in wordly prosperity and the second, those leading to emancipation; निश्रेयस=Moksha. सर्ग==creation. द्वित्राः two or three *i. e.*, a few.

Page 19. वागुरा=a net. योषा=woman. मृगतृष्णा=mirage; बंभ्रम्यमाण. Frequentative pres. part of भ्रम् showing excess or repetition of the act. कृपणधर्मा=one having

very low ideals आहारनिद्रा &c. like beasts; प्रतीति=settled belief; शरणेसाधुः शरण्यः, शरणंगृहरक्षितोःइत्यमरः. The word means yielding protection or fit to protect. हिरण्यगर्भ is a name of Brahman (as born of a golden egg). It is also a name of Vishnu, Here it simply means God. आतः and अतः both mean therefore. प्रतिबन्ध the impediment referred to here is woman; she is spoken of as an impediment, as attachment to them arrests knowledge &c; तदनुबन्धि=relating to it; प्रबोध=knowledge. अनुगंगातटं=near the banks of the Ganges; an indeclinable compound, आखेट=hunt. अन्वेषक same as अन्वेष्टुं मध्येसलिलं an indeclinable compound wherein the positions of the parts are interchanged; अवनितले+इव, उदात्तदर्शनं=noble-looking. अद्राक्षीत्. aorist 3rd per. sing. of दृश्.धन्वान=barren land.

Page 20. ऐन्द्रजालिक=a juggler; इन्द्रस्य परमेश्वरस्य जालं मायेव, इन्द्रजालेन चरतीति ऐन्द्रजालिकः. The termination इक gives the sense of चरति. व्यत्यय=contrary to nature; hence wonderful. दृश्यरूप=very beautiful. Here रूप is only an intensive suffix in the first meaning and in the 2nd it is the word, meaning form. स्वयंदृश्यरूपोपि अदृश्यतांजगाम. The figure is विरोधाभास caused by the double meaning of दृश्यरूप.कवचहर=old enough to wear armour. cf. Raghuvamsa, सम्यग्विनीतमथवर्महरं कुमारमादिश्यरक्षणविधौ विधिवत्प्रजानां; चित्तीयमाण=wondering. धरित्रीजानिः. The word जाया assumes the form जानि at the end of Bahuvrihi compounds; उल्लेख=description. हल्लेख=reasoning. तोक=child. चरम=last. संवदते

